# ॥ विवेकचूडामणि ॥

सर्ववेदान्तसिद्धान्तगोचरं तमगोचरम्।

गोविन्दं परमानन्दं सद्गुरुं प्रणतोऽस्म्यहम्॥ १॥

अगोचरम् सर्ववेदान्तसिद्धान्तगोचरं तम् परमानन्दं सद्गुरुं गोविन्दं अहम् प्रणतः अस्मि ।

अगोचरम् – beyond the reach of senses;

सर्व-वेदान्त-सिद्धान्त-गोचरं – can be known only from the import of all Vedanta;

तम्-परमानन्दं – whose nature is Bliss Supreme; सद्गुरुं – Sadguru;

गोविन्दं-अहम्-प्रणतः-अस्मि – I bow down to Govinda;

I bow down to Sadguru Govinda, whose nature is Bliss Supreme. He is beyond the reach of senses, but can be known only from the import of all Vedanta.

जन्तूनां नरजन्म दुर्लभमतः पुंस्त्वं ततो विप्रता

तस्माद्वैदिकधर्ममार्गपरता विद्वत्त्वमस्मात्परम्।

आत्मानात्मविवेचनं स्वनुभवो ब्रह्मात्मना संस्थितिः

मुक्तिर्नो शतजन्मकोटिसुकृतैः पुण्यैर्विना लभ्यते॥ २॥

जन्तूनां नरजन्म दुर्लभम् *अस्ति* अतः पुंस्त्वं *दुर्लभम्* ततः विप्रता तस्मात् वैदिकधर्ममार्गपरता अस्मात् परम् विद्वत्त्वम् आत्मानात्मविवेचनम् तस्मात् ब्रह्मात्मना स्वनुभवः संस्थितिः दुर्लभम् अस्ति अतः शतजन्मकोटिसुकृतैः पुण्यैः विना मुक्तिः नो लभ्यते ।

जन्तूनां - for all beings; नर-जन्म – a human birth; दुर्लभम्- *अस्ति* – is difficult to obtain; अतः – more so; पुंस्त्वं – is a male body; ततः – rarer than that; विप्रता – is Brahmanhood; तस्मात् – rarer still; वैदिक-धर्म-मार्ग-परता – is the attachment to the part of Vedic religion; अस्मात् – higher than this; परम् विद्वत्त्वम् – is erudition in the scriptures; आत्मानात्म-विवेचनम् – discrimination between the Self and non-Self; स्वनुभवः – Realization; ब्रह्मात्मना-संस्थितिः – continuing in the state of identity with Brahman; *दुर्लभम्- अस्ति- अतः* – these come next in order so; मुक्तिः – liberation; नो-लभ्यते – is not to be attained; विना – except; शत-जन्म-कोटि-सुकृतैः-पुण्यैः – through the well earned merits of hundred crore of births.

For all beings a human birth– is difficult to obtain more so is a male body rarer than that is Brahman-hood rarer still is the attachment to the part of Vedic religion higher than this is erudition in the scriptures; discrimination between the Self and non-Self–Realization–and continuing in the state of identity with Brahman these come next in order. (So this kind of mukti) liberation is not to be attained except through the well earned merits of hundred crore of births.

दुर्लभं त्रयमेवैतद्देवानुग्रहहेतुकम्।

मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः॥ ३॥

मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः एतद् त्रयम् एवम् दुर्लभम् केवलं देवानुग्रहहेतुकम् प्राप्यते ।

मनुष्यत्वं – a human birth; मुमुक्षुत्वं – the longing for liberation;

महा-पुरुष-संश्रयः – the protecting care of a pefected sage; एतद्-त्रयम् – These three things;

एवम्-दुर्लभम् – rare indeed; देवानुग्रह-हेतुकम् – are due to the grace of God.

These three things which are rare indeed and are due to the grace of God namely a human birth–the longing for liberation and the protecting care of a pefected sage.

लब्ध्वा कथचिन्नरजन्म दुर्लभं

तत्रापि पुंस्त्वं श्रुतिपारदर्शनम्।

यस्त्वात्ममुक्तौ न यतेत मूढधीः

स ह्यात्महा स्वं विनिहन्त्यसद्ग्रहात्॥ ४ ॥

दुर्लभं नरजन्म पुंस्त्वं कथंचित् लब्ध्वा तत्र अपि श्रुतिपारदर्शनम् च लब्ध्वा तु यः मूढधीः आत्ममुक्तौ न यतेत स आत्महा हि यः त्व स्वं असद्ग्रहात् विनिहन्ति ।

दुर्लभं – rare; नर-जन्म – human birth; पुंस्त्वं – male body; कथंचित् – by some means;

लब्ध्वा – having obtained; तत्र-अपि-श्रुति-पार-दर्शनम् – and mastery of Vedas;

तु-यः – the man who; मूढधीः – is foolish enough; आत्म-मुक्तौ – for self liberation;

न-यतेत – not to exert himself; स-आत्महा-हि – verily commits sucide;

यः-त्व-स्वं-असद्ग्रहात्-विनिहन्ति – for he kills imself clinging to thing unreal..

The man who having by some means having obtained rare human birth with male body and mastery of Vedas to boot (to attack ignorance) – is foolish enough not to exert himself for self liberation–for he kills himself clinging to thing unreal–verily commits suicide.

इतः को न्वस्ति मूढात्मा यस्तु स्वार्थे प्रमाद्यति।

दुर्लभं मानुषं देहं प्राप्य तत्रापि पौरुषम्॥ ५॥

यः दुर्लभं मानुषं देहं तत्रापि पौरुषम् प्राप्य तु स्वार्थे प्रमाद्यति इतः मूढात्मा नु को अस्ति ।

यः – who; दुर्लभं-मानुषं-देहं – a rare human body; तत्र-अपि-पौरुषम् – and a masculine body; प्राप्य-तु – having obtained; स्वार्थे-प्रमाद्यति – neglects to achive the real end of life;

इतः-मूढात्मा-नु – what greater fool than; को-अस्ति – is the man who.

What greater fool is there than the man who having obtained a rare human body and a masculine body too–neglects to achive the real end of life?

वदन्तु शास्त्राणि यजन्तु देवान्

कुर्वन्तु कर्माणि भजन्तु देवताः।

आत्मैक्यबोधेन विनापि मुक्तिः

न सिध्यति ब्रह्मशतान्तरेऽपि ॥ ६ ॥

ब्रह्मशतान्तरे अपि शास्त्राणि वदन्तु देवान् यजन्तु कर्माणि कुर्वन्तु देवताःभजन्तु अपि आत्मैक्यबोधेन विना मुक्तिः न सिध्यति ।

शास्त्राणि-वदन्तु – let people quote scriptures; देवान्-यजन्तु – sacrifice to the gods;

कर्माणि-कुर्वन्तु – let them perform rituals; देवताः-भजन्तु – worship deities; अपि – but;

मुक्तिः-न-सिध्यति – there is no liberation;

आत्मैक्य-बोधेन-विना – without the realization of one's identity with the Atman;

ब्रह्म-शतान्तरे-अपि – no–not even in the life time of hundred Brahmas togetrher

Let people quote scriptures and sacrifice to the gods–let them perform rituals and worship deities–but there is no liberation without the realization of one's identity with the Atman no–not even in the life time of hundred Brahmas together.

अमृतत्वस्य नाशास्ति वित्तेनेत्येव हि श्रुतिः ।

ब्रवीति कर्मणो मुक्तेरहेतुत्वं स्फुटं यतः ॥ ७ ॥

वित्तेन अमृतत्वस्य आशा न अस्ति इति श्रुतिः हि कर्मणः मुक्तेः अहेतुत्वं स्फुटं एव ब्रवीति ।

वित्तेन – by means of riches; अमृतत्वस्य – of immortality; आशा – hope; न – no; अस्ति – there is;

इति-श्रुतिः-हि – such declaration of Vedas itself; कर्मणः-मुक्तेः-अहेतुत्वं – works can not be the cause of liberation; स्फुटं-एव-ब्रवीति – says it clearly that.

'There is no hope of immortality by means of riches'–such declaration of Vedas itself says it clearly that 'works can not be the cause of liberation'.

अतो विमुक्त्यै प्रयतेत् विद्वान्

संन्यस्तबाह्यार्थसुखस्पृहः सन् ।

सन्तं महान्तं समुपेत्य देशिकं

तेनोपदिष्टार्थसमाहितात्मा ॥ ८ ॥

अतः विद्वान् संन्यस्तबाह्यार्थसुखस्पृहः सन् सन्तं महान्तं देशिकं समुपेत्य तेन उपदिष्ट अर्थ समाहितात्मा विमुक्त्यै प्रयतेत् ।

अतः – therefore; विद्वान् – the man of learning; संन्यस्त-बाह्यार्थ-सुख-स्पृहः-सन् – having renounced his desire for pleasure from external objects; सन्तं-महान्तं-देशिकं-समुपेत्य – duly approaching a good and generous preceptor; तेन-उपदिष्ट-अर्थ-समाहितात्मा – and fixing his mind on the Truth inculcated by him; विमुक्त्य-प्रयतेत् – should try his best for liberation.

Therefore the man of learning–having renounced his desire for pleasure from external objects, duly approaching a good and generous preceptor, and fixing his mind on the Truth inculcated by him–should try his best for liberation.

उद्धरेदात्मनात्मानं मग्नं संसारवारिधौ ।

योगारूढत्वमासाद्य सम्यग्दर्शननिष्ठया ॥ ९ ॥

सम्यग्दर्शननिष्ठया योगारूढत्वम् आसाद्य संसारवारिधौ मग्नं आत्मानं आत्मना उद्धरेत् ।

सम्यग्दर्शन-निष्ठया – by means of devotion to right discrimination; योगारूढत्वम्-आसाद्य – having attained the *yogarudtva* state–संसार-वारिधौ-मग्नं – immersed in the sea of birth and death;

आत्मानं-आत्मना-उद्धरेत् – one should recover oneself.

Having attained the *yogarudtha* state one should recover oneself immersed in the sea of birth and death by means of devotion to right discrimination.
(*yogarudtva* state – is described in Gita VI-4, as "When one is attached neither to sense-objects nor to actions, and has given up all desires, then one is said to be *yogarudha* or to have ascended the *yoga-path*.)

संन्यस्य सर्वकर्माणि भवबन्धविमुक्तये ।

यत्यतां पण्डितैर्धीरैरात्माभ्यास उपस्थितैः ॥ १० ॥

आत्माभ्यासः उपस्थितैः धीरैः पण्डितैः सर्वकर्माणि संन्यस्य भवबन्धविमुक्तये यत्यतां ।

आत्माभ्यासः-उपस्थितैः – having commenced the practice of the realization of the Atman;

धीरैः-पण्डितैः – the wise and erudite; सर्व-कर्माणि-संन्यस्य – give up all works;

भव-बन्ध-विमुक्तये-यत्यतां – try to cut loose the bonds of birth and death.

Let the wise and erudite one having commenced the practice of the realization of the Atman give up all works and try to cut loose the bonds of birth and death.

चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये ।

वस्तुसिद्धिर्विचारेण न किंचित्कर्मकोटिभिः ॥ ११ ॥

कर्म चित्तस्य शुद्धये न तु वस्तूपलब्धये वस्तुसिद्धिः विचारेणन किंचित् अपि कर्मकोटिभिः ।

कर्म – work; चित्तस्य-शुद्धये – leads to purification of mind; न-तु-वस्तूपलब्धये – not to perception of the Reality; वस्तुसिद्धिः – the realization of Truth; विचारेण– is brought about by discrimination; न-किंचित्-अपि – and not in the least; कर्म-कोटिभिः – by ten millions of acts.

Work leads to purification of mind–not to perception of the Reality. The realization of Truth- is brought about by discrimination and not in the least by ten millions of acts.

सम्यग्विचारतः सिद्धा रज्जुतत्त्वावधारणा

भ्रान्तोदितमहासर्पभयदुःखविनाशिनी ॥ १२ ॥

भ्रान्त उदित महासर्पभयदुःखविनाशिनी या रज्जुतत्त्व अवधारणा सा सम्यग्विचारतः सिद्धा भवति ।

सा-भ्रान्त-उदित-महा-सर्प-भय-दुःख-विनाशिनी – which puts an end to the great fear and misery caused by the snake worked up in the deluded mind; या-रज्जु-तत्त्व-अवधारणा-सम्यग्विचारतः-सिद्धा-भवति – by adequate reasoning the conviction of the reality about the rope is gained.

By adequate reasoning the conviction of the reality about the rope is gained which puts an end to the great fear and misery caused by the snake worked up in the deluded mind.

अर्थस्य निश्चयो दृष्टो विचारेण हितोक्तितः ।

न स्नानेन न दानेन प्राणायमशतेन वा ॥ १३ ॥

अर्थस्य निश्चयो हित उक्तितः विचारेण दृष्टः न स्नानेन न दानेन न वा प्राणायमशतेन ।

अर्थस्य-निश्चयो – the conviction of the Truth; हित-उक्तितः – the salutary counsel of the wise; विचारेण – reasoning upon; दृष्टः – is seen to proceed from; न-स्नानेन – neither by bathing in the sacred waters; न-दानेन – nor by gifts; न-वा-प्राणायम-शतेन – or not by hundred Pranayamas (control of the vital force).

The conviction of the Truth is seen to proceed from reasoning upon the salutary counsel of the wise but neither by bathing in the sacred waters nor by gifts or not by hundred Pranayamas (control of the vital force).

अधिकारिणमाशास्ते फलसिद्धिर्विशेषतः ।

उपाया देशकालाद्याः सन्त्यस्मिन्सहकारिणः ॥ १४ ॥

फलसिद्धिः विशेषतः अधिकारिणम् आशास्ते अस्मिन् देशकालाद्याः उपाया सहकारिणःसन्ति ।

फल-सिद्धिः – success; विशेषतः – essentially; अधिकारिणम्-आशास्ते – depends on a qualified aspirant; अस्मिन् – in this regard; देशकालाद्याः-उपाया – time–place and other such means; सहकारिणः-सन्ति – are but auxiliaries.

Success depends essentially on a qualified aspirant time–place and other such means are but auxiliaries in this regard.

अतो विचारः कर्तव्यो जिज्ञासोरात्मवस्तुनः

समासाद्य दयासिन्धुं गुरुं ब्रह्मविदुत्तमम् ॥ १५ ॥

अतः जिज्ञासोः ब्रह्मविदुत्तमम् दयासिन्धुं गुरुं समासाद्य आत्मवस्तुनः विचारः कर्तव्यो ।

अतः – hence; जिज्ञासोः – the seeker after the Reality of t he Atman; ब्रह्मविदुत्तमम् – who should be the best of the knowers of Brahman; दया-सिन्धुं – an ocean of mercy; गुरुं – the preceptor; समासाद्य – after duly approaching; आत्मवस्तुनः-विचारः-कर्तव्यो – should take to reasoning;

Hence the seeker after the Reality of the Atman should take to reasoning after duly approaching the preceptor *(Guru)* who should be the best of the knowers of Brahman and an ocean of mercy.

मेधावी पुरुषो विद्वानुहापोहविचक्षणः ।

अधिकार्यात्मविद्यायामुक्तलक्षणलक्षितः ॥ १६ ॥

मेधावी विद्वान् उहापोहविचक्षणः उक्तलक्षणलक्षितः पुरुषः आत्मविद्यायाम् अधिकारी ।

मेधावी – an intelligent; विद्वान् – learned; उहापोह-विचक्षणः – skilled in arguments in favour of the scriptures and refuting counter-arguments against them; उक्त-लक्षण-लक्षितः – one who has got the said characteristics; पुरुषः – man; आत्मविद्यायाम् – of the knowledge of the Atman; अधिकारी – is the fit recipient.

An intelligent and learned man skilled in arguments in favour of the scriptures and refuting counter-arguments against them - one who has got the said characteristics is the fit recipient of the knowledge of the Atman.

विवेकिनो विरक्तस्य शमादिगुणशालिनः

मुमुक्षोरेव हि ब्रह्मजिज्ञासायोग्यता मता ॥ १७ ॥

विवेकिनः विरक्तस्य शमादिगुणशालिनः मुमुक्षोः एव हि ब्रह्मजिज्ञासा-योग्यता मता ।

विवेकिनः – who discriminate between real and unreal; विरक्तस्य – whose mind is turned away from the unreal; शमादि-गुण-शालिनः – who possesses calmness and allied virtues; मुमुक्षोः – who is longing for liberation; एव-हि – is alone; ब्रह्म-जिज्ञासा-योग्यता-मता – considered qualified to inquire after Brahman.

One who discriminate between real and unreal–whose mind is turned away from the unreal–who possesses calmness and allied virtues and who is longing for liberation is alone considered qualified to inquire after Brahman.

साधनान्यत्र चत्वारि कथितानि मनीषिभिः ।

येषु सत्स्वेव सन्निष्ठा यदभावे न सिध्यति ॥ १८ ॥

अत्र चत्वारि साधनानि मनीषिभिः कथितानि येषु सत्सु एव सन्निष्ठा यत्-अभावे (तत्) न सिध्यति ।

अत्र – regarding this; चत्वारि-साधनानि – four means of attainment; मनीषिभिः-कथितानि – sages have spoken; येषु-सत्सु-एव – which alone being present; सन्निष्ठा – the devotion to Brahman; (सिध्यति) – succeeds; यत्-अभावे – in absence of which; (तत्)-न-सिध्यति – it fails.

Regarding this sages have spoken of four means of attainment–which alone being present–the devotion to Brahman succeeds–and in absence of which it fails.

आदौ नित्यानित्यवस्तुविवेकः परिगण्यते ।

इहामुत्रफलभोगविरागस्तदनन्तरम् ।

शमादिषट्कसम्पत्तिर्मुमुक्षुत्वमिति स्फुटम् ॥ १९ ॥

आदौ नित्य-अनित्य वस्तुविवेकः परिगण्यते तदनन्तरम् इह-अमुत्र-फलभोग-विरागः द्वितियो तृतीयं शमादि-षट्क-सम्पत्ति तथा चतुर्थ मुमुक्षुत्वम् इति स्फुटम् ।

आदौ – first; नित्य-अनित्य-वस्तु-विवेकः – discrimination between the Real and the unreal; परिगण्यते – is enumerated; तदनन्तरम् – next comes; इह-अमुत्र-फलभोग-विरागः – aversion to the enjoyment of fruits (of one’s actions) here and hereafter; शमादि-षट्क-सम्पत्तिः – the group of six attributes–viz. calmness and the rest; तथा – and the last; मुमुक्षुत्वम् – the yearning for liberation; इति-स्फुटम् – is clearly.

First is enumerated discrimination between the Real and the unreal; next comes aversion to the enjoyment of fruits (of one’s actions) here and hereafter; thereafter the group of six attributes–viz. calmness and the rest; and the last (but not least) is clearly the yearning for liberation.

ब्रह्म सत्यं जगन्मिथ्येत्येवंरूपो विनिश्चयः ।

सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः ॥ २० ॥

ब्रह्म सत्यं जगत् मिथ्या इति एवंरूपः विनिश्चयः स अयं नित्यानित्यवस्तु विवेकः समुदाहृतः ।

ब्रह्म-सत्यं – Brahman is real; जगत्-मिथ्या – the universe unreal; इति-एवंरूपः – to the effect that; विनिश्चयः – a firm conviction of the mind; नित्यानित्यवस्तु-विवेकः – discrimination between the Real and the unreal; स-अयं-समुदाहृतः – is designated as.

A firm conviction of the mind to the effect that Brahman is real and the universe unreal is designated as discrimination between the Real and the unreal.

तद्वैराग्यं जिहासा या दर्शनश्रवणादिभिः

देहादिब्रह्मपर्यन्ते ह्यनित्ये भोगवस्तुनि ॥ २१ ॥

देह-आदि-ब्रह्म-पर्यन्ते हि अनित्ये भोगवस्तुनि दर्शनश्रवणादिभिः या जिहासा तत् वैराग्यं ।

देह-आदि-ब्रह्म-पर्यन्ते – from those of an animate body to those of Brahmanhood-(having already known their defects); हि-अनित्य-भोग-वस्तुनि – all transitory enjoyments; दर्शन-श्रवणादिभिः – from observation–instruction and so forth; या-जिहासा – the desire to give up; तत्-वैराग्यं – renunciation is.

Renunciation is the desire to give up all transitory enjoyments from those of an animate body to those of Brahmanhood-(having already known their defects) from observation–instruction and so forth.

विरज्य विषयव्राताद्दोषदृष्ट्या मुहुर्मुहुः ।

स्वलक्ष्ये नियतावस्था मनसः शम उच्यते ॥ २२ ॥

विषयव्रातात् मुहुर्मुहुः दोषदृष्ट्या विरज्य मनसः स्वलक्ष्ये नियत-अवस्था शम उच्यते ।

विषय-व्रातात् – from manifold sense-objects; मुहुर्मुहुः-दोष-दृष्ट्या – by continually observing their defects; विरज्य – after having detached itself ; मनसः-स्वलक्ष्ये-नियत-अवस्था – the resting of the mind steadfastly on its Goal; शम-उच्यते – is called calmness.

The resting of the mind steadfastly on its Goal (viz. Brahman) after having detached itself from manifold sense-objects by continually observing their defects is called calmness.

विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके ।

उभयेषामिन्द्रियाणां स दमः परिकीर्तितः ।

बाह्यानालम्बनं वृत्तेरेषोपरतिरुत्तमा ॥ २३ ॥

उभयेषाम् इन्द्रियाणां *पंचज्ञानेन्द्रियाणां पंचकर्मेन्द्रियाणां च* विषयेभ्यः परावर्त्य स्वस्वगोलके स्थापनं स दमः परिकीर्तितः वृत्तेः बाह्य-अनालम्बनं एषा उत्तमा उपरतिः *उच्यते* ।

उभयेषाम्-इन्द्रियाणां – both kinds of sense– organs; (*पंचज्ञानेन्द्रियाणां पंचकर्मेन्द्रियाणां च – five organs of knowledge & five organs of action*) विषयेभ्यः – from sense– objects; परावर्त्य – turning away; स्वस्वगोलके – in their respective centers; स्थापनं – placing them; स-दमः-परिकीर्तितः – is called self– control; वृत्तेः – the mind function; बाह्य-अनालम्बनं – ceasing to be affected by external objects; एषा-उत्तमा-उपरतिः – the best self– withdrawal consists in.

Turning both kinds of sense-organs (*five organs of knowledge & five organs of action*) away from sense-objects and placing them in their respective centers is called self-control. The best self-withdrawal consists in the mind function ceasing to be affected by external objects.

सहनं सर्वदुःखानामप्रतीकारपूर्वकम् ।

चिन्ताविलापरहितं सा तितिक्षा निगद्यते ॥ २४ ॥

सर्वदुःखानाम् अप्रतीकारपूर्वकम् चिन्ताविलापरहितं सहनं सा तितिक्षा निगद्यते ।

सर्व-दुःखानाम् – of all afflictions; अप्रतीकार-पूर्वकम् – without caring to redress them; चिन्ता-विलाप-रहितं – being free (at the same time) from anxiety or lament on their score; सहनं – the bearing; सा-तितिक्षा-निगद्यते – is called forbearance.

The bearing of all afflictions without caring to redress them and being free (at the same time) from anxiety or lament on their score is called forbearance.

शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यवधारणम्।

सा श्रद्धा कथिता सद्भिर्यया वस्तूपलभ्यते ॥ २५ ॥

शास्त्रस्य गुरुवाक्यस्य सत्यबुद्धि-अवधारणम् सा सद्भिः श्रद्धा कथिता यया वस्तु-उपलभ्यते ।

शास्त्रस्य–गुरुवाक्यस्य – of what the scriptures and the Masters instruct;

सत्यबुद्धि-अवधारणम् – acceptance by firm judgment as true; सा-श्रद्धा-कथिता – is called faith;

सद्भिः - by sages; यया – by means of which; वस्तु-उपलभ्यते – the Reality is perceived.

Acceptance by firm judgment as true of what the scriptures and the Masters instruct is called by sages faith by means of which the Reality is perceived.

सर्वदा स्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वथा।

तत्समाधानमित्युक्तं न तु चित्तस्य लालनम्॥ २६ ॥

सर्वदा शुद्धे ब्रह्मणिबुद्धेः सर्वदा स्थापनं तत् समाधानम् इति उक्तं न तु चित्तस्य लालनम् ।

सर्वदा – the constant; शुद्ध-ब्रह्मणि - on the ever-pure Brahman; बुद्धेः-सर्वथा-स्थापनं - concentration of the intellect by all means; तत्-समाधानम्-इति-उक्तं - is that- what is called self-settledness न – not; तु – but; चित्तस्य-लालनम् – the mere indulgence of thought (in curiosity).

Not the mere indulgence of thought (in curiosity) but the constant concentration of the intellect by all means on the ever-pure Brahman is that–what is called self-settled-ness!

अहंकारादिदेहान्तान् बन्धानज्ञानकल्पितान्।

स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता ॥ २७ ॥

अहंकारादिदेहान्तान् अज्ञानकल्पितान् बन्धान् स्व-स्वरूप-अवबोधेन मोक्तुम् इच्छा मुमुक्षुता ।

अहंकार-आदि-देह-अन्तान् – that of egoism to that of the body; अज्ञान-कल्पितान् – superimposed by ignorance; बन्धान् – from all bondages; स्व-स्वरूप-अवबोधेन – by realizing one’s true nature; मोक्तुम्-इच्छा – the desire to free oneself; मुमुक्षुता – *Mumuksuta* or yearning for freedom.

*Mumuksuta* or yearning for freedom is the desire to free oneself by realizing one’s true nature from all bondages that of egoism to that of the body superimposed by ignorance.

मन्दमध्यमरूपापि वैराग्येण शमादिना।

प्रसादेन गुरोः सेयं प्रवृद्धा सूयते फलम्॥ २८ ॥

सा इयं मुमुक्षुता मन्दमध्यमरूपा-अपि वैराग्येण शमादिना गुरोः प्रसादेन प्रवृद्धा फलम् सूयते ।

सा-इयं – this; मुमुक्षुता – yearning for freedom; मन्द-मध्यम-रूपा-अपि – even though torpid or mediocre; वैराग्येण-शमादिना – by means of renunciation–calmness and so on; गुरोः-प्रसादेन – through the grace of the Guru; प्रवृद्धा – being developed; फलम्-सूयते – may bear fruit.

Even though torpid or mediocre–this yearning for freedom through the grace of the Guru may bear fruit being developed by means of renunciation–calmness and so on.

वैराग्यं च मुमुक्षुत्वं तीव्रं यस्य तु विद्यते।

तस्मिन्नेवार्थवन्तः स्युः फलवन्तः शमादयः॥ २९ ॥

यस्य वैराग्यं च मुमुक्षुत्वं तु तीव्रं विद्यते तस्मिन् एव शमादयः अर्थवन्तः फलवन्तः स्युः ।

यस्य – whose; वैराग्यं – renunciation; च – and; मुमुक्षुत्वं – yearning for freedom; तु – but;

तीव्रं-विद्यते – are intense; तस्मिन् – in his case; एव – verily; शमादयः – calmness and other

practices; अर्थवन्तः – have really their meaning; फलवन्तः-स्युः – bear fruit.

But in his case–verily–whose renunciation and yearning for freedom are intense–calmness and other practices- have really their meaning and bear fruit.

एतयोर्मन्दता यत्र विरक्तत्वमुमुक्षयोः ।

मरौ सलीलवत्तत्र शमादेर्भानमात्रता ॥ ३० ॥

यत्र एतयोः विरक्तत्वमुमुक्षयोः मन्दता त्तत्र मरौ सलीलवत शमादेः भानमात्रता ।

यत्र – where; एतयोः – this; विरक्तत्व-मुमुक्षयोः-मन्दता – renunciation and yearning for freedom are

torpid; त्तत्र – there; मरौ-सलील-वत – like water in a desert; शमादेः – calmness and other

practices; भान-मात्रता – are as mere appearances.

Where (however) this renunciation and yearning for freedom are torpid–there calmness and other practices–are as mere appearances–like water in a desert.

मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी ।

स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते

स्वात्मतत्त्वानुसन्धानं भक्तिरित्यपरे जगुः ॥ ३१ ॥

मोक्षकारणसामग्र्यां भक्तिः एव गरीयसी स्व-स्वरूप-अनुसन्धानं भक्तिः इति अभिधीयते ।

स्व-आत्मतत्त्व-अनुसन्धानं भक्तिः इति अपरे जगुः ।

मोक्ष-कारण-सामग्र्यां – among things conducive to liberation; भक्तिः-एव – devotion alone;

गरीयसी – holds the supreme place; स्व-स्वरूप-अनुसन्धानं – the seeking after one’s real nature;

भक्तिः-इति-अभिधीयते – is designated as devotion; अपरे – others; स्व-आत्मतत्त्व-अनुसन्धानं-भक्तिः –

the inquiry into the truth of one’s own Self is devotion; इति-जगुः – maintain that.

Among things conducive to liberation devotion alone holds the supreme place. The seeking after one’s real nature– is designated as devotion. Others maintain that the inquiry into the truth of one’s own Self is devotion.

उक्तसाधनसंपन्नस्तत्त्वजिज्ञासुरात्मनः ।

उपसीदेद्गुरुं प्राज्ञं यस्माद्बन्धविमोक्षणम् ॥ ३२ ॥

उक्तसाधनसंपन्नः आत्मनः तत्त्वजिज्ञासुः प्राज्ञं गुरुं उपसीदेत् यस्मात् बन्धविमोक्षणम् भवति ।

उक्त-साधन-संपन्नः – who is possessed of the above-mentioned means of attainment;

आत्मनः – of the Atman; तत्त्व-जिज्ञासुः –the inquirer about the truth;

प्राज्ञ- गुरुं-उपसीदेत् – should approach a wise preceptor;

यस्मात्-बन्ध-विमोक्षणम्-भवति– who confers emancipation from bondage.

The inquirer about the truth of the Atman who is possessed of the above-mentioned means of attainment should approach a wise preceptor who confers emancipation from bondage.

श्रोत्रियोऽवृजिनोऽकामहतो यो ब्रह्मवित्तमः।

ब्रह्मण्युपरतः शान्तो निरिन्धन इवानलः।

अहेतुकदयासिन्धुर्बन्धुरानमतां सताम्॥ ३३॥

यः श्रोत्रियः अवृजिनः अकामहतः ब्रह्मवित्तमः ब्रह्मणि उपरतः निरिन्धन अनलः इव शान्तः ।

अहेतुकदयासिन्धुः आ-नमतां सताम् बन्धुः ।

यः – who is; श्रोत्रियः – versed in the Vedas; अवृजिनः – sinless; अकामहतः – unsmitten by desire;

ब्रह्मवित्तमः – a knower of Brahman per excellence; ब्रह्मणि-उपरतः – who has withdrawn himself into Brahman; निरिन्धन-अनलः-इव – like fire that has consumed its fuel; शान्तः – who is calm;

अहेतुक-दया-सिन्धुः – who is a boundless reservoir of mercy that knows no reason;

आ-नमतां-सताम्-बन्धुः – and a friend of all good people who prostrate themselves before him.

Who is versed in the Vedas–sinless–unsmitten by desire–and – a knower of Brahman per excellence who has withdrawn himself into Brahman; who is calm like fire that has consumed its fuel–who is a boundless reservoir of mercy that knows no reason–and a friend of all good people who prostrate themselves before him.

तमाराध्य गुरुं भक्त्या प्रह्वप्रश्रयसेवनैः।

प्रसन्नं तमनुप्राप्य पृच्छेज्ज्ञातव्यमात्मनः॥ ३४॥

तम् गुरुं भक्त्या आराध्य प्रह्व-प्रश्रय-सेवनैः प्रसन्नं तम् अनुप्राप्य आत्मनः ज्ञातव्यम् पृच्छेत् ।

तम् – that; गुरुं – Guru/preceptor; भक्त्या – with devotion; आराध्य – worshiping;

प्रह्व-प्रश्रय-सेवनैः – with prostration–humility and service; प्रसन्नं – when he is pleased; तम् – him;

अनु-प्राप्य – approaching; आत्मनः– about the Atman; ज्ञातव्यम् – what one has got to know;

पृच्छेत् – one should ask him.

Worshiping that Guru/preceptor with devotion–and approaching him–when he is pleased with prostration–humility and service–one should ask him what one has got to know about the Atman.

स्वामिन्नमस्ते नतलोकबन्धो

कारुण्यसिन्धो पतितं भवाब्धौ।

मामुद्धरात्मीयकटाक्षदृष्ट्या

ऋज्व्यातिकारुण्यसुधाभिवृष्ट्या॥ ३५॥

स्वामिन् नमस्ते नतलोकबन्धो कारुण्यसिन्धो ते नमः भवाब्धौ पतितं माम् अतिकारुण्यसुधाभिवृष्ट्या ऋज्व्या आत्मीयकटाक्षदृष्ट्या उद्धर ।

स्वामिन् – O Master!; नत-लोक-बन्धो – O friend of those who bow down to you; कारुण्य-सिन्धो – O the ocean of mercy; ते-नमः – I bow down to you;.

भवाब्धौ – into the sea of the world; पतितं-माम् – fallen as I am;

अति-कारुण्य-सुधाभि-वृष्ट्या – which sheds nectar-like grace supreme;

ऋज्व्या-आत्मीय-कटाक्ष -दृष्ट्या – with favourable glance of your eyes; उद्धर – save me;

O Master! O friend of those who bow down to you! I bow down to you; O the ocean of mercy! Save me–fallen as I am into the sea of the world with favourable glance of your eyes which sheds nectar-like grace supreme.

दुर्वारसंसारदवाग्नितप्तं

दोधूयमानं दुरदृष्टवातैः ।

भीतं प्रपन्नं परिपाहि मृत्योः

शरण्यमन्यद्यदहं न जाने ॥ ३६ ॥

दुर्वार संसारदवाग्नितप्तं दुरदृष्टवातैः दोधूयमानं मृत्योः भीतं प्रपन्नं परिपाहि

यत् अहं अन्यत् शरण्यम् न जाने ।

दुर्वार – unquenchable; संसार-दवाग्नि-तप्तं – afflicted by the fire of this worldly– forest; दुर-दृष्ट-वातैः – by the winds of an untoward lot; दोधूय-मानं – shaken violently by;

मृत्योः-भीतं – afraid of death; प्रपन्नं – who have taken refuge in you; परिपाहि – save;

यत् – for; अहं – I; अन्यत् – any other; शरण्यम् – refuge; न जाने – do not know.

I am afflicted by the unquenchable fire of this worldly-forest–shaken violently by the winds of an untoward lot and afraid of death–afraid of death and have taken refuge in you–kindly save me for I do not know any other refuge.

शान्ता महान्तो निवसन्ति सन्तो

वसन्तवल्लोकहितं चरन्तः ।

तीर्णाः स्वयं भीमभवार्णवं जना-

नहेतुनान्यानपि तारयन्तः ॥ ३७ ॥

शान्ताः महान्तः सन्तः वसन्तवत् लोकहितं चरन्तः । स्वयं भीमभवार्णवं तीर्णाः अन्यान्

जनान् अपि अहेतुना तारयन्तः निवसन्ति ।

शान्ताः – calm; महान्तः – great– souls; सन्तः – saints; वसन्तवत् – as does the spring; लोक-हितं – good to the world; चरन्तः – keeps on; स्वयं – themselves;

भीम-भवार्णवं – mighty ocean of relative existence; तीर्णाः – having crossed;

अन्यान् – other;जनान् – peoples; अपि – also; अहेतुना – wiyou t any motive;

तारयन्तः – helps to cross; निवसन्ति – lives

There always lives great-souls calm & saints in this world–who themselves having crossed this mighty ocean of relative existence helps other peoples also to cross the same wiyou t any motive and keeps on doing good to the world as does the spring.

अयं स्वभावः स्वत एव यत्पर-

श्रमापनोदप्रवणं महात्मनाम् ।

सुधांशुरेष स्वयमर्ककर्कश-

प्रभाभितप्तामवति क्षितिं किल ॥ ३८ ॥

महात्मनाम् यत् परश्रम-अपनोदप्रवणं अयं स्वतः एव स्वभावः । अर्क-कर्कश प्रभाभितप्ताम्

क्षितिं किल एषः सुधांशुः स्वयम् अवति ।

महात्मनाम् – of great-souls; यत् – that; परश्रम – other's troubles;

अपनोद-प्रवणं – inclined to remove; अयं-स्वभावः – inherent nature;

स्वतः-एव – on their own accord; एषः – this; सुधांशुः - moon; स्वयम्-किल – voluntarily;

अर्क-कर्कश-प्रभाभि-तप्ताम् –purched by the flaming rays of the sun;

क्षितिं – earth; अवति –saves.

This is the inherent nature of great-souls that they always inclined on their own accord to remove other's troubles; just as this moon as everybody knows voluntarily saves earth parched by the flaming rays of the sun.

ब्रह्मानन्दरसानुभूतिकलितैः पूतैः सुशीतैर्युतैः

युष्मद्वाक्कलशोज्झितैः श्रुतिसुखैर्वाक्यामृतैः सेचय ।

संतप्तं भवतापदावदहनज्वालाभिरेनं प्रभो

धन्यास्ते भवदीक्षणक्षणगतेः पात्रीकृताः स्वीकृताः ॥ ३९ ॥

हे प्रभो भवतापदावदहनज्वालाभिः संतप्त एनं ब्रह्मानन्द रसानुभूति कलितैः पूतैः सुशीतैः युतैः

युष्मत् वाक्कलश उज्झितैः श्रुतिसुखैः वाक्यामृतैः सेचय । धन्याः ते भवत् ईक्षण क्षणगतेः पात्रीकृताः स्वीकृताः ।

हे-प्रभो – O Lord; भव-ताप-दाव-दहन-ज्वालाभिः – by the tongues of a worldly forest-fire; संतप्त – tormented; एनं – this me; ब्रह्मानन्द-रसानुभूति-कलितैः – sweetened by the enjoyment of the elixir-like bliss of Brahman; पूतैः – pure; सुशीतैः – cooling to a degree; युतैः – this me; युष्मत्-वाक्कलश-उज्झितैः – issuing in streams from a pitcher in the form of thy lips; श्रुतिसुखैः – delightful to the ear; वाक्यामृतैः – with thy nectar– like speech; सेचय –you sprinkle; धन्याः-ते – blessed are those; भवत्-ईक्षण-क्षणगतेः – even a passing glance of thy eye sight; पात्रीकृताः – as thine own; स्वीकृताः – accepted

O Lord with thy nectar-like speech sweetened by the enjoyment of the elixir-like bliss of Brahman pure endowed with cooling to a degree issuing in streams from a pitcher in the form of your lips and delightful to the ear – do you sprinkle- this me who am tormented by the tongues of a worldly forest-fire. Blessed are those on whom falls even a passing glance of your eye sight accepting them as your own.

कथं तरेयं भवसिन्धुमेतं

का वा गतिर्मे कतमोऽस्त्युपायः ।

जाने न किञ्चित्कृपयाऽव मां प्रभो

संसारदुःखक्षतिमातनुष्व ॥ ४० ॥

एतं भवसिन्धुं कथं तरेय ? का मे गतिः (भविष्यति) ? वा कतमः उपायः अस्ति ? (अहम्) न किञ्चित् जाने प्रभो !

कृपया मां अवसंसारदुःखक्षतिम् अतनुष्व ।

एतं - this; भव-सिन्धुं – ocean of phenomenal existence; कथं – how; तरेय – to cross;

का-वा – what is to be; मे – my; गतिः – fate; (भविष्यति) ?

कतमः-उपायः – which of the means; अस्ति – should I adopt;

(अहम्)-न-जान-किञ्चित् – I know nothing; प्रभो – O Lord;

कृपया-मां-अव – condescend to save me;

संसार-दुःख-क्षतिम् – how to put an end to the misery of this relative existence;

आतनुष्व –at length.

How to cross this ocean of phenomenal existence? What is to be my fate? Which of the means should I adopt? – As to these I know nothing. Condescend to save me O Lord and describe at length how to put an end to the misery of this relative existence.

तथा वदन्तं शरणागतं स्वं

संसारदावानलतापतप्तम् ।

निरीक्ष्य कारुण्यरसार्द्रदृष्ट्या

दद्यादभीतिं सहसा महात्मा ॥ ४१ ॥

तथा संसारदावानल-तापतप्तम् वदन्तं स्वं शरणागत (शिष्यं) कारुण्यरसार्द्रदृष्ट्या निरीक्ष्य महात्मा सहसा अभीतिं दद्यात् ।

तथा – as; वदन्तं-(शिष्यं) – thus speaks; संसार-दावानल-तापतप्तम् – tormented by the affliction of the world-which is like a forest of fire; स्वं-शरणागतं – seeking his protection; कारुण्य-रसार्द्र-दृष्ट्या – with a glance soften with compassion; निरीक्ष्य – by observing; महात्मा – the saint; सहसा – spontaneously; अभीतिं-दद्यात् –bids him to give up all fear.

As the disciple tormented by the affliction of the world-which is like a forest of fire speaks thus seeking his protection–by observing with a glance soften with compassion the saint spontaneously bids him to give up all fear.

विद्वान् स तस्मा उपसत्तिमीयुषे

मुमुक्षवे साधु यथोक्तकारिणे ।

प्रशान्तचित्ताय शमान्विताय

तत्त्वोपदेशं कृपयैव कुर्यात् ॥ ४२ ॥

तस्मै प्रशान्तचित्ताय शमान्विताय साधु-यथोक्तकारिणे ईयुषे मुमुक्षवे सः विद्वान् उपसत्तिं कृपया एव तत्त्व-उपदेश कुर्यात् ।

तस्मै – to him; उपसत्तिं-ईयुषे – who has sought his protection;

प्रशान्त-चित्ताय – who is of a serene mind; शमान्विताय – endowed with calmness;

साधु-यथोक्त-कारिणे-मुमुक्षवे – who duly obeys the injunctions of the scriptures thirsting for liberation; सः – that; विद्वान् – sage; कृपया-एव – out of sheer grace;

तत्त्व-उपदेश-कुर्यात् – proceeds to inculcate the truth.

To him who has sought his protection–thirsting for liberation–who duly obeys the injunctions of the scriptures–who is of a serene mind–and endowed with calmness; that sage proceeds to inculcate the truth out of sheer grace,

मा भैष्ट विद्वंस्तव नास्त्यपायः

संसारसिन्धोस्तरणेऽस्त्युपायः ।

येनैव याता यतयोऽस्य पारं

तमेव मार्गं तव निर्दिशामि ॥ ४३ ॥

हे विद्वन् मा भैष्ट तव अपायः न अस्ति संसारसिन्धोः तरणे उपायः अस्ति येन एव यतयः अस्य पारं याताः तम् एव मार्गं तव निर्दिशामि ।

हे-विद्वन् – O learned one; मा-भैष्ट – fear not; तव – for you ; अपायः - death; न – no;

अस्ति – there is; संसार-सिन्धोः – this sea of relative existence; तरणे – of crossing;

उपायः-अस्ति- there is a means; येन-एव –by which; यतयः -sages;

अस्य-पारं-याताः – have gone beyond it; तम्-एव-मार्गं – that very way;

तव-निर्दिशामि – I shall inculcate to you .

Fear not–O learned one there is no death for you–there is a means of crossing this sea of relative existence–that very way by which sages have gone beyond it–I shall inculcate to you.

अस्त्युपायो महान्कश्चित्संसारभयनाशनः ।

तेन तीर्त्वा भवाम्भोधिं परमानन्दमाप्स्यसि ॥ ४४ ॥

संसारभयनाशनः कश्चित् महान् उपायाअस्ति तेन भव अम्भोधिं तीर्त्वा परमानन्दं आप्स्यसि ।

संसार-भय-नाशनः – to put an end to the fear of relative existence; कश्चित् – a;

महान् – sovereign; उपायः - means; अस्ति – there is; तेन – through that;

भव-अम्भोधिं – sea of the world; तीर्त्वा –by crossing; परमानन्दं – the supreme bliss; आप्स्यसि – you will attain.

There is a sovereign means to put an end to the fear of relative existence through that you will attain the supreme bliss by crossing sea of the world.

वेदान्तार्थविचारेण जायते ज्ञानमुत्तमम् ।

तेनात्यन्तिकसंसारदुःखनाशो भवत्यनु ॥ ४५ ॥

वेदान्तार्थ विचारेण उत्तमम् ज्ञानम् जायते अनु तेन आत्यन्तिक संसार दुःखनाशः भवति ।

वेदान्तार्थ-विचारेण – reasoning on the meaning of Vedanta; उत्तमम् – the highest;

ज्ञानम् – knowledge; जायते – leads to;

अनु-तेन-भवति – which is immediately followed by;

आत्यन्तिक-संसार-दुःख-नाशः – total annihilation of the misery born of relative existence.

Reasoning on the meaning of Vedanta leads to the highest knowledge which is immediately followed by total annihilation of the misery born of relative existence.

श्रद्धाभक्तिध्यानयोगान्मुमुक्षोः

मुक्तेर्हेतून्वक्ति साक्षाच्छ्रुतेर्गीः ।

यो वा एतेष्वेव तिष्ठत्यमुष्य

मोक्षोऽविद्याकल्पिताद्देहबन्धात् ॥ ४६ ॥

श्रद्धा भक्ति ध्यानयोगान् मुमुक्षोः मुक्तेः साक्षात् हेतून् श्रुतेः गीः वक्ति । यः वै एतेषु एव तिष्ठति अमुष्य

अविद्याकल्पितात् देहबन्धात् मोक्षः (भवति) ।

श्रद्धा-भक्ति-ध्यान-योगान् – faith–devotion & profound meditation; मुमुक्षोः-मुक्तेः – of liberation in the case of it's seeker; साक्षात्-हेतून् – direct means; श्रुतेः-गीः-वक्ति – mentioned by the sentences of scriptures; यः-वै – whoever; एतेषु-एव-तिष्ठति –abides in these only; अमुष्य those; अविद्या-कल्पितात् – which is conjuring of ignorance; देह-बन्धात् – from the bondage of the body; मोक्षः-(भवति) – gets liberation.

Faith–devotion & profound meditation–these are mentioned by the *sentences of* scriptures as direct means of liberation in the case of *it's* seeker; *those* whoever abides in these only gets liberation from the bondage of the body which is conjuring of ignorance.

अज्ञानयोगात्परमात्मनस्तव

ह्यनात्मबन्धस्तत एव संसृतिः ।

तयोर्विवेकोदितबोधवन्हिः

अज्ञानकार्यं प्रदहेत्समूलम् ॥ ४७ ॥

परमात्मनः हि तव अज्ञानयोगात् अनात्मबन्धः तत एव संसृतिः । तयोः विवेकोदित बोधवन्हिः

समूलम् अज्ञानकार्यं प्रदहेत् ।

परमात्मनः-हि-तव – you who are verily the Supreme Self;

अज्ञान-योगात् – through the touch of ignorance;

अनात्म-बन्धः – are finding yourself under the bondage of non-Self;

तत-एव – whence alone; संसृतिः – proceeds the round of birth and death;

तयोः-विवेकोदित – kindled by the discrimination between these two;

बोधवन्हिः – the fire of knowledge; समूलम् – together with their root;

अज्ञानकार्यं – the effects of ignorance; प्रदहेत् – burns up.

It is through the touch of ignorance that you who are verily the Supreme Self are finding yourself under the bondage of non-Self–whence alone proceeds the round of birth and death. The fire of knowledge kindled by the discrimination between these two–burns up the effects of ignorance together with their root.

शिष्य उवाच ।

कृपया श्रूयतां स्वामिन्प्रश्नोऽयं क्रियते मया ।

यदुत्तरमहं श्रुत्वा कृतार्थः स्यां भवन्मुखात् ॥ ४८ ॥

हे स्वामिन् मया अयं प्रश्नः क्रियते कृपया श्रूयतां भवन् मुखात् यत् उत्तरं श्रुत्वा अहं कृतार्थः स्याम् ।

शिष्य-उवाच – the disciple said; हे-स्वामिन् – O Master; मया-अयं-प्रश्नः-क्रियते – the question I am putting (to you ); कृपया-श्रूयतां – condescend to listen; भवन्-मुखात् – from your lips; यत्-उत्तरं – a reply to the same; श्रुत्वा – to hear; अहं-कृतार्थः-स्याम् – I shall be gratified.

The disciple said :

Condescend to listen–O Master the question I am putting *(to you).* I shall be gratified to hear a reply to the same from your lips.

को नाम बन्धः कथमेष आगतः

कथं प्रतिष्ठास्य कथं विमोक्षः ।

कोऽसावनात्मा परमः क आत्मा

तयोर्विवेकः कथमेतदुच्यताम् ॥ ४९ ॥

बन्धः नाम कः ? एष कथम् आगतः ? अस्य कथं प्रतिष्ठा ? अस्य कथं विमोक्षः ? अनात्मा कः असौ ? परमः कः आत्मा ? तयोः कथम् विवेकः ? एतद् उच्यताम ।

बन्धः-नाम-कः – What is named as bondage–*forsooth* ? एष-कथम्-आगतः – How has it come *(upon the Self)* ? अस्य-कथ-प्रतिष्ठा – How does it continue to exist? अस्य-कथं-विमोक्षः – How is one freed from it ? अनात्मा-कः-असौ – What is this non-Self ? परमः-कः-आत्मा – What is the Supreme-Self ? तयोः-कथम्-विवेकः – And how can one discriminate between them ?

एतद्-उच्यताम –Do tell me about all these.

What is named as bondage-*forsooth*? How has it come *(upon the Self)*? How does it continue to exist? How is one freed from it? What is this non-Self? What is the Supreme-Self? And how can one discriminate between them? Do tell me about all these.

श्रीगुरुरुवाच ।

धन्योऽसि कृतकृत्योऽसि पावित ते कुलं त्वया ।

यदविद्याबन्धमुक्त्या ब्रह्मीभवितुमिच्छसि ॥ ५० ॥

धन्यः असि कृतकृत्यः असि त्वया ते कुल पावितं यत् अविद्याबन्धमुक्त्या ब्रह्मीभवितुम् इच्छसि ।

श्रीगुरुः-उवाच – The Guru replied; धन्यः-असि – Blessed are you ! कृतकृत्यः-असि-त्वया-ते-कुल-पावितं – You have achieved thy life's end–and hast sanctified thy family; यत् – that; अविद्या-बन्ध-मुक्त्या – by getting free from the bondage of ignorance; ब्रह्मी-भवितुम्-इच्छसि – you long to attain Brahman-hood.

The Guru replied :
Blessed are you! You have achieved thy life's end–and hast sanctified thy family–that you long to attain Brahman-hood by getting free from the bondage of ignorance!

ऋणमोचनकर्तारः पितुः सन्ति सुतादयः।

बन्धमोचनकर्ता तु स्वस्मादन्यो न कश्चन॥ ५१॥

पितुः ऋणमोचन-कर्तारः सुतादयः सन्ति तु (संसार) बन्धमोचन-कर्ता स्वस्मात् अन्यः न कश्चन अस्ति ।

पितुः – a father has; ऋण-मोचन-कर्तारः-सुतादयः-सन्ति – got his sons and others to free him from his debts; तु – but; (संसार)-बन्ध-मोचन-कर्ता-स्वस्मात्-अन्यः-न-कश्चन-अस्ति – he has got none but himself to remove his bondage.

A father has got his sons and others to free him from his debts–but he has got none but himself to remove his bondage.

मस्तकन्यस्तभारादेर्दुःखमन्यैर्निवार्यते।

क्षुधादिकृतदुःखं तु विना स्वेन न केनचित्॥ ५२॥

मस्तक-न्यस्त-भारादेः दुःखम् अन्यैः निवार्यते क्षुधादि कृतदुःखं तु विना स्वेन न केनचित् (निवार्यते)।

मस्तक-न्यस्त-भारादेः – that caused by a load on the head; दुःखम् – trouble such as ;

अन्यैः – by others; निवार्यते – can be removed;

क्षुधादि-कृत-दुःखं – the pain which is caused by hunger and the like; तु – but;

विनास्वेन-न-केनचित् – none nut one's own self;

Trouble such as that caused by a load on the head can be removed by others–but none nut one's own self can put a stop to the pain which is caused by hunger and the like.

पथ्यमौषधसेवा च क्रियते येन रोगिणा।

आरोग्यसिद्धिर्दृष्टाऽस्य नान्यानुष्ठितकर्मणा॥ ५३॥

येन रोगिणा पथ्यम् औषधसेवा च क्रियते अस्य आरोग्यसिद्धिः दृष्टा–अन्य अनुष्ठित कर्मणा न ।

येन-रोगिणा – the patient who himself; पथ्यम् – diet च – and औषध-सेवा - medicine; क्रियते – takes; अस्य – is alone; आरोग्य-सिद्धिः – to recover completely; दृष्टा – seen;

अन्य-अनुष्ठित-कर्मणा-न – not through work done by others.

The patient who takes diet and medicine himself (properly) is alone seen to recover completely – not through such work (of taking diet & medicine etc.) done by others.

वस्तुस्वरूपं स्फुटबोधचक्षुषा

स्वेनैव वेद्यं न तु पण्डितेन।

चन्द्रस्वरूपं निजचक्षुषैव

ज्ञातव्यमन्यैरवगम्यते किम्॥ ५४॥

वस्तुस्वरूपं स्वेन एव स्फुटबोध-चक्षुषा वेद्यं न तु पण्डितेन।चन्द्रस्वरूपं निजचक्षुषा एव ज्ञातव्यम् अन्यैः किम अवगम्यते?

वस्तुस्वरूपं – the true nature of things; स्वेन-एव – personally; स्फुट-बोध-चक्षुषा – through the eye of clear illumination; वेद्यं – is to be known, न-तु-पण्डितेन – and not by a sage; चन्द्र-स्वरूपं – what the moon is; निज-चक्षुषा-एव – with one's own eyes; ज्ञातव्यम् –to be known; किम-अन्यैः अवगम्यते? – can others make him know it?

The true nature of things is to be known personally through the vision of clear illumination (achieved by one's own efforts)–and not by a sage (or Guru who can only guide); what the moon is to be known with one's own eyes; can others eyes make him know it?

अविद्याकामकर्मादिपाशबन्धं विमोचितुम् ।

कः शक्नुयाद्विनात्मानं कल्पकोटिशतैरपि ॥ ५५ ॥

आत्मानं विना अविद्या-काम-कर्मादिपाशबन्धं विमोचितुम् कल्पकोटिशतैः अपि कः शक्नुयात् ?

आत्मानं-विना-कः – who but one's own self; विमोचितुम-शक्नुयात्– can get rid of; अविद्या-काम-कर्मादि-पाश-बन्धं – the bondage caused by the fetters of ignorance–action and the like; कल्प-कोटि-शतैः-अपि – even in a hundred crore of cycles.

Who but one's own self can get rid of the bondage caused by the fetters of ignorance–action and the like even in a hundred crore of cycles?

न योगेन न सांख्येन कर्मणा नो न विद्यया ।

ब्रह्मात्मैकत्वबोधेन मोक्षः सिध्यति नान्यथा ॥ ५६ ॥

न योगेन न सांख्येन कर्मणा नो न विद्यया ब्रह्मात्मैकत्वबोधेन मोक्षः सिध्यति नान्यथा ।

न-योगेन-न-सांख्येन-कर्मणा-नो-न-विद्यया – neither by Yoga–nor by Sankhya–nor by work–nor by learning; ब्रह्मात्मैकत्व-बोधेन – but by the realization of one's identity with Brahman; मोक्षः-सिध्यति – liberation is possible; नान्यथा – and by no other means.

Neither by Yoga–nor by Sankhya–nor by work–nor by learning; but (only) by the realization of one's identity with Brahman is liberation possible and by no other means.

वीणाया रूपसौन्दर्यं तन्त्रीवादनसौष्ठवम् ।

प्रजारञ्जनमात्रं तन्न साम्राज्याय कल्पते ॥ ५७ ॥

वीणाया रूपसौन्दर्यं तन्त्रीवादन-सौष्ठवम् (एतत् ) प्रजारञ्जनमात्रं तत् न (तु) साम्राज्याय कल्पते ।

वीणाया-रूप-सौन्दर्यं – the beauty of a guitar's form; तन्त्री-वादन-सौष्ठवम् – the skill playing on its chords; प्रजा-रञ्जन-मात्रं – serves merely to please a few persons; तत्-न- (तु) – they do not; साम्राज्याय-कल्पते – suffice to confer sovereignty.

The beauty of a guitar's form and the skill playing on its chords serves merely to please a few persons they do not suffice to confer sovereignty.

वाग्वैखरी शब्दझरी शास्त्रव्याख्यानकौशलम् ।

वैदुष्यं विदुषां तद्वद्भुक्तये न तु मुक्तये ॥ ५८ ॥

वैखरी वाग् शब्दझरी शास्त्रव्याख्यान कौशलम् तद्वत् वैदुष्यं विदुषां भुक्तये तु मुक्तये न ।

वैखरी – loud; वाग् - speech; शब्द-झरी – a shower of words; शास्त्र-व्याख्यान-कौशलम् – the skill in expounding the scriptures; तद्वत् – and likewise; वैदुष्यं - erudiction; विदुषां - to the scholars; भुक्तये – for enjoyment; तु – but; मुक्तये-न – are no good for liberation.

Loud speech consisting of a shower of words–the skill in expounding the scriptures and likewise erudiction – these merely bring on a little personal enjoyment to the scholars–but are no good for liberation.

अविज्ञाते परे तत्त्वे शास्त्राधीतिस्तु निष्फला ।

विज्ञातेऽपि परे तत्त्वे शास्त्राधीतिस्तु निष्फला ॥ ५९ ॥

परे तत्त्वे अविज्ञाते शास्त्राधीतिः तु निष्फला– परे तत्त्वे विज्ञाते अपि शास्त्राधीतिः तु निष्फला ।

परे-तत्त्व-अविज्ञाते – so long as the higher Truth is unknown; शास्त्राधीतिः – the study of the scriptures; तु – verily; निष्फला – is fruitless; परे-तत्त्वे-विज्ञाते-अपि – even when the highest Truth has already been known; शास्त्राधीतिः – the study of the scriptures; तु-निष्फला – is equally fruitless.

The study of the scriptures is verily fruitless so long as the higher Truth is unknown–and it is equally fruitless even when the highest Truth has already been known.

शब्दजालं महारण्यं चित्तभ्रमणकारणम् ।

अतः प्रयत्नाज्ज्ञातव्यं तत्त्वज्ञैस्तत्त्वमात्मनः ॥ ६० ॥

शब्दजालं महारण्यं चित्तभ्रमणकारणम् अतः तत्त्वज्ञैः आत्मनः तत्त्वम् प्रयत्नात् ज्ञातव्यं ।

शब्द-जालं-महारण्यं - the csriptures consisting a network of words are like a dence forest; चित्त-भ्रमण-कारणम् – which merely causes the mind to ramble; अतः – hence; तत्त्वज्ञैः – men of wisdom; आत्मनः-तत्त्वम् – the true nature of the Self; प्रयत्नात्-ज्ञातव्यं – should earnestly set about to know.

The scriptures consisting a network of words are like a dense forest which merely causes the mind to ramble; hence men of wisdom should earnestly set about to know the true nature of the Self.

अज्ञानसर्पदष्टस्य ब्रह्मज्ञानौषधं विना ।

किमु वेदैश्च शास्त्रैश्च किमु मन्त्रैः किमौषधैः ॥ ६१ ॥

अज्ञान-सर्पदष्टस्य ब्रह्मज्ञान-औषधं विना वेदैः च शास्त्रैः च किमु च मन्त्रैः किमु औषधैः किम् ?

अज्ञान-सर्पदष्टस्य – for one who has been bitten by the serpent of ignorance; ब्रह्म-ज्ञान-औषधं विना – except the knowledge of Brahman (which is the only remedy); वेदैः-च-शास्त्रैः-च--किमु – of what avail are the Vedas and other scriptures; किमु-मन्त्रैः-च-औषधैः-किम् – mantras and medicines to such one.

For one who has been bitten by the serpent of ignorance except the knowledge of Brahman (which is the only remedy) of what avail are the Vedas and other scriptures or mantras and medicines to such one?

न गच्छति विना पानं व्याधिरौषधशब्दतः ।

विनाऽपरोक्षानुभवं ब्रह्मशब्दैर्न मुच्यते ॥ ६२ ॥

पानं विना औषधशब्दतः व्याधिः न गच्छति (तद्वत्) अपरोक्षानुभवं विना ब्रह्मशब्दैः न मुच्यते ।

पानं-विना – wiyou t taking it; औषध-शब्दतः – if one simply utters name of medicines;

व्याधिः-न-गच्छति – a disease does not leave off; (तद्वत्) – (similarly);

अपरोक्षानुभवं-विना – wiyou t direct realization;

ब्रह्मशब्दैः - by the mere utterance of the word Brahman; न-मुच्यते – one can not be liberated.

A disease does not leave off if one simply utters name of medicines wiyout taking it (similarly) wiyou t direct realization one can not be liberated by the mere utterance of the word Brahman.

अकृत्वा दृश्यविलयमज्ञात्वा तत्त्वमात्मनः।

ब्रह्मशब्दैः कुतो मुक्तिरुक्तिमात्रफलैर्नृणाम्॥ ६३॥

दृश्यविलयम् अकृत्वा आत्मनः तत्त्वम् अज्ञात्वा उक्तिमात्र-फलैः ब्रह्मशब्दैः नृणाम् मुक्तिः कुतो ।

दृश्यविलयम्-अकृत्वा – without causing the objective universe to vanish;

आत्मनः-तत्त्वम्-अज्ञात्वा – without knowing the truth of the Self; उक्तिमात्र-फलैः-ब्रह्मशब्दैः – by the mere utterance of the word Brahman which is merely an effort of speech; नृणाम्-मुक्तिः-कुतो – how is one to achieve liberation;

Without causing the objective universe to vanish–without knowing the truth of the Self how is one to achieve liberation by the mere utterance of the word Brahman which is merely an effort of speech.

अकृत्वा शत्रुसंहारमगत्वाखिलभूश्रियम्।

राजाहमिति शब्दान्नो राजा भवितुमर्हति॥ ६४॥

अकृत्वा शत्रुसंहारम् अखिलभूश्रियम् अगत्वा अहम् राजा इति शब्दात् न राजा भवितुमर्हति ।

अकृत्वा-शत्रुसंहारम् – without killing one's enemies; अखिल-भूश्रियम्-अगत्वा – until possessing oneself of the splendour of the entire surrounding region; अहम्-राजा-इति-शब्दात् – by merely saying–'Iam an emperor'; न-राजा-भवितुमर्हति – one cannot claim to be an emperor.

Without killing one's enemies or until possessing oneself of the splendour of the entire surrounding region one cannot claim to be an emperor by merely saying–'I am an emperor'.

आप्तोक्तिं खननं तथोपरिशिलाद्युत्कर्षणं स्वीकृतिं

निक्षेपः समपेक्षते नहि बहिः शब्दैस्तु निर्गच्छति।

तद्वद्ब्रह्मविदोपदेशमननध्यानादिभिर्लभ्यते

मायाकार्यतिरोहितं स्वममलं तत्त्वं न दुर्युक्तिभिः॥ ६५॥

निक्षेपः आप्तोक्तिं खननं तथा उपरि शिलाद्युत्कर्षणं स्वीकृतिं समपेक्षते तु शब्दैः बहिः नहि निर्गच्छति तद्वद्

मायाकार्य-तिरोहितं स्वम् अमलं तत्त्वं ब्रह्मविद्-उपदेश-मनन-ध्यानादिभिः लभ्यते न दुर्युक्तिभिः।

निक्षेपः – a treasure hidden underground; आप्तोक्तिं – competent instruction; खननं – excavation; तथा – and; उपरि-शिलाद्युत्कर्षणं – the removal of stones and other such things lying above it;

स्वीकृतिं – grasping; समपेक्षते – requires; तु – but; शब्दैः – by being (merely) called out by name; बहिः-नहि-निर्गच्छति – never comes out; तद्वद् – so; मायाकार्य-तिरोहितं – which is hidden by Maya as its effects; स्वम् अमलं तत्त्वं – the transparent Truth of the Self; ब्रह्मविद्-उपदेश – the instructions of a knower of Brahman; मनन-ध्यानादिभिः – by reflection–meditation and so forth; लभ्यते – is to be attained; न-दुर्युक्तिभिः – but not through perverted arguments.

As a treasure hidden underground requires (for its extraction) competent instruction-excavation - the removal of stones and other such things lying above it and grasping-and it never comes out by being (merely) called out by name-so the transparent Truth of the Self which is hidden by Maya as its effects is to be attained through the instructions of a knower of Brahman-followed by reflection-meditation and so forth but not through perverted arguments.

तस्मात्सर्वप्रयत्नेन भवबन्धविमुक्तये ।

स्वैरेव यत्नः कर्तव्यो रोगादाविव पण्डितैः ॥ ६६ ॥

तस्मात् पण्डितैः भव-बन्ध-विमुक्तये सर्वप्रयत्नेन रोगादौ इव स्वैः एव यत्नः कर्तव्यः ।

तस्मात् - therefore; पण्डितैः – the wise one should; भव-बन्ध-विमुक्तये – to be free from the bondage of repeated births and deaths; सर्व-प्रयत्नेन –by all the meansin their power; रोगादौ-इव – as in the case of disease and like; स्वैः-एव – personally; यत्नः-कर्तव्यः – strive.

Therefore the wise one should-as in the case of disease and like-personally strive by all the means in their power to be free from the bondage of repeated births and deaths.

यस्त्वयाद्य कृतः प्रश्नो वरीयाञ्छास्त्रविन्मतः ।

सूत्रप्रायो निगूढार्थो ज्ञातव्यश्च मुमुक्षुभिः ॥ ६७ ॥

त्वया अद्य यः प्रश्नः कृतः (सः) वरीयान् शास्त्रवित्-मतः–सूत्रप्रायः निगूढार्थः च मुमुक्षुभिः ज्ञातव्यः ।

त्वया – you; अद्य - today; यः-प्रश्नः-(सः) – the question that कृतः – have asked; वरीयान् – is excellent; शास्त्रवित्-मतः – approved by those versed in the scriptures; सूत्रप्रायः – aphoristic; निगूढार्थः – pregnant with meaning; च – and; मुमुक्षुभिः – by the seekers after liberation; ज्ञातव्यः – fit to be known.

The question that you have asked today is excellent-approved by those versed in the scriptures-aphoristic-pregnant with meaning and fit to be known by the seekers after liberation.

श्रृणुष्वावहितो विद्वन्यन्मया समुदीर्यते ।

तदेतच्छ्रवणात्सद्यो भवबन्धाद्विमोक्ष्यसे ॥ ६८ ॥

विद्वन् मया यः समुदीर्यते तत् अवहितः शृणुष्व एतत् श्रवणात् सद्यः भवबन्धात विमोक्ष्यसे ।

विद्वन् – O learned one; मया-यः-समुदीर्यते – to what I am going to say; तत्-अवहितः-श्रृणुष्व – listen attentively; एतत्-श्रवणात् – by listening to it; सद्यः - instantly; भवबन्धात-विमोक्ष्यसे – you will be freed from the bondage of worldliness.

Listen attentively-O learned one-to what I am going to say-by listening to it you will be instantly freed from the bondage of worldliness.

मोक्षस्य हेतुः प्रथमो निगद्यते

वैराग्यमत्यन्तमनित्यवस्तुषु ।

ततः शमश्चापि दमस्तितिक्षा

न्यासः प्रसक्ताखिलकर्मणां भृशम् ॥ ६९॥

अनित्यवस्तुषु अत्यन्तम् वैराग्यम् मोक्षस्य प्रथमः हेतुः निगद्यते ततः शमः च अपि दमः तितिक्षा

प्रसक्ताखिलकर्मणां भृशम् न्यासः (निगद्यते) ।

अनित्यवस्तुषु – to all perishable things; अत्यन्तम्-वैराग्यम् – the extreme aversion; मोक्षस्य-प्रथमः हेतुः-निगद्यते – the first step to liberation is; ततः - then follow; शमः – calmness; च – and; अपि – also; दमः – self control; तितिक्षा – forbearance; प्रसक्ताखिलकर्मणां-भृशम-न्यासः – the utter relinquishment of all work enjoined in the scriptures.

The first step to liberation is the extreme aversion to all perishable things-then follow calmness-self control-forbearance and also the utter relinquishment of all work enjoined in the scriptures.

ततः श्रुतिस्तन्मननं सतत्त्व-

ध्यानं चिरं नित्यनिरन्तरं मुनेः ।

ततोऽविकल्पं परमेत्य विद्वान्

इहैव निर्वाणसुखं समृच्छति ॥ ७० ॥

ततः मुनेः श्रुतिः तत् मननं चिरं नित्यनिरन्तरं सतत्त्वध्यानंततः विद्वान् अविकल्पं परं एत्य इह एव निर्वाणसुखं समृच्छति ।

ततः – then come; मुनेः – for the man of reflection; श्रुतिः – hearing; तत्-मननं – reflection on that; चिरं – long; नित्यनिरन्तरं – constant unbroken; सतत्त्वध्यानं – meditation on the Truth; ततः – after that; विद्वान् – learned seeker; अविकल्पं-परं-एत्य – attains the supreme state in which consciousness of subject and object is dissolved; इह-एव – even in this life; निर्वाणसुखं – the bliss of *nirvana*; समृच्छति – realizes.

Then come hearing–reflection on that and long- constant-unbroken meditation on the Truth for the man of reflection. After that learned seeker attains the supreme state in which consciousness of subject and object is dissolved and realizes the bliss of *nirvana* even in this life.

यद्बोद्धव्यं तवेदानीमात्मानात्मविवेचनम् ।

तदुच्यते मया सम्यक् श्रुत्वात्मन्यवधारय ॥ ७१ ॥

मया तव यत् आत्मानात्मविवेचनम् बोद्धव्यं तत् सम्यक् उच्यते श्रुत्वा आत्मनि अवधारय ।

तव-यत्-बोद्धव्यं – what you ought to know; तत-आत्मानात्मविवेचनम् – the discrimination between the Self and non-Self; मया-सम्यक्-उच्यते – I am going to tell you very clearly; श्रुत्वा-आत्मनि अवधारय – listen to it and comprehend in your mind

I am going to tell you very clearly what you ought to know the discrimination between the Self and non-Self listen to it and comprehend in your mind.

मज्जास्थिमेदःपलरक्तचर्म-

त्वगाह्वयैर्धातुभिरेभिरन्वितम् ।

पादोरुवक्षोभुजपृष्ठमस्तकैः

अङ्गैरुपाङ्गैरुपयुक्तमेतत् ॥ ७२ ॥

मज्जा-अस्थि-मेदः-पल-रक्त-चर्म-त्वक्-आह्वयैः एभिः धातुभिः अन्वितम् पाद-उरु-वक्षो-भुज-पृष्ठ-मस्तकैः

अङ्गैः उपाङ्गैः उपयुक्तम् एतत् ।

मज्जा – marrow; अस्थि – bones; मेदः – fat; पल – flesh; रक्त – blood; चर्म – skin; त्वक् – cuticle; आह्वयैः – called; एभिः – these; धातुभिः – ingredients; अन्वितम् – composed of; पाद– legs; उरु – thighs; वक्षो – the chest; भुज – arms; पृष्ठ – the back; मस्तकैः – the head; अङ्गैः-उपाङ्गैः – limbs and their parts; एतत्-उपयुक्तम् – consisting of the following.

Composed of these seven ingredients viz. marrow-bones-fat-flesh-blood-skin and cuticle; and consisting of the following limbs and their parts-legs-thighs-the chest-arms-the back and the.

अहंममेतिप्रथितं शरीरं

मोहास्पदं स्थूलमितीर्यते बुधैः ।

नभोनभस्वद्दहनाम्बुभूमयः

सूक्ष्माणि भूतानि भवन्ति तानि ॥ ७३ ॥

अहं-ममं-इति मोहास्पदं प्रथितं शरीरं स्थूलम्-इति बुधैः ईर्यतेनभः–नभस्वत्–दहन–अम्बु–भूमयः भूतानि

तानि सूक्ष्माणि भवन्ति ।

अहं-ममं-इति – of ‘I and mine’; मोहास्पदं-प्रथितं - reputed to be the abode of the delusion; शरीरं – this body; स्थूलम्-इति – as the gross body; बुधैः-ईर्यते – is designated by sages; नभः – sky; नभस्वत् – air; दहन – fire; अम्बु,- water; भूमयः – earth;

सूक्ष्माणि-भूतानि-भवन्ति – are subtle elements. *तानि - they*

This body–reputed to be the abode of the delusion of ‘I/me and mine’ is designated by sages as the gross body. The sky-air-fire-water and earth are subtle elements.

परस्परांशैर्मिलितानि भूत्वा

स्थूलानि च स्थूलशरीरहेतवः ।

मात्रास्तदीया विषया भवन्ति

शब्दादयः पञ्च सुखाय भोक्तुः ॥ ७४ ॥

*तानि -* परस्परांशैः मिलितानि भूत्वा स्थूलानि च स्थूल-शरीर-हेतवःतदीया मात्राः भोक्तुः सुखाय शब्दादयः पञ्च

विषया भवन्ति ।

*तानि – they*; परस्परांशैः – with parts of one another; मिलितानि – being united; स्थूलानि-भूत्वा – becoming gross; च – and; स्थूल-शरीर-हेतवः – form the gross body; तदीया-मात्राः – and their subtle essence; भोक्तुः-सुखाय – which conduce to the happiness of the experiencer-the individual

soul; शब्दादयः-पञ्च – the group of five such as sound and alike; विषया-भवन्ति – form sense-objects.

Being united with parts of one another and becoming gross *they* form the gross body. And their subtle essence form sense-objects - the group of five such as sound and alike which conduce to the happiness of the experiencer–the individual soul.

य एषु मूढा विषयेषु बद्धा

रागोरुपाशेन सुदुर्दमेन ।

आयान्ति निर्यान्त्यध ऊर्ध्वमुच्चैः

स्वकर्मदूतेन जवेन नीताः ॥ ७५ ॥

ये मूढा सुदुर्दमेन रागोरुपाशेन एषु विषयेषु बद्धा स्वकर्मदूतेन जवेन नीताः अधः उच्चैः ऊर्ध्वःआयान्ति निर्यान्ति ।

ये-मूढा – those fools; सुदुर्दमेन – by the strong; रागोरुपाशेन – cord of attachment–so very difficult to snap; एषु-विषयेषु – to these sense-objects; बद्धा – who are tied; स्वकर्मदूतेन-जवेन – by the powerful emissary of their past actions; नीताः – carried amin; उच्चैः – aloft; ऊर्ध्वः – up; अधः – down; आयान्ति – come; निर्यान्ति – depart.

Those fools who are tied to these sense-objects by the strong cord of attachment–so very difficult to snap–come and depart–up aloft and down–carried amain by the powerful emissary of their past actions.

शब्दादिभिः पञ्चभिरेव पञ्च

पञ्चत्वमापुः स्वगुणेन बद्धाः ।

कुरङ्गमातङ्गपतङ्गमीन-

भृङ्गा नरः पञ्चभिरञ्चितः किम् ॥ ७६ ॥

कुरङ्ग-मातङ्ग-पतङ्ग-मीन-भृङ्गाः पञ्च शब्दादिभिः पञ्चभिः एव स्वगुणेन बद्धाः पञ्चत्वम् आपुः

(तदा) किम् पञ्चभिः अञ्चितः नरः ।

कुरङ्ग – the deer; मातङ्ग – the elephant; पतङ्ग – the moth; मीन – the fish; भृङ्गाः – the black-bee; पञ्च – these five; शब्दादिभिः – viz. sound etc.; पञ्चभिः-एव-स्वगुणेन-बद्धाः – being tied to one or other of the five senses through their own attachment; पञ्चत्वम्-आपुः – have died; (तदा)-किम् नरः – what then is in store for man; पञ्चभिः – all these five; अञ्चितः – who is attached to.

The deer-the elephant-the moth-the fish and the black-bee these five have died-being tied to one or other of the five senses-viz. sound etc. through their own attachment. What then is in store for man who is attached to all these five!

दोषेण तीव्रो विषयः कृष्णसर्पविषादपि ।

विषं निहन्ति भोक्तारं द्रष्टारं चक्षुषाप्ययम् ॥ ७७ ॥

विषयः दोषेण कृष्णसर्पविषात अपि तीव्राः विषं भोक्तारं निहन्ति अयम् चक्षुषा द्रष्टारं निहन्ति ।

विषयः – sense objects; दोषेण – in their evil effects; कृष्णसर्पविषात – than the poison of the cobra; अपि तीव्राः – are even more virulent; विषं – poison; भोक्तारं – one who takes it; निहन्ति – kills; अयम् – these; चक्षुषा-द्रष्टारं-अपि – one who even looks at them through the eyes; निहन्ति –kills.

Sense objects are even more virulent in their evil effects than the poison of the cobra. Poison kills one who takes it. But these (sense objects) kills one who even looks at them through the eyes.

विषयाशामहापाशाद्यो विमुक्तः सुदुस्त्यजात्।

स एव कल्पते मुक्त्यै नान्यः षट्शास्त्रवेद्यपि ॥ ७८ ॥

सुदुस्त्यजात् विषय-आशा-महापाशात यः विमुक्तः सः एव मुक्त्यै कल्पते न अन्यः षट्-शास्त्र-वेदि-अपि ।

सुदुस्त्यजात् – so very difficult to get rid off; विषय-आशा-महापाशात – from the terrible snare of hankering after sense-objects; यः – who; विमुक्तः – is free; सः-एव – he alone; मुक्त्यै-कल्पते – is fit for liberation; न-अन्यः – and none else; षट्-शास्त्र-वेदि-अपि – even though he be well-versed in all six-schools of Indian philosophy.

He who–is free from the terrible snare of hankering after sense-objects–so very difficult to get rid off–is alone fit for liberation–and none else - even though he be well-versed in all six-schools of Indian philosophy.

आपातवैराग्यवतो मुमुक्षून्

भवाब्धिपारं प्रतियातुमुद्यतान्।

आशाग्रहो मज्जयतेऽन्तराले

निगृह्य कण्ठे विनिवर्त्य वेगात्॥ ७९ ॥

भवाब्धिपारं प्रतियातुमुद्यतान् आपातवैराग्यवतःमुमुक्षून् आशाग्रहः कण्ठे निगृह्य वेगात विनिवर्त्य् अन्तराले मज्जयते ।

भवाब्धिपारं – the ocean of relative existence; प्रतियातुम्-उद्यतान् – are trying to cross; आपातवैराग्यवतः – who have got only apparent dispassion; मुमुक्षून् – those seekers after liberation; आशाग्रहः – the shark of hankering; कण्ठे-निगृह्य – catches by the throat; वेगात-विनिवर्त्य् – violently snatching them away from the pursuit of the knowledge of Brahman; अन्तराले – half –way; मज्जयते – drowns them.

The shark of hankering catches by the throat those seekers after liberation who have got only apparent dispassion and are trying to cross the ocean of relative existence and violently snatching them away from the pursuit of the knowledge of Brahman–drowns them half –way.

विषयाख्यग्रहो येन सुविरक्त्यसिना हतः।

स गच्छति भवाम्भोधेः पारं प्रत्यूहवर्जितः॥ ८० ॥

येन सु-विरक्ति-असिना विषयाख्यः-ग्रहः हतः सः प्रत्यूहवर्जितः भवाम्भोधेः पारं गच्छति ।

सु-विरक्ति-असिना – with the sword of mature dispassion; विषयाख्यः-ग्रहः – the shark known as sense-objects; हतः – has killed; येन-सः – he who; प्रत्यूहवर्जितः – free from all obstacles; भवाम्भोधेः पारं गच्छति – crosses the ocean of worldlyness.

He–who has killed the shark known as sense- objects with the sword of mature dispassion–crosses the ocean of worldliness-free from all obstacles.

विषमविषयमार्गैर्गच्छतोऽनच्छबुद्धेः

प्रतिपदमभियातो मृत्युरप्येष विद्धि ।

हितसुजनगुरूक्त्या गच्छतः स्वस्य युक्त्या

प्रभवति फलसिद्धिः सत्यमित्येव विद्धि ॥ ८१ ॥

विषम-विषयमार्गैः गच्छतः एव अनच्छबुद्धेः प्रतिपदम्-मृत्युः-अपि अभियातः विद्धिहित-सुजन-गुरु-उक्त्या स्वस्य युक्त्या गच्छतः फलसिद्धिः प्रभवति इति- एष-सत्यम् विद्धि ।

विषम-विषयमार्गैः-एव-गच्छतः – who walks the dreadful ways of sense pleasure only;

अनच्छबुद्धेः – the stupid; प्रतिपदम् – at every step; मृत्युः-अभियातः – death overtakes;

विद्धि – know that; अपि – whereas;

हित-सुजन-गुरु-उक्त्या – in accordance with the instructions a well-wishing and worthy Guru;

स्वस्य-युक्त्या – and also with one's own reasoning; गच्छतः – one who walks;

फलसिद्धिः-प्रभवति – achieves one's end; इति-एष-सत्यम्-विद्धि – know this to be truth.

Know that death overtakes at every step the stupid who walks the dreadful ways of sense pleasure only; whereas one–who walks in accordance with the instructions a well-wishing and worthy Guru–and also with one's own reasoning–achieves one's end know this to be truth.

मोक्षस्य कांक्षा यदि वै तवास्ति

त्यजातिदूराद्विषयान्विषं यथा ।

पीयूषवत्तोषदयाक्षमार्जव-

प्रशान्तिदान्तीर्भज नित्यमादरात् ॥ ८२ ॥

यदि वै तव मोक्षस्य कांक्षा अस्ति विषयान् यथा विषं अतिदूरात् त्यज तथा पीयूषवत् तोष-दया-क्षमा-आर्जव-प्रशान्ति-दान्तीः नित्यं आदरात भज ।

यदि-वै – if indeed; तव-अस्ति – you have; मोक्षस्य-कांक्षा – a craving for liberation; विषयान्-त्यज – shun sense-objects; यथा-विषं – as you would do poison; अतिदूरात् – from a good distance; तथा – and; पीयूषवत् – the nectar-like; तोष-दया-क्षमा-आर्जव-प्रशान्ति-दान्तीः – virtues of contentment–compassion–forgiveness–straight-forwardness–calmness and self-control; नित्यं – always;

आदरात – carefully/ respectfully; भज – cultivate.

If indeed you have a craving for liberation–shun sense-objects from a good distance as you would do poison–and always cultivate carefully/respectfully the nectar-like virtues of contentment–compassion–forgiveness–straight-forwardness–calmness and self-control.

अनुक्षणं यत्परिहृत्य कृत्यं

अनाद्यविद्याकृतबन्धमोक्षणम्।

देहः परार्थोऽयममुष्य पोषणे

यः सज्जते स स्वमनेन हन्ति ॥ ८३ ॥

अनादि-अविद्याकृत-बन्ध-मोक्षणम् अनुक्षणं यत्-कृत्यं परिहृत्य अयम् परार्थः-देहः अमुष्य पोषणे

यः सज्जते सः अनेन स्वम् हन्ति ।

अनादि-अविद्याकृत-बन्ध-मोक्षणम् – emancipationfrom the bondage of ignorance without beginning;

अनुक्षणं-यत्-कृत्यं – what should always be attempted; यः-परिहृत्य – whoever leaves aside;

अयम् – this; परार्थः-देहः –body–which is an object for others to enjoy;

*( अमुष्य)*-पोषणे-सज्जते – and passionately seeks to nourish; सः – he; अनेन –thereby;

स्वम्-हन्ति – commits sucide.

He-whoever leaves aside what should always be attempted–viz. emancipationfrom the bondage of ignorance without beginning–and passionately seeks to nourish this body–which is an object for others to enjoy commits sucide thereby.

शरीरपोषणार्थी सन् य आत्मानं दिदृक्षति ।

ग्राहं दारुधिया धृत्वा नदिं तर्तुं स गच्छति ॥ ८४ ॥

शरीरपोषणार्थी सन् यः आत्मानं दिदृक्षति सः ग्राहं दारुधिया धृत्वा नदिं तर्तुं गच्छति ।

शरीरपोषणार्थी-सन् – by devoting himself to the nourishment of the body; यः-सः – whosoever;

आत्मान-दिदृक्षति –seeks to realize the Self; ग्राहं – a crocodile; दारुधिया – mistaking it for a log;

धृत्वा – by catching hold of; नदिं-तर्तुं – cross a river; गच्छति– proceeds to.

Whosoever seeks to realize the Self by devoting himself to the nourishment of the body proceeds to cross a river by catching hold of a crocodile mistaking it for a log.

मोह एव महामृत्युर्मुमुक्षोर्वपुरादिषु ।

मोहो विनिर्जितो येन स मुक्तिपदमर्हति ॥ ८५ ॥

मुमुक्षोः वपुः-आदिषु मोहः एव महामृत्युर्येन मोहः विनिर्जितः स मुक्तिपदम् अर्हति ।

मुमुक्षोः – so for a seeker after liberation; वपुः-आदिषु – over the things like the body;

मोहः – the infatuation; एव-महामृत्यु – is a dire death; येन –who; मोहः – this infatuation; विनिर्जितः

– has thoroughly conquered; स – he; मुक्ति-पदम् – the state of freedom; अर्हति – deserves.

So for a seeker after liberation the infatuation over the things like the body is a dire death. He who has thoroughly conquered this infatuation deserves the state of freedom.

मोहं जहि महामृत्युं देहदारसुतादिषु ।

यं जित्वा मुनयो यान्ति तद्विष्णोः परमं पदम्॥ ८६ ॥

देह-दार-सुत-आदिषु मोहं महामृत्युं जहि यं जित्वा मुनयः तद्विष्णोः परमं पदम् यान्ति ।

देह-दार-सुत-आदिषु – to body-wife-children etc.; मोहं – attachment; महामृत्युं – the deadly;

जहि – conquer; यं – which; जित्वा – conquering; मुनयः – the sages;

तत्-विष्णोः-परमं-पदम् – that Supreme State of Vishnu; यान्ति – reach.

Conquer the deadly attachment to body-wife-children etc. conquering which the sages reach that Supreme State of Vishnu.

त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंकुलम्,

पूर्णं मूत्रपुरीषाभ्यां स्थूलं निन्द्यमिदं वपुः ॥ ८७ ॥

त्वङ्-मांस-रुधिर-स्नायु-मेदो-मज्जा-अस्थि-संकुलम् मूत्र-पुरीषाभ्यां पूर्णं इदं स्थूलं वपुः निन्द्यम् ।

त्वङ्-मांस-रुधिर-स्नायु-मेदो-मज्जा-अस्थि-संकुलम् – made up of skin-flesh-blood-muscles-fat-marrows and bones; मूत्र-पुरीषाभ्यां-पूर्णं– is full of waste matter and filth; इदं – this; स्थूलं-वपुः – gross body; निन्द्यम् – remains deprecating.

This gross body made up of skin-flesh-blood-muscles-fat-marrows and bones is full of waste matter and filth remains deprecating.

पञ्चीकृतेभ्यो भूतेभ्यः स्थूलेभ्यः पूर्वकर्मणा ।

समुत्पन्नमिदं स्थूलं भोगायतनमात्मनः ।

अवस्था जागरस्तस्य स्थूलार्थानुभवो यतः ॥ ८८ ॥

पञ्चीकृतेभ्यो-स्थूलेभ्यः-भूतेभ्यः पूर्वकर्मणा समुत्पन्नम् इदं-स्थूलं आत्मनः भोगायतनम् तस्य जागरः-अवस्था यतः स्थूल-अर्थ-अनुभवो ।

पञ्चीकृतेभ्यो-स्थूलेभ्यः-भूतेभ्यः – out of the gross elements formed by the union of the subtle elements with each other; पूर्वकर्मणा – by one’s past actions; समुत्पन्नम् – is produced; इदं-स्थूलं – the gross body; आत्मनः– for the soul; भोगायतनम् – is the medium of experience; तस्य – its; जागरः-अवस्था – waking state; यतः – in which; स्थूल-अर्थ-अनुभवो – it perceives gross objects.

The gross body is produced by one’s past actions out of the gross elements formed by the union of the subtle elements with each other–and is the medium of experience for the soul. That is its waking state in which it perceives gross objects.

बाह्येन्द्रियैः स्थूलपदार्थसेवां

स्रक्चन्दनस्त्र्यादिविचित्ररूपाम् ।

करोति जीवः स्वयमेतदात्मना

तस्मात्प्रशस्तिर्वपुषोऽस्य जागरे ॥ ८९ ॥

जीवः एतद्-आत्मना बाह्य-इन्द्रियैः स्रक्-चन्दन-स्त्री-आदि-विचित्ररूपाम् स्थूलपदार्थसेवां स्वयं करोति.

तस्मात् अस्य्-वपुषः प्रशस्ति जागरे ।

जीवः– the individual soul; एतद्-आत्मना– identifying itself with this form i.e. body; बाह्य-इन्द्रियैः – by means of the external organs; स्रक्-चन्दन-स्त्री-आदि– such as garlands–sandal -paste–woman etc.; विचित्ररूपाम्-स्थूलपदार्थसेवां-स्वयं-करोति– enjoys varieties of gross objects; तस्मात् – hence; अस्य्-वपुषः – this body has; प्रशस्ति – its fullest play; जागरे – in the waking state.

Identifying itself with this form i.e. body the individual soul–enjoys varieties of gross objects such as garlands–sandal-paste–woman etc.–by means of the external organs. Hence this body has its fullest play in the waking state.

सर्वोऽपि बाह्यसंसारः पुरुषस्य यदाश्रयः ।

विद्धि देहमिदं स्थूलं गृहवद्गृहमेधिनः ॥ ९० ॥

पुरुषस्य सर्वः-अपि बाह्य-संसारः यद्-आश्रयः–इदं स्थूलं-देहं गृहमेधिनः गृहवत् विद्धि ।

पुरुषस्य – man's; सर्वः-अपि-बाह्य-संसारः – entire dealing with the external world; यद्-आश्रयः – on which rests; इदं – this; स्थूलं-देहं – gross body; गृहमेधिनः – to the householder; गृहवत् – to be like a house; विद्धि – know.

Know this gross body to be like a house to the householder-on which rests man's entire dealing with the external world.

स्थूलस्य सम्भवजरामरणानि धर्माः

स्थौल्यादयो बहुविधाः शिशुताद्यवस्थाः ।

वर्णाश्रमादिनियमा बहुधाऽमयाः स्युः

पूजावमानबहुमानमुखा विशेषाः ॥ ९१ ॥

स्थूलस्य सम्भव-जरा-मरणानि धर्माः–स्थौल्यादयः बहुविधाः–शिशुताद्यवस्थाः वर्णाश्रमादिनियमाः–बहुधा आमयाः–पूजा-अवमान-बहुमान-मुखा विशेषाःस्युः ।

स्थूलस्य –of the gross-body; सम्भव-जरा-मरणानि – birth–decay and death; धर्माः– are various characteristics; स्थौल्य-आदयः – fatness etc.; बहुविधाः–several conditions; शिशुता-आदि-अवस्थाः – childhood and alike stages; वर्ण-आश्रम-आदि-नियमाः – various restrictions regarding castes and orders of life; बहुधा-आमयाः – various diseases; पूजा-अवमान-बहुमान–worship-insult and high-honours; विशेषाः-मुखा – particular faces; स्युः – it has.

Birth–decay and death are various characteristics of the gross-body–as also fatness etc. several conditions and childhood and alike stages–it has various restrictions regarding castes and orders of life–it is subject to various diseases and it meets with particular faces like worship–insult and high-honours.

बुद्धीन्द्रियाणि श्रवणं त्वगक्षि

घ्राणं च जिव्हा विषयावबोधनात् ।

वाक्पाणिपादा गुदमप्युपस्थः

कर्मेन्द्रियाणि प्रवणेन कर्मसु ॥ ९२ ॥

विषय-अवबोधनात् श्रवणं-त्वग्-अक्षि-घ्राणं च जिव्हा बुद्धि-इन्द्रियाणि (तथा) वाक्-पाणि-पादाः-गुदम् अपि उपस्थः कर्मसु प्रवणेन कर्म-इन्द्रियाणि (स्यु) ।

विषय-अवबोधनात् – for they help us to cognise objects; श्रवणं-त्वग्-अक्षि-घ्राणं-च-जिव्हा – the -earsskin-eyes-nose & tongue; बुद्धि-इन्द्रियाणि– are organs of knowledge; (तथा) – likewise;

वाक्-पाणि-पादाः-गुदम्-अपि-उपस्थः –the vocal organs-hands-legs & organs of evacuation as well generation कर्मसु-प्रवणेन – due to their tendency to work; कर्म-इन्द्रियाणि-(स्यु) – are organs of action.

The ears-skin-eyes-nose & tongue are organs of knowledge for they help us to cognise objects; likewise the vocal organs-hands-legs & organs of evacuation as well generation are organs of action-due to their tendency to work.

निगद्यतेऽन्तःकरणं मनोधीः
अहंकृतिश्चित्तमिति स्ववृत्तिभिः ।
मनस्तु संकल्पविकल्पनादिभिः
बुद्धिः पदार्थाध्यवसायधर्मतः ॥ ९३ ॥
अत्राभिमानादहमित्यहंकृतिः ।
स्वार्थानुसन्धानगुणेन चित्तम् ॥ ९४ ॥

अन्तःकरणं स्ववृत्तिभिः मनः धीः अहंकृतिः चित्तम् इति निगद्यते ।
संकल्प विकल्पनादिभिःतु मनः पदार्थ अध्यवसाय धर्मतः बुद्धिः ।
अत्र अहम् इति अभिमानात् अहंकृतिः स्वार्थ अनुसन्धान गुणेन चित्तम् ।

अन्तःकरणं – an instrument dealing with all knowledge the inner organ; स्ववृत्तिभिः – according its' respective function; मनः – the mind; धीः – the intellect; अहंकृतिः – the ego; चित्तम् – the memory; इति-निगद्यते– is called as; संकल्प-विकल्पनादिभिः-तु – for its considering the pross cons of things; मनः – the mind; पदार्थ-अध्यवसाय-धर्मतः – because of its property of deteminingthe truth of objects; बुद्धिः – the intellect; अत्र-अहम्-इति-अभिमानात् – from its identification with this body as one's own self; अहंकृतिः – the ego; स्वार्थ-अनुसन्धान-गुणेन – by its function of retaining and remembering things it is interested in; चित्तम् – the memory.

An instrument dealing with all knowledge - the inner organ is called as the mind–the intellect the ego–or the memory according its' respective function; the mind for its considering the pross cons of things–the intellect–because of its property of determining the truth of objects–from its identification with this body as one's own self the ego–and by its function of retaining and remembering things it is interested in the memory.

प्राणापानव्यानोदानसमाना भवत्यसौ प्राणः ।
स्वयमेव वृत्तिभेदाद्विकृतिभेदात्सुवर्णसलिलादिवत् ॥ ९५ ॥

असौ प्राणाः सुवर्ण-सलिलादिवत् विकृतिभेदात् वृत्तिभेदात् स्वयम एव प्राण-अपान-व्यान-उदान-समानाः भवति ।

असौ-प्राणाः – this vital-force; सुवर्ण-सलिलादिवत् – like gold-water etc.; विकृतिभेदात्-वृत्तिभेदात् – according to their diversity of functions and modifications; स्वयम-एव – itself; प्राण-अपान-व्यान-उदान-समानाः– Prana-Apana-Vyana-Udana-and Samana; भवति – becomes. ।

This vital-force itself becomes Prana-Apana-Vyana-Udana-and Samana; according to their diversity of functions and modifications like gold-water etc.

वागादि पञ्च श्रवणादि पञ्च

प्राणादि पञ्चाभ्रमुखानि पञ्च ।

बुद्ध्याद्यविद्यापि च कामकर्मणी

पुर्यष्टकं सूक्ष्मशरीरमाहुः ॥ ९६ ॥

वागादि पञ्च–श्रवणादि पञ्च–प्राणादि पञ्च–अभ्रमुखानि पञ्च–बुद्धी आदि–अविद्या अपि च–काम-कर्मणी

पुरी-अष्टकं सूक्ष्मशरीरम् आहुः ।

वागादि-पञ्च – the five organs of action such as speech; श्रवणादि-पञ्च – the five organs of knowledge such as the ear; प्राणादि-पञ्च – the group of five vital forces; अभ्रमुखानि-पञ्च – the five elements ending with the ether; बुद्धी-आदि – intellect etc. four internal organs; अविद्या – ignorance; अपि – together with; काम-कर्मणी-च – desire and action; पुरी-अष्टकं – the body composed of these eight groups; सूक्ष्मशरीरम् – the subtle body; आहुः – is called as.

The body composed of these eight groups viz. - the five organs of action such as speech, the five organs of knowledge such as the ear, the group of five vital forces, the five elements ending with the ether, intellect etc. four internal organs, ignorance together with desire and action; - is called as the subtle body.

इदं शरीरं श्रृणु सूक्ष्मसंज्ञितं

लिङ्गं त्वपञ्चीकृतभूतसम्भवम् ।

सवासनं कर्मफलानुभावकं

स्वाज्ञानतोऽनादिरुपाधिरात्मनः ॥ ९७ ॥

श्रृणु इदं सूक्ष्म-शरीरं-तु-लिङ्गं-संज्ञितं अपञ्चीकृत-भूत-सम्भवम् । (स तु) कर्मफल-आनुभावकं सवासनं आत्मनः स्व-अज्ञानतः अनादिः उपाधिः ।

श्रृणु – listen; इदं-सूक्ष्म-शरीरं – this subtle body; तु-लिङ्गं-संज्ञितं – also called as ***Linga-sharir***; पञ्चीकृत-भूत-सम्भवम् – is produced out of the elements before their subdividing and combining with each other; (स-तु) – it is but; कर्मफल-आनुभावकं – causes the soul to experience the fruits of its past actions; सवासनं – is possessed of latent impressions in the form of desires; स्व-अज्ञानतः – brought on by its own ignorance; आत्मनः-अनादिः-उपाधिः – a beginningless superimposition on the soul;

Listen! This subtle body also called as ***Linga-sharir*** is produced out of the elements before their subdividing and combining with each other; causes the soul to experience the fruits of its past actions and is possessed of latent impressions in the form of desires. It is but a beginning-less superimposition on the soul brought on by its own ignorance.

स्वप्नो भवत्यस्य विभक्त्यवस्था

स्वमात्रशेषेण विभाति यत्र ।

स्वप्ने तु बुद्धिः स्वयमेव जाग्रत्

कालीननानाविधवासनाभिः ॥ ९८ ॥

कर्त्रादिभावं प्रतिपद्य राजते

यत्र स्वयं भाति ह्ययं परात्मा।

धीमात्रकोपाधिरशेषसाक्षी

न लिप्यते तत्कृतकर्मलेशैः।

यस्मादसङ्गस्तत एव कर्मभिः

न लिप्यते किञ्चिदुपाधिना कृतैः॥ ९९॥

अस्य (लिङ्गं शरीरस्य) स्वप्नः विभक्ति-अवस्था भवति, यत्र स्वमात्रशेषेण विभाति । स्वप्ने तु बुद्धिः स्वयम् एव जाग्रत्-कालीन-नानाविध-वासनाभिः कत्रृ-आदि-भावं प्रतिपद्य राजते। यत्र अयं-धी-मात्र-उपाधिः अशेषसाक्षी परात्मा स्वयं हि भाति, तत् (धी) -कृत-कर्म-लेशैः न लिप्यते। यस्मात् असङ्गः तत एव उपाधिना कृतैः कर्मभिः किञ्चित् न लिप्यते ।

अस्य-(लिङ्गं-शरीरस्य) – of this subtle body; स्वप्नः – dream; विभक्ति-अवस्था – a state distinct from the waking; भवति – is, यत्र – where; स्वमात्रशेषेण – by itself; विभाति – it shines; । स्वप्ने – in dreams; तु-बुद्धिः-स्वयम्-एव – the group of intellect etc. by itself; जाग्रत्-कालीन-नानाविध-वासनाभिः – owing to various latent impressions of the waking state; कत्रृ-आदि-भावं – the roll of the agent and the like; प्रतिपद्य-राजते – takes on; । यत्र – while; अशेषसाक्षी-परात्मा – the witness of everything the Supreme-Atman; स्वयं-हि-भाति – shines in Its own glory; अयं-धी-मात्र-उपाधिः – with this intellect etc. as Its only superimpossion; तत्-(धी)-कृत-कर्म-लेशैः – by the effect of the work done by that intellect etc.; न-लिप्यते – remains un-touched; । यस्मात्-असङ्गः-ततः-एव – as It is wholly unattached;– उपाधिना-कृतैः – that Its superimpossion may perform; किञ्चित्-कर्मभिः — by any work; न-लिप्यते – It is not touched. ।

Dream is a state of this subtle body distinct from the waking where it shines by itself. In dreams the group of intellect etc. by itself takes on the roll of the agent and the like owing to various latent impressions of the waking state. While the witness of everything the Supreme-Atman shines in Its own glory with this intellect etc. as Its only superimpossion, remains un-touched by the effect of the work done by that intellect etc. As It is wholly unattached It is not touched by any work that Its superimpossion may perform.

सर्वव्यापृतिकरणं लिङ्गमिदं स्याच्चिदात्मनः पुंसः।

वास्यादिकमिव तक्ष्णस्तेनैवात्मा भवत्यसङ्गोऽयम्॥ १००॥

इदं-लिङ्गं-(शरीरं) चिदात्मनः पुंसः तक्ष्णः वास्य-आदिकम्-इव सर्व व्यापृति-करणं स्यात। तेन-एव अयम्-आत्मा असङ्गः-भवति।

इदं-लिङ्गं-(शरीरं) – this subtle body; चिदात्मनः-पुंसः – of the Atman, who is consciousness by nature; तक्ष्णः – of a carpenter; वास्य-आदिकम्-इव – like adze and other tools; सर्व-व्यापृति-करणं – the instrument for all activities; स्यात – is; तेन – therefore; अयम्-आत्मा – this Atman;

असङ्गः-एव -भवति – is perfectly unattached ।

This subtle body is the instrument for all activities of the Atman, who is consciousness by nature, like adze and other tools of a carpenter. Therefore this Atman is perfectly unattached.

अन्धत्वमन्दत्वपटुत्वधर्माः

सौगुण्यवैगुण्यवशाद्धि चक्षुषः ।

बाधिर्यमूकत्वमुखास्तथैव

श्रोत्रादिधर्मा न तु वेत्तुरात्मनः ॥ १०१ ॥

चक्षुषः-हि सौगुण्य-वैगुण्य-वशात् अन्धत्व-मन्दत्व-पटुत्व-धर्माः तथा एव बाधिर्य-मूकत्व-मुखाः श्रोत्रादिधर्माः वेत्तुः तु न आत्मनः ।

चक्षुषः-हि-धर्माः – are conditons of the eye; सौगुण्य-वैगुण्य-वशात् – due to its fitness or defectiveness; अन्धत्व-मन्दत्व-पटुत्व – blindness, weakness and sharpness; तथा-एव – so also; बाधिर्य-मूकत्व – deafness, dumbness, etc.; मुखाः-श्रोत्रः-आदि-धर्माः – are conditions of the mounth, of the ear and so forth; तु – but; न – never; वेत्तुः-आत्मनः – of the Atman, the Knower.

Blindness, weakness and sharpness are conditons of the eye, due to its fitness or defectiveness; so also deafness, dumbness, etc are conditions of the mounth, of the ear and so forth - but never of the Atman, the Knower.

उच्छ्वासनिःश्वासविजृम्भणक्षुत्

प्रस्यन्दनाद्युत्क्रमणादिकाः क्रियाः ।

प्राणादिकर्माणि वदन्ति तज्ज्ञाः

प्राणस्य धर्मावशनापिपासे ॥ १०२ ॥

उच्छ्वास-निःश्वास-विजृम्भण-क्षुत्-प्रस्यन्दनादि-उत्क्रमणादिकाः क्रियाः प्राणादि-कर्माणि (इति) तज्ज्ञाः वदन्ति (तथा) अशना-पिपासे प्राणस्य धर्मौ ।

उच्छ्वास-निःश्वास-विजृम्भण-क्षुत्-प्रस्यन्दनादि-उत्क्रमणादिकाः – inhalation, exhalation, yawing, sneezing, secretion, and leaving the body, etc.; क्रियाः – actions like; प्राणादि-कर्माणि – functions of Prana and the rest; (इति) तज्ज्ञाः – by experts; वदन्ति – are called; (तथा) – while; अशना-पिपासे – hunger and thirst, प्राणस्य-धर्मौ – are characteristics of Prana proper.

Actions like inhalation, exhalation, yawing, sneezing, secretion, and leaving the body, etc. are called by experts’ functions of Prana and the rest, while hunger and thirst are characteristics of Prana proper.

अन्तःकरणमेतेषु चक्षुरादिषु वर्ष्मणि ।

अहमित्यभिमानेन तिष्ठत्याभासतेजसा ॥ १०३ ॥

एतेषु चक्षुः-आदिषु वर्ष्मणि अहं-इति-अभिमानेन आभास-तेजसा अन्तःकरणम् तिष्ठति ।

एतेषु-चक्षुः-आदिषु-वर्ष्मणि – in the body including all these organs such as eye; अहं-इति-अभिमानेन – identifying with them; आभास-तेजसा – endued with a reflection of the spirit/consciousness; अन्तःकरणम् – the inner organ-complex; तिष्ठति – has its seat

The inner organ-complex has its seat in the body including all these organs such as eye, identifying with them and endued with a reflection of the spirit/consciousness.

अहंकारः स विज्ञेयः कर्ता भोक्ताभिमान्ययम्।

सत्त्वादिगुणयोगेन चावस्थात्रयमश्नुते ॥ १०४ ॥

कर्ता भोक्ता अभिमानी सः अहंकारः विज्ञेयः अयम्_च सत्त्वादि-गुणयोगेन अवस्था-त्रयम अश्नुते।

कर्ता-भोक्ता-अभिमानी – which identifies itself as doer and experiencer; सः-अहंकारः – it as egoism; विज्ञेयः – know ; अयम्_-च – and this only; सत्त्वादि-गुणयोगेन – in conjunction with constituent of nature purity etc.; अवस्था-त्रयम – three different states; अश्नुते – experiences. ।

Know it as egoism which identifies itself as doer and experiencer and this only experiences three different states in conjunction with constituent of nature purity etc.

विषयाणामानुकूल्ये सुखी दुःखी विपर्यये।

सुखं दुःखं च तद्धर्मः सदानन्दस्य नात्मनः ॥ १०५ ॥

विषयाणाम्-आनुकूल्ये सुखी विपर्यये दुःखी । सुखं-दुःखं-च तत्-धर्मः न आत्मनः-सदानन्दस्य।

विषयाणाम्-आनुकूल्ये – when sense-objects are favourable; सुखी – it becomes happy; विपर्यये – when the case is contrary; दुःखी – it becomes miserable; सुखं-दुःखं-च – happiness and miseries, तत्-धर्मः – are characteristics of that egoism; न – not; आत्मनः-सदानन्दस्य – of the ever-blissful Atman.

When sense-objects are favourable it (that egoism) becomes happy and it becomes miserable when the case is contrary. So happiness and miseries are characteristics of that egoism, and not of the ever-blissful Atman.

आत्मार्थत्वेन हि प्रेयान्विषयो न स्वतः प्रियः।

स्वत एव हि सर्वेषामात्मा प्रियतमो यतः

तत आत्मा सदानन्दो नास्य दुःखं कदाचन ॥ १०६ ॥

विषयः आत्मार्थत्वेन्-हि *प्रेयान्* स्वतः न प्रियः। यतः आत्मा स्वतः-एव-हि सर्वेषां-प्रियतमः ततः आत्मा सदानन्दः अस्य कदाचन दुःखं-न ।

विषयः – sense-objects; आत्मार्थत्वेन्-हि – only as dependent on the Atman manifesting through them; प्रेयान्_– desired; स्वतः-न – and not independently; प्रियः – are pleasurable; । यतः – because; आत्मा – the Atman; स्वतः-एव-हि –is by Its very nature; सर्वेषां-प्रियतमः – the most beloved of all; ततः – therefore; आत्मा – the Atman; सदानन्दः – is ever blissful; *अस्य* – कदाचन-दुःखं-न – never suffers misery. ।

Desired sense-objects are pleasurable only as dependent on the Atman manifesting through them and not independently, because the Atman is by Its very nature the most beloved of all; therefore the Atman is ever blissful and never suffers misery.

यत्सुषुप्तौ निर्विषय आत्मानन्दोऽनुभूयते।

श्रुतिः प्रत्यक्षमैतिह्यमनुमानं च जाग्रति ॥ १०७ ॥

यत्_सुषुप्तौ निर्विषय आत्मानन्दः अनुभूयते। श्रुतिः प्रत्यक्षम्_ऐतिह्यम्_अनुमानं च जाग्रति ।

यत् – that; सुषुप्तौ – in profound sleep; निर्विषय – independent of sense-objects; आत्मानन्दः – bliss of the Atman; अनुभूयते – we experience; । श्रुतिः – by upanisads; प्रत्यक्षम् – direct perception; ऐतिह्यम् – tradition; अनुमानं – inference; च – and; जाग्रति –is clearly attested. ।

That- in profound sleep we experience bliss of the Atman independent of sense-objects- is clearly attested by upanisads, direct perception, tradition, and inference.

अव्यक्तनाम्नी परमेशशक्तिः

अनाद्यविद्या त्रिगुणात्मिका परा ।

कार्यानुमेया सुधियैव माया

यया जगत्सर्वमिदं प्रसूयते ॥ १०८ ॥

अव्यक्तनाम्नी परमेशशक्तिः त्रिगुणात्मिका अनादि-अविद्या माया यया परा कार्य-अनुमेया सुधिया एव इदं-सर्वम्-जगत् प्रसूयते ।

अव्यक्तनाम्नी – called also the unmanifest; परमेशशक्तिः – is the power of the Lord; त्रिगुणात्मिका – is made up of the three gunas; अनादि – she is without beginning; अविद्या – Nescience; माया – Delusion; परा – is superior to the effects (as their cause); कार्य-अनुमेया-एव – she is to be inferred only from the effects She produces; सुधिया – by one of clear intellect; इदं-सर्वम्-जगत् – this whole universe; यया-प्रसूयते – it is she who brings forth ।

Nescience or Delusion called also the unmanifest is the power of the Lord. She is without beginning, is made up of the three gunas and is superior to the effects (as their cause). She is to be inferred by one of clear intellect only from the effects She produces. It is she who brings forth this whole universe.

सन्नाप्यसन्नाप्युभयात्मिका नो

भिन्नाप्यभिन्नाप्युभयात्मिका नो ।

साङ्गाप्यनङ्गा ह्युभयात्मिका नो

महाद्भुताऽनिर्वचनीयरूपा ॥ १०९ ॥

सत्-न असत्-अपि-न उभयात्मिका-अपि-नो, भिन्ना-अपि अभिन्ना-अपि उभयात्मिका नो, स-अङ्गा-न अन्-अङ्गा-अपि-न हि-उभयात्मिका-नो, महा-अद्भुता अनिर्वचनीय-रूपा ।

सत्-न – neither existence; असत्-अपि-न – nor non-existence; उभयात्मिका-अपि-नो – nor partaking of both characters; भिन्ना-न – neither same; अभिन्ना-अपि-न – nor different; उभयात्मिका-अपि नो – nor both; स-अङ्गा-न – neither composed of parts; अन्-अङ्गा-अपि-न – nor an indivisible whole; हि-उभयात्मिका-नो – nor both; महा-अद्भुता – most wonderful; अनिर्वचनीय-रूपा – can-not be described in words.

(That Delusion is) neither existence nor non-existence nor partaking of both characters, neither same nor an indivisible whole nor both, neither composed of parts nor an indivisible whole– nor both. She is most wonderful and can-not be described in words.

शुद्धाद्वयब्रह्मविबोधनाश्या

सर्पभ्रमो रज्जुविवेकतो यथा ।

रजस्तमःसत्त्वमिति प्रसिद्धा

गुणास्तदीयाः प्रथितैः स्वकार्यैः ॥ ११० ॥

शुद्ध-अद्वय-ब्रह्म-विबोध-नाश्या यथा रज्जुविवेकतः सर्पभ्रमः । स्वकार्यैः प्रथितैः सत्त्वम्-रजः-तमः-इति-प्रसिद्धा तदीयाः गुणाः ।

शुद्ध-अद्वय-ब्रह्म-विबोध-नाश्या – can be destroyed by the realization of the pure Brahman, the one without second; यथा – just as; सर्पभ्रमः – mistaken idea of a snake; रज्जुविवेकतः-नाश्या – is removed by the discrimination that it is rope; स्वकार्यैः – after their respective function; प्रथितैः – famous; सत्त्वम्-रजः-तमः-इति-प्रसिद्धा – well-known as sattva, rajas & tamas; तदीयाः – she has; गुणाः – her gunas.

*Maya* can be destroyed by the realization of the pure Brahman, the one without second just as mistaken idea of a snake is removed by the discrimination that it is rope. She has her gunas well-known as sattva, rajas & tamas, famous after their respective function.

विक्षेपशक्ती रजसः क्रियात्मिका

यतः प्रवृत्तिः प्रसृता पुराणी ।

रागादयोऽस्याः प्रभवन्ति नित्यं

दुःखादयो ये मनसो विकाराः ॥ १११ ॥

रजसः क्रियात्मिका विक्षेपशक्ती यतः पुराणी-प्रवृत्तिः प्रसृता ।

राग-आदयः दुःख-आदयः ये मनसः विकाराः नित्यं अस्याः प्रभवन्ति ।

रजसः – rajas has its; क्रियात्मिका – which is of the nature of an activity; विक्षेपशक्ती – projecting power; यतः – from which; पुराणी-प्रवृत्तिः – this primeval flow of activity; प्रसृता – has emanated; राग-आदयः – such as attachment; दुःख-आदयः – grief etc.; ये – all; मनसः – mental; विकाराः – modifications; नित्यं – continually; अस्याः – from this; प्रभवन्ति – are produced.

Rajas have its Vikepa-Sakti or projecting power which is of the nature of an activity, from which this primeval flow of activity has emanated. From this all mental modifications such as attachment and grief etc. are continually produced.

कामः क्रोधो लोभदम्भाद्यसूया

अहंकारेर्ष्यामत्सराद्यास्तु घोराः ।

धर्मा एते राजसाः पुम्प्रवृत्तिः

यस्मादेषा तद्रजो बन्धहेतुः ॥ ११२ ॥

कामः-क्रोध-लोभ-दम्भादि-असूया-अहंकार-ईर्ष्या-मत्सरादि एते तु घोराः धर्माः राजसाः, यस्मात् एषा पुम्-वृत्तिः तत् रजः बन्ध-हेतुः ।

कामः – lust; क्रोध – anger; लोभ – avarice; दम्भ – arrogance; आदि – such as; असूया – spite; अहंकार – egoism; ईर्ष्या – envy; मत्सर – jealousy; आदि – etc.; एते-तु – all these; घोराः – dire; धर्माः – attributes; राजसाः –are of rajas; यस्मात् – from which; एषा – this; पुम्-वृत्तिः – the worldly tendency of man; तत् – therefore; रजः – rajas is; बन्ध-हेतुः – a cause of bondage.

All these attributes such as lust, anger, avarice, arrogance along with spite, egoism, envy, jealousy etc. are of rajas; from which this the worldly tendency of man is produced. Therefore rajas is a cause of bondage.

एषाऽऽवृतिर्नाम तमोगुणस्य

शक्तिर्यया वस्त्ववभासतेऽन्यथा ।

सैषा निदानं पुरुषस्य संसृतेः

विक्षेपशक्तेः प्रवणस्य हेतुः ॥ ११३ ॥

तमोगुणस्य आवृतिः नाम एषा शक्तिः यया वस्तु अन्यथा अवभासते ।

सा एषा पुरुषस्य संसृतेः निदानं विक्षेपशक्तेः प्रवणस्य हेतुः ।

तमोगुणस्य – of tamas; आवृतिः – the veiling power; नाम – named as; एषा – this शक्तिः – is the power; यया – by which; वस्तु – things; अन्यथा – other than what they are; अवभासते – appear; सा-एषा – it is this; पुरुषस्य – man's; संसृतेः – repeated transmigrations; निदानं – that causes; विक्षेपशक्तेः – to the projecting power, प्रवणस्य – being inclined /prone; हेतुः – the cause

*Avrti* or the veiling power is the power of tamas by which things appear other than what they are. It is this that causes man's repeated transmigrations, and his being inclined/prone to the projecting power.

प्रज्ञावानपि पण्डितोऽपि चतुरोऽप्यत्यन्तसूक्ष्मात्मदृग्-

व्यालीढस्तमसा न वेत्ति बहुधा संबोधितोऽपि स्फुटम् ।

भ्रान्त्यारोपितमेव साधु कलयत्यालम्बते तद्गुणान्

हन्तासौ प्रबला दुरन्ततमसः शक्तिर्महत्यावृतिः ॥ ११४ ॥

प्रज्ञावान्-अपि पण्डितः-अपि चतुरः-अपि अत्यन्त-सूक्ष्म-आत्मदृग् बहुधा-संबोधितः-अपि तमसा-व्यालीढः स्फुटम्-न-वेत्ति । आरोपितम्-एव भ्रान्त्या साधु-कलयति तद्-गुणान् आलम्बते । हन्त! दुरन्त-तमसः असौ आवृतिः-शक्तिः महती-प्रबला ।

प्रज्ञावान्-अपि – even wise; पण्डितः-अपि – and learned men; चतुरः-अपि – besides men who are cleaver; अत्यन्त-सूक्ष्म-आत्मदृग्-अपि – as well as men adept in the vision of exceedingly subtle Atman; बहुधा-संबोधितः-अपि – even though explained in various ways; तमसा-व्यालीढः – when overpowered by tamas; स्फुटम्-न-वेत्ति – do not understand clearly; आरोपितम्-एव – what is simply superimposed; भ्रान्त्या – by delusion; साधु-कलयति – they consider as true; तद्-गुणान् –

on its qualities/effects; आलम्बते – depend; हन्त! – alas; दुरन्त-तमसः – of dreadful tamas;

असौ-आवृतिः-शक्तिः – is this veilling power; महती-प्रबला – how great and powerful.

Even wise and learned men besides men who are cleaver as well as men adept in the vision of exceedingly subtle Atman, when overpowered by tamas do not understand (the Atman/Truth) clearly even though explained in various ways. What is simply superimposed by delusion, they consider as true, and depend on its qualities/effects. Alas! How great and powerful is this veiling power of dreadful tamas!

अभावना वा विपरीतभावना

असंभावना विप्रतिपत्तिरस्याः ।

संसर्गयुक्तं न विमुञ्चति ध्रुवं

विक्षेपशक्तिः क्षपयत्यजस्रम् ॥ ११५ ॥

अस्याः संसर्गयुक्तं (पूरुषं) अभावना वा विपरीतभावना असंभावना विप्रतिपत्तिः ध्रुवं न विमुञ्चति, विक्षेपशक्तिः अजस्रम् क्षपयति ।

(पूरुषं) – for one; अस्याः-संसर्गयुक्तं – who has any connection with this veiling power; अभावना – absence of the right judgment; विपरीतभावना – contrary judgment; असंभावना – doubt; विप्रतिपत्तिः – absence of definite experience; वा – and; ध्रुवं – are certain; न विमुञ्चति – they never allow one to be free of their effects, विक्षेपशक्तिः – the projecting power; अजस्रम्-क्षपयति – gives ceaseless troble.

Absence of the right judgment, contrary judgment, doubt and absence of definite experience are certain for one who has any connection with this veiling power; they never allow such-one to be free of their effects, but the projecting power gives ceaseless trouble.

अज्ञानमालस्यजडत्वनिद्रा-

प्रमादमूढत्वमुखास्तमोगुणाः ।

एतैः प्रयुक्तो नहि वेत्ति किंचिन्

निद्रालुवत्स्तम्भवदेव तिष्ठति ॥ ११६ ॥

अज्ञानम्-आलस्य-जडत्व-निद्रा-प्रमाद्-मूढत्व मुखाः तमोगुणाः ।एतैः प्रयुक्तः निद्रालुवत् स्तम्भवत् एव तिष्ठति । नहि वेत्ति किंचिन् ।

अज्ञानम्-आलस्य-जडत्व-निद्रा-प्रमाद्-मूढत्व – ignorance,lassitude, dullness, sleep,inadvertence, stupidity etc.; मुखाः – are commencements; तमोगुणाः – of tamas; एतैः-प्रयुक्तः – one tied to these; निद्रालुवत् – like one sleep; स्तम्भवत् – like stock or stone; एव – but तिष्ठति – remains; नहि – does not; वेत्ति – comprehend; किंचिन् – anything.

Ignorance, lassitude, dullness, sleep, inadvertence, stupidity etc. are commencements of tamas; one tied to these does not comprehend anything but remains like one sleep or like stock or stone.

सत्त्वं विशुद्धं जलवत्तथापि

ताभ्यां मिलित्वा सरणाय कल्पते ।

यत्रात्मबिम्बः प्रतिबिम्बितः सन्

प्रकाशयत्यर्क इवाखिलं जडम् ॥ ११७ ॥

सत्त्वं जलवत्-विशुद्धं तथा-अपि ताभ्यां मिलित्वा सरणाय कल्पते । यत्र आत्मबिम्बः प्रतिबिम्बितः-सन् अर्क-इव अखिलं जडः प्रकाशयति ।

सत्त्वं – sttvaguna; जलवत्-विशुद्धं – is clear like water; तथा-अपि – yet; ताभ्यां-मिलित्वा – in conjunction with rajas and tamas; सरणाय – for transmigration; कल्पते – it makes; यत्र – in sttvaguna; आत्मबिम्बः – the Atman; प्रतिबिम्बितः-सन् – becomes reflected; अर्क-इव – like the sun; अखिलं – entire; जडः – world of matter; प्रकाशयति – reveals.

Sttvaguna is clear like water yet in conjunction with rajas and tamas it makes for transmigration. In sttvaguna the Atman becomes reflected and reveals entire world of matter like the sun.

मिश्रस्य सत्त्वस्य भवन्ति धर्माः

त्वमानिताद्या नियमा यमाद्याः ।

श्रद्धा च भक्तिश्च मुमुक्षता च

दैवी च सम्पत्तिरसन्निवृत्तिः ॥ ११८ ॥

अमानिता-आद्या नियमाः यम-आद्याः श्रद्धा-च-भक्तिः-च-मुमुक्षता-च दैवी-सम्पत्तिः-च असत्-निवृत्तिः तु मिश्रस्य सत्त्वस्य धर्माः भवन्ति ।

अमानिता-आद्या – an utter absence of pride etc.; नियमाः – purity, contentment etc. routines; यम-आद्याः – non-killing, truthfulness and other constraints; श्रद्धा – faith; च – followed by; भक्तिः – devotion; च – as well as; मुमुक्षता – yearning for liberation; च – with; दैवी-सम्पत्तिः – the divine tendencies; च – and; असत्-निवृत्तिः – turning away from the unreal; मिश्रस्य-सत्त्वस्य – of mixed sttva; धर्माः – the traints; तु-भवन्ति – are;

Purity, contentment etc. routines, with non-killing, truthfulness and other constraints, followed by the divine tendencies faith, devotion, turning away from the unreal as well as an utter absence of pride etc., and yearning for liberation are the traints of mixed sttva.

विशुद्धसत्त्वस्य गुणाः प्रसादः

स्वात्मानुभूतिः परमा प्रशान्तिः ।

तृप्तिः प्रहर्षः परमात्मनिष्ठा

यया सदानन्दरसं समृच्छति ॥ ११९ ॥

प्रसादः स्व-आत्मा-अनुभूतिः परमा-प्रशान्तिः तृप्तिः प्रहर्षः परम-आत्म-निष्ठा विशुद्ध-सत्त्वस्य गुणाः यया सत्-आनन्द-रसं समृच्छति ।

प्रसादः – cheerfulness; स्व-आत्मा-अनुभूतिः – realization of one's own Self; परमा-प्रशान्तिः – supreme peace; तृप्तिः – contentment; प्रहर्षः – bliss; परम-आत्म-निष्ठा – steady devotion to the Atman; विशुद्ध-सत्त्वस्य-गुणाः – are the traints of pure sattva; यया – by which; सत्-आनन्द-रसं – bliss everlasting; समृच्छति – the aspirant enjoys.

Cheerfulness, contentment, bliss, supreme peace and realization of one's own Self; are the traints of pure sattva by which the aspirant enjoys bliss everlasting.

अव्यक्तमेतत्त्रिगुणैर्निरुक्तं

तत्कारणं नाम शरीरमात्मनः ।

सुषुप्तिरेतस्य विभक्त्यवस्था

प्रलीनसर्वेन्द्रियबुद्धिवृत्तिः ॥ १२० ॥

एतत्-अव्यक्तम् त्रिगुणैः निरुक्तं तत् आत्मनः-शरीरम कारणं-नाम । प्रलीन-सर्वेन्द्रिय-बुद्धि-वृत्तिः सुषुप्तिः एतस्य विभक्ति-अवस्था ।

एतत्-अव्यक्तम् – this unmanifest; त्रिगुणैः – as the compound of three gunas in a germ state; निरुक्तं – is spoken of; तत् – that; आत्मनः-शरीरम – the body of the soul; कारणं-नाम – is named as causal; प्रलीन-सर्वेन्द्रिय-बुद्धि-वृत्तिः –in which the functions of all organs along with intellect are suspended; सुषुप्तिः – profound sleep; एतस्य – its; विभक्ति-अवस्था – is special state.

This unmanifest is spoken of as the compound of three gunas in a germ state; that is the body of the soul named as causal. Profound sleep in which the functions of all organs along with intellect are suspended is its special state.

सर्वप्रकारप्रमितिप्रशान्तिः

बीजात्मनावस्थितिरेव बुद्धेः ।

सुषुप्तिरेतस्य किल प्रतीतिः

किंचिन्न वेद्मीति जगत्प्रसिद्धेः ॥ १२१ ॥

सर्व-प्रकार-प्रमिति-प्रशान्तिः बुद्धेः बीजात्मना-एव अवस्थितिः सुषुप्तिः । किंचित् न-वेद्मि इति जगत्-प्रसिद्धेः एतस्य किल प्रतीतिः ।

सर्व-प्रकार-प्रमिति-प्रशान्तिः – the cessation of all kids of perception; बुद्धेः-बीजात्मना-एव-अवस्थितिः – in which the mind remains in a subtle seed like state; सुषुप्तिः – profound sleep is; किंचित्-न-वेद्मि-इति – "I did not know anything then" जगत्-प्रसिद्धेः – is the universal experience of everybody; एतस्य – of this; किल-प्रतीतिः – the test.

Profound sleep is the cessation of all kids of perception in which the mind remains in a subtle seed like state. The test is the universal experience of everybody, "I did not know anything then".

देहेन्द्रियप्राणमनोऽहमादयः

सर्वे विकारा विषयाः सुखादयः।

व्योमादिभूतान्यखिलं च विश्वं

अव्यक्तपर्यन्तमिदं ह्यनात्मा ॥ १२२ ॥

देह-इन्द्रिय-प्राण-मन-अहम-आदयः विषयाः सुख-आदयः सर्वे विकारा व्योम-आदि-भूतानि च अव्यक्त-पर्यन्तं अखिलं विश्वं इदं हि अन्-आत्मा ।

देह –the body; इन्द्रिय – organs; प्राण – vital-force;

मन-अहम-आदयः – internal organs like mind, egoism etc.; विषयाः – the sense-objects;

सुख-आदयः-सर्वे-विकारा – all modifications beginning with pleasure;

व्योम-आदि-भूतानि – the gross elements such as the ether; च – in fact;

अव्यक्त-पर्यन्त-अखिलं-विश्वं – the whole universe up to the unmanifest; इदं – all this is हि – verily;

अन्-आत्मा – non-Self.

The body, organs, vital-force, internal organs like mind-egoism etc., the sense-objects, all modifications beginning with pleasure, the gross elements such as the ether, in fact the whole universe up to the unmanifest - in fact all this is verily non-Self.

माया मायाकार्यं सर्वं महदादिदेहपर्यन्तम्।

असदिदमनात्मतत्त्वं विद्धि त्वं मरुमरीचिकाकल्पम्॥ १२३ ॥

माया महत्-आदि-देह-पर्यन्तम्-माया-कार्यं सर्वं असत् इदम् अनात्म-तत्त्वं त्वं मरुमरीचिका-कल्पम् विद्धि ।

माया – nescience; महत्-आदि-देह-पर्यन्तम्-माया-कार्यं – effect of nescience right from cosmic intelligence down to the gross body; सर्वं – everything; असत् – unreal; इदम् – this; अनात्म-तत्त्वं – non-Self; त्वं – you; मरुमरीचिका-कल्पम् – imaginary like the mirage in a desert; विद्धि – know.

Nescience and effect of nescience right from cosmic intelligence down to the gross body everything is unreal. You should know this non-Self to be imaginary like the mirage in a desert.

अथ ते संप्रवक्ष्यामि स्वरूपं परमात्मनः।

यद्विज्ञाय नरो बन्धान्मुक्तः कैवल्यमश्नुते ॥ १२४ ॥

अथ ते परमात्मनः-स्वरूपं संप्रवक्ष्यामि, यत्-विज्ञाय नरः बन्धात्-मुक्तः कैवल्यम् अश्नुते ।

अथ – now; ते – you; परमात्मनः-स्वरूपं – the real nature of the Supreme Self;

संप्रवक्ष्यामि – I am going to tell; यत्-विज्ञाय – realizing which; नरः – man;

बन्धात्-मुक्तः – is freed from bondage; कैवल्यम् – liberation; अश्नुते – attains.

Now I am going to tell you the real nature of the Supreme Self, realizing which man is freed from bondage and attains liberation.

अस्ति कश्चित्स्वयं नित्यमहंप्रत्ययलम्बनः।

अवस्थात्रयसाक्षी सन्पञ्चकोशविलक्षणः ॥ १२५ ॥

पञ्च-कोश-विलक्षणः अवस्था-त्रय-साक्षी-सन् नित्यम् अहं-प्रत्यय-आलम्बनः कश्चित् स्वयं-अस्ति ।

पञ्च-कोश-विलक्षणः – distinct from the five sheaths or covering; अवस्था-त्रय-साक्षी-सन् – the witness of the three states; नित्यम् – the eternal; अहं-प्रत्यय-आलम्बनः – substratum of the consciousness of egoism; कश्चित् – स्वयं-अस्ति – there is Self.

There is some Self the eternal substratum of the consciousness of egoism, the witness of the three states and distinct from the five sheaths or covering.

यो विजानाति सकलं जाग्रत्स्वप्नसुषुप्तिषु ।

बुद्धितद्वृत्तिसद्भावमभावमहमित्ययम् ॥ १२६ ॥

यः विजानाति जाग्रत्-स्वप्न-सुषुप्तिषु सकलं, बुद्धि-तद्-वृत्ति-सद्भावम् अभावम, अयम् 'अहम्' इति ।

यः विजानाति – which knows; सकलं – everything; जाग्रत्-स्वप्न-सुषुप्तिषु – that happens in the states waking, dream & profound sleep; बुद्धि-तद्-वृत्ति-सद्भावम् अभावम – the presence or absence of the mind & its functions; अयम् 'अहम्' इति – like "this is I am".

Which knows everything - that happens in the states waking, dream & profound sleep, the presence or absence of the mind & its functions, like "this is I am";

यः पश्यति स्वयं सर्वं यं न पश्यति कश्चन ।

यश्चेतयति बुद्ध्यादि न तद्यं चेतयत्ययम् ॥ १२७ ॥

यः स्वयं सर्वं पश्यति यं कः-चन न-पश्यति यः बुद्ध्यादि चेतयति यं तत् (बुद्ध्यादि) अयम् (इति) न-चेतयति ।

यः– which; स्वयं – itself; सर्वं – all; पश्यति – sees; यं – to which; कः-चन-न-पश्यति – none can see; यः – which; बुद्ध्यादि – intellect etc.; चेतयति – illumines; यं – to which; तत् (बुद्ध्यादि) – that (intellects etc.); अयम् (इति) – like "this is it"; न-चेतयति – can-not illumine.

Which itself sees all but to which none can see, which illumines intellect etc. but to which that (intellects etc.) can-not illumine like "this is it";

येन विश्वमिदं व्याप्तं यं न व्याप्नोति किञ्चन ।

अभारूपमिदं सर्वं यं भान्त्यमनुभात्ययम् ॥ १२८ ॥

इदं विश्वम् येन व्याप्तं यं किञ्चन-न व्याप्नोति यं-भान्त्यम् इदं सर्वं अभारूपम् अयम्-(इति) अनुभाति ।

इदं – this; विश्वम् – universe; येन – by which; व्याप्तं – is pervaded; यं – to which; किञ्चन-न – nothing ; व्याप्नोति – pervades; यं-भान्त्यम् – because That shines; इदं – this; सर्वं – all; अभारूपम् – as Its reflection; अयम्-(इति) – like 'this is it'; अनुभाति – is shining.

By which this universe is pervaded, but to which nothing pervades, because That shines all this is shining as reflection of That, like 'this is it'.

यस्य सन्निधिमात्रेण देहेन्द्रियमनोधियः ।

विषयेषु स्वकीयेषु वर्तन्ते प्रेरिता इव ॥ १२९ ॥

यस्य सन्निधि-मात्रेण देह-इन्द्रिय-मनोधियः स्वकीयेषु विषयेषु प्रेरिता-इव वर्तन्ते ।

यस्य – by whose; सन्निधि-मात्रेण – very presence;

देह-इन्द्रिय-मनः-धियः – the body, the organs, mind & intellect; स्वकीयेषु – to their respective;

विषयेषु – spheres of actions; प्रेरिता-इव – like servants; वर्तन्ते – keep.

By whose very presence the body, the organs, mind & intellect keep to their respective spheres of actions like servants.

अहङ्कारादिदेहान्ता विषयाश्च सुखादयः ।

वेद्यन्ते घटवद् येन नित्यबोधस्वरूपिणा ॥ १३० ॥

येन नित्य-बोध-स्वरूपिणा अहङ्कारादि-देहान्ता विषयाः-च सुखादयःघटवद् वेद्यन्ते ।

येन- नित्य-बोध-स्वरूपिणा – by which - the essence of Eternal Knowledge; अहङ्कारादि-देहान्ता – from egoism down to the body; विषयाः – the sense-objects; सुखादयः-च – and pleasure etc.; घटवद् – as a jar; वेद्यन्ते – is known as palpably.

By which - the essence of Eternal Knowledge from egoism down to the body, the sense-objects and pleasure etc. is known as palpably as a jar.

एषोऽन्तरात्मा पुरुषः पुराणो

निरन्तराखण्डसुखानुभूतिः ।

सदैकरूपः प्रतिबोधमात्रो

येनेषिता वागसवश्चरन्ति ॥ १३१ ॥

येन इषिता वाग्–असवः चरन्ति एषः पुराणः-पुरुषः निरन्तर-अखण्ड-सुख-अनुभूतिः सदा-एकरूपः प्रति-बोध-मात्रः अन्तरात्मा ।

येन – by which; इषिता – commanded; वाग्-असवः – organs and vital-force; चरन्ति – performs their functions; एषः – this (which is being expounded from the verse 126); पुराणः-पुरुषः – the primeval Purusa; निरन्तर-अखण्ड-सुख-अनुभूतिः – whose essence is the constant realization of infinite Bliss; सदा-एकरूपः – which is ever the same; प्रति-बोध-मात्रः – yet reflecting through the different mental modifications; अन्तरात्मा – the innermost Self.

Commanded by which organs and vital-force performs their functions - this (which is being expounded from the verse 126 is) the primeval Purusa, whose essence is the constant realization of infinite Bliss, which is ever the same yet reflecting through the different mental modifications - the innermost Self.

अत्रैव सत्त्वात्मनि धीगुहायां

अव्याकृताकाश उशत्प्रकाशः ।

आकाश उच्चै रविवत्प्रकाशते

स्वतेजसा विश्वमिदं प्रकाशयन् ॥ १३२ ॥

अत्र-एव सत्त्व-आत्मनि धी-गुहायां अव्याकृत-आकाशे उशत्-प्रकाशः आकाशः स्वतेजसा इदं-विश्वम् प्रकाशयन् उच्चैः रविवत्-प्रकाशते ।

अत्र-एव – in this very body; सत्त्व-आत्मनि – in the mind full of sattva; धी-गुहायां – in the secret chamber of the intellect; अव्याकृत-आकाशे – in the causal-body known as unmanifested; उशत्-प्रकाशः-आकाशः – the Atman of charming splendour; स्वतेजसा – through Its own effulgence; इदं-विश्वम् – this universes; प्रकाशयन् – manifesting; उच्चैः-रविवत् – like the sun aloft; प्रकाशते – shines.

In this very body, in the mind full of, in the secret chamber of the intellect, in the causal-body known as unmanifested, the Atman of charming splendour, shines like the sun aloft manifesting this universes through Its own effulgence.

ज्ञाता मनोऽहंकृतिविक्रियाणां

देहेन्द्रियप्राणकृतक्रियाणाम्।

अयोऽग्निवत्तानुनुवर्तमानो

न चेष्टते नो विकरोति किञ्चन ॥ १३३ ॥

मनः-अहंकृति-विक्रियाणां देह-इद्रिय-प्राण-कृत-क्रियाणाम् ज्ञाता तान् अयः-अग्निवत् अनुवर्तमानः

किञ्चन-न-चेष्टते-नो-विकरोति ।

मनः-अहंकृति-विक्रियाणां – of the modifications of mind & egoism; देह-इद्रिय-प्राण-कृत-क्रियाणाम् – of the activities of the body, the organs & the vital force; ज्ञाता – the knower; तान्-अनुवर्तमानः – apparently taking their forms; अयः-अग्निवत् – like the fire in a ball of iron; किञ्चन-न-चेष्टते-नो-विकरोति – it neither acts nor is subject to change in the least.

The knower of the modifications of mind & egoism, and of the activities of the body, the organs & the vital force, apparently taking their forms, like the fire in a ball of iron; it neither acts nor is subject to change in, the least.

न जायते नो म्रियते न वर्धते

न क्षीयते नो विकरोति नित्यः।

विलीयमानेऽपि वपुष्यमुष्मि-

न्न लीयते कुम्भ इवाम्बरं स्वयम्॥ १३४ ॥

नित्यः न-जायते-नो-म्रियते, न-वर्धते-ना-क्षीयते-न-विकरोति। अमुष्मिन्-वपुषि-विलीयमाने-अपि, स्वयम्-न-लीयते,

कुम्भे-अम्बरं-इव ।

नित्यः – the eternal Atman; न-जायते-नो-म्रियते – is neither born nor dies; न-वर्धते-नो-क्षीयते-न-विकरोति – neither grows nor decays nor does It undergo any change; अमुष्मिन्-वपुषि -विलीयमाने-अपि – even this body is destroyed; स्वयम-न-लीयते – It does not cease to exist Itself; कुम्भे-अम्बरं-इव – just like the sky in a jar (does not cease to exist Itself even after that jar is broken).

The eternal Atman is neither born nor dies, neither grows nor decays nor does It undergo any change, It does not cease to exist Itself even this body is destroyed, just like the sky in a jar (does not cease to exist Itself even after that jar is broken).

प्रकृतिविकृतिभिन्नः शुद्धबोधस्वभावः

सदसदिदमशेषं भासयन्निर्विशेषः।

विलसति परमात्मा जाग्रदादिष्ववस्था-

स्वहमहमिति साक्षात्साक्षिरूपेण बुद्धेः॥ १३५॥

प्रकृति-विकृति-भिन्नः शुद्ध-बोध-स्वभावः निर्विशेषः परमात्मा इदम् सत्-असत्-अशेषं भासयत् जाग्रदादिषु अवस्थासु

बुद्धेः साक्षिरूपेण साक्षात् अहम् अहम् इति विलसति ।

प्रकृति-विकृति-भिन्नः – beyond all transformations; शुद्ध-बोध-स्वभावः – pure intelligence by nature; निर्विशेषः – free from all specifications; परमात्मा – is the Patamatman; इदम्-सत्-असत्-अशेषं-भ ासयत् of– in the presence which this entire gross & subtle universe shines/manifests; जाग्र-आदिषु-अवस्थासु – in the waking and other states; बुद्धेः-साक्षात्-साक्षिरूपेण-विलसति – which remains direct witness of the intellect – the determinative faculty of a mind; अहम्-अहम्-इति – as the substratum of the persistent sense of egoism 'I am – I am'.

Beyond all transformations, free from all specifications and pure intelligence by nature is the Patamatman; in the presence which this entire gross & subtle universe shines/manifests and which remains direct witness of the intellect – the determinative faculty of a mind – in the waking and other states as the substratum of the persistent sense of egoism 'I am – I am'.

नियमितमनसामुं त्वं स्वमात्मानमात्मन्

ययमहमिति साक्षाद्विद्धि बुद्धिप्रसादात्।

जनिमरणतरंगापारसंसारसिन्धुं

प्रतर भव कृतार्थो ब्रह्मरूपेण संस्थः॥ १३६॥

त्वं अमुं स्वं-आत्मानम् नियमित-मनसा बुद्धि-प्रसादात् आत्मनि 'अयम्-अहम्'-इति साक्षात्-विद्धि।

जनि-मरण-तरंग-अपार-संसार-सिन्धुं प्रतर ब्रह्मरूपेण-संस्थः कृतार्थः-भव ।

त्वं – you; अमुं – this; स्वं-आत्मानम् – your own Self; नियमित-मनसा – by means of regulated mind; बुद्धि-प्रसादात् – purified intellect; आत्मनि – within you; 'अयम्-अहम्'-इति – as 'I am It'; साक्षात्-विद्धि – realize directly; जनि-मरण-तरंग-अपार-संसार-सिन्धुं – boundless worldly ocean with waves in thevform of birth & death; प्रतर – by crossing; ब्रह्मरूपेण-संस्थः – get firmly established in the Brahman as your own essence; कृतार्थः-भव – be blessed.

By means of regulated mind and purified intellect you realize directly this-your own Self, within you as 'I am It', and by crossing boundless worldly ocean with waves in the form of birth & death get firmly established in the Brahman as your own essence to be blessed.

अत्रानात्मन्यहमिति मतिर्बन्ध एषोऽस्य पुंसः

प्राप्तोऽज्ञानाज्जननमरणक्लेशसंपातहेतुः।

येनैवायं वपुरिदमसत्सत्यमित्यात्मबुद्ध्या

पुष्यत्युक्षत्यवति विषयैस्तन्तुभिः कोशकृद्वत्॥ १३७॥

अत्र अनात्मनि अहम्-इति-मतिः बन्धः एषः-{*बन्धः}* अस्य-पुंसः अज्ञानात्-प्राप्तः जनन-मरण-क्लेश-संपात-हेतुः ।

तन्तुभिः कोशकृत्-वत् येन-एव अयं इदम्-असत्-वपुः सत्यम्-इति-आत्मबुद्ध्या अवति उक्षति विषयैः पुष्यति ।

अत्र – here in the world; अनात्मनि-अहम्-इति-मतिः – identifying the self with non-self; {*बन्धः– is the bondage*;} एषः-बन्धः – this bondage; पुंसः – of a man; अस्य-अज्ञानात्-प्राप्तः – which is due to his ignorance; जनन-मरण-क्लेश-संपात-हेतुः – brings in its train – the miseriesof birth and death; तन्तुभिः – by the threads of its cocoon, कोशकृत्-वत् – as that of the caterpillar; येन-एव – it is through this only; अयं – इदम्-असत्-वपुः-सत्यम् – (one considers) this evanescent body as real; इति-आत्मबुद्ध्या – by identifying oneself with it; अवति – nourishes; उक्षति – bathes; विषयैः-पुष्यति – preserves it by means of (agreeable) sense-objects.

Here in the world identifying the self with non-self is the bondage - as that of the caterpillar by the threads of its cocoon, this bondage of a man, which is due to his ignorance brings in its train – the miseries of birth and death. It is through this only (one considers) this evanescent body as real by identifying oneself with it, nourishes, bathes and preserves it by means of (agreeable) sense-objects.

अतस्मिंस्तद्बुद्धिः प्रभवति विमूढस्य तमसा

विवेकाभावाद्वै स्फुरति भुजगे रज्जुधिषणा ।

ततोऽनर्थव्रातो निपतति समादातुरधिकः

ततो योऽसद्ग्राहः स हि भवति बन्धः श्रृणु सखे ॥ १३८ ॥

तमसा विमूढस्य अतस्मिन् तद्-बुद्धिः प्रभवति विवेक-अभावात्-वै भुजगे रज्जुधिषणा-स्फुरति ।

ततः समादातुः अधिकः अनर्थव्रातः निपतति । ततः सखे श्रृणु यः असद्ग्राहः सः हि बन्धः-भवति ।

तमसा – by ignorance; विमूढस्य – one who is overpowered; अतस्मिन्-तद्-बुद्धिः – mistakes a thing for which it is not; प्रभवति –; विवेक-अभावात्-वै – it is the absence of discrimination that; भुजगे – a snake; रज्जुधिषणा-स्फुरति – causes one to mistake for a rope; ततः – and then; समादातुः – one who seizes it through that wrong notion; अधिकः – great; अनर्थव्रातः – dangers; निपतति – overtake; ततः – hence; सखे – my friend; श्रृणु – listen; यः – it is; असद्ग्राहः – the mistaking of transitory things as real; सः-हि – verily that; बन्धः-भवति – constitutes bondage.

One who is overpowered by ignorance mistakes a thing for which it is not: it is the absence of discrimination that causes one to mistake a snake for a rope, and then great dangers overtake one who seizes it through that wrong notion. Hence, listen, my friend, verily it is the mistaking of transitory things as real that constitutes bondage.

अखण्डनित्याद्वयबोधशक्त्या

स्फुरन्तमात्मानमनन्तवैभवम् ।

समावृणोत्यावृतिशक्तिरेषा

तमोमयी राहुरिवार्कबिम्बम् ॥ १३९ ॥

एषा-तमोमयी-आवृति-शक्तिः अखण्ड-नित्य-अद्वय-बोधशक्त्या स्फुरन्तम्

अनन्त-वैभवम्-आत्मानम् समावृणोति अर्कबिम्बम् राहुः-इव ।

एषा-तमोमयी-आवृति-शक्तिः – this velling power in the form of tamas; अखण्ड-नित्य-अद्वय-बोधशक्त्या – स्फुरन्तम् – which manifest Itself through the power of knowledge, indivisible, eternal & one without second; अनन्त-वैभवम् – whose glories are infinite; आत्मानम्-समावृणोति – covers the Self; अर्कबिम्बम् – the orb of the sun; राहुः-इव – as Rahu does.

This veiling power in the form of tamas covers the Self, whose glories are infinite and which manifest Itself through the power of knowledge, indivisible, eternal & one without second - as Rahu does the orb of the sun.

तिरोभूते स्वात्मन्यमलतरतेजोवति पुमान्

अनात्मानं मोहादहमिति शरीरं कलयति ।

ततः कामक्रोधप्रभृतिभिरमुं बन्धनगुणैः

परं विक्षेपाख्या रजस उरुशक्तिर्व्यथयति ॥ १४० ॥

अमलतर-तेजोवति स्वात्मनि तिरोभूते पुमान् मोहात् अनात्मानं-शरीरं अहं-इति कलयति ।

ततः रजसः विक्षेपाख्या-उरुशक्तिः अमुं काम-क्रोध-प्रभृतिभिः-बन्धन-गुणैः परं-व्यथयति ।

अमलतर-तेजोवति – endowed with the purest splendour; स्वात्मनि – when his own Self; तिरोभूते – is hidden from view; पुमान् – a man; मोहात् – through ignorance; अनात्मानं-शरीरं – this body which is non-Self; अहं-इति-कलयति – falsely identifies himself with; ततः – and then; रजसः – of rajas; विक्षेपाख्या-उरुशक्तिः – the great power called the projecting power; अमुं – him; काम-क्रोध-प्रभृतिभिः-बन्धन-गुणैः – through the binding fetters of lust, anger etc.; परं-व्यथयति – sorely afflicts.

When his own Self endowed with the purest splendour is hidden from view a man through ignorance falsely identifies himself with this body which is non-Self. And then the great power of rajas called the projecting power sorely afflicts him– through the binding fetters of lust, anger etc.

महामोहग्राहग्रसनगलितात्मावगमनो

धियो नानावस्थां स्वयमभिनयंस्तद्गुणतया ।

अपारे संसारे विषयविषपूरे जलनिधौ

निमज्योन्मज्यायं भ्रमति कुमतिः कुत्सितगतिः ॥ १४१ ॥

अयं-कुमतिः महा-मोह-ग्राह-ग्रसन-गलित-आत्मा-अवगमनः धियः नाना-अवस्थां तद्गुणतया स्वयम-अभिनयन्

विषय-विष-पूरे अपारे-संसारे-जलनिधौ निमज्य-उन्मज्य कुत्सितगतिः भ्रमति ।

अयं-कुमतिः – this man of perverted intellect; महा-मोह-ग्राह-ग्रसन-गलित-आत्मा-अवगमनः – having his perception of the self swallowed up by the shark of utter ignorance; धियः – of the intellect; नाना-अवस्थां – the various states; तद्गुणतया – as that is Its superimposed attributes;

स्वयम-अभिनयन् – himself imitates; विषय-विष-पूरे – which is full of the poison of sense-enjoyments; अपारे-संसारे-जलनिधौ – in this boundless ocean of the world; निमज्ज्य-उन्मज्ज्य – drifting up and down; कुत्सितगतिः – in despised state; भ्रमति – keeps on roaming.

This man of perverted intellect having his perception of the Self swallowed up by the shark of utter ignorance, himself imitates the various states of the intellect, as that is Its superimposed attributes, and drifting up and down in this boundless ocean of the world which is full of the poison of sense-enjoyments keeps on roaming in a despised state.

भानुप्रभासंजनिताभ्रपङ्क्तिः

भानुं तिरोधाय विजृम्भते यथा ।

आत्मोदिताहंकृतिरात्मतत्त्वं

तथा तिरोधाय विजृम्भते स्वयम् ॥ १४२ ॥

यथा भानु-प्रभा-संजनिता-अभ्र-पङ्क्तिः भानुं-तिरोधाय विजृम्भते तथा आत्म-उदिता-अहंकृतिः आत्मतत्त्वं-तिरोधाय स्वयम्-विजृम्भते ।

यथा – as; भानु-प्रभा-संजनिता-अभ्र-पङ्क्तिः – layers of clouds generated by the sun's rays; भानुं-तिरोधाय – by covering the sun; विजृम्भते – appear alone; तथा – so; आत्म-उदिता-अहंकृतिः – egoism generated by the Self; आत्मतत्त्वं-तिरोधाय – by covering the reality of the Self; स्वयम्-विजृम्भते – appears by itself.

As layers of clouds generated by the sun's rays appear alone (in the sky) by covering the sun itself, so also egoism generated by the Self appears by itself by covering the reality of the Self.

कवलितदिननाथे दुर्दिने सान्द्रमेघैः

व्यथयति हिमझंझावायुरुग्रो यथैतान् ।

अविरततमसात्मन्यावृते मूढबुद्धिं

क्षपयति बहुदुःखैस्तीव्रविक्षेपशक्तिः ॥ १४३ ॥

यथा सान्द्र-मेघैः कवलित-दिननाथे दुर्दिने उग्रः हिम-झंझा-वायु एतान् व्यथयति तथा अविरत-तमसा आत्मनि-आवृते तीव्र-विक्षेप-शक्तिः मूढ-बुद्धिं बहु-दुःखैः क्षपयति ।

यथा – just as; सान्द्र-मेघैः – by dense clouds; कवलित-दिननाथे – when the sun is swallowed; दुर्दिने – on a cloudy day; उग्रः – violent; हिम-झंझा-वायु – cold blasts; एतान् – these people; व्यथयति – trouble; तथा – similarly; अविरत-तमसा – by intense ignorance; आत्मनि-आवृते – when the Atman is hidden; तीव्र-विक्षेप-शक्तिः – the dreadful projecting power; मूढ-बुद्धिं – the foolish man; बहु-दुःखैः – with numerous grieves; क्षपयति – afflicts.

Just as on a cloudy day when the sun is swallowed by dense clouds, violent cold blasts trouble these people, similarly when the Atman is hidden by intense ignorance, the dreadful projecting power afflicts the foolish man with numerous grieves.

एताभ्यामेव शक्तिभ्यां बन्धः पुंसः समागतः ।

याभ्यां विमोहितो देहं मत्वाऽत्मानं भ्रमत्ययम् ॥ १४४ ॥

एताभ्याम शक्तिभ्यां-एव पुंसः बन्धः-समागतः याभ्यां विमोहितःअयम् देहं आत्मानं-मत्वा भ्रमति ।

एताभ्याम – it is from these two (veiling & projecting); शक्तिभ्यां-एव – powers only;

पुंसः – man's; बन्धः-समागतः – bondage has proceeded; याभ्यां – by which; विमोहितः– beguiled;

अयम्-देहं-आत्मानं-मत्वा – he mistakes this body for the Self; भ्रमति – and wanders.

It is from these two (veiling & projecting) powers only man's bondage has proceeded – beguiled by which he mistakes this body for the Self and wanders (from births to deaths).

बीजं संसृतिभूमिजस्य तु तमो देहात्मधीरङ्कुरो

रागः पल्लवमम्बु कर्म तु वपुः स्कन्धोऽसवः शाखिकाः ।

अग्राणीन्द्रियसंहतिश्च विषयाः पुष्पाणि दुःखं फलं

नानाकर्मसमुद्भवं बहुविधं भोक्तात्र जीवः खगः ॥ १४५ ॥

संसृति-भूमिजस्य बीजं तमः, तु देहात्मधीः अङ्कुरः, रागः पल्लवम्, कर्म तु अम्बु, वपुः स्कन्धः, असवः शाखिकाः,

इन्द्रिय-संहतिः अग्राणि, च विषयाः पुष्पाणि, नाना-कर्म-समुद्भवं बहुविधं दुःखं फलं,अत्र भोक्ता जीवः खगः ।

संसृति-भूमिजस्य – of the tree of the world; बीजं – is the seed (i.e. the cause of acceptance of the world); तमः – ignorance; देहात्मधीः – the identification with the body; तु अङ्कुरः – is its spout; रागः – attachment; पल्लवम्– its tender leaves; कर्म – work; तु अम्बु – its water; वपुः – the body; स्कन्धः – its trunk; असवः – the vital forces; शाखिकाः – its branches; इन्द्रिय-संहतिः – the organs; अग्राणि – its twigs; विषयाः – the sense-objects; पुष्पाणि – its flowers; नाना-कर्म-समुद्भवं – due to diverse works; बहुविधं – various; दुःखं – miseries; फलं – are its fruits; च – and; अत्र – here; भोक्ता – the enjoyer; जीवः – the individual soul; खगः – is the bird on it.

Of the tree of the world, ignorance is the seed (i.e. the cause of acceptance of the world is ignorance), the identification with the body is its spout, attachment its tender leaves, work its water, the body its trunk, the vital forces its branches, the organs its twigs, the sense-objects its flowers, various miseries due to diverse works are its fruits, and here the enjoyer- the individual soul is the bird on it.

अज्ञानमूलोऽयमनात्मबन्धो

नैसर्गिकोऽनादिरनन्त ईरितः ।

जन्माप्ययव्याधिजरादिदुःख-

प्रवाहपातं जनयत्यमुष्य ॥ १४६ ॥

अनादिः-अनन्तः ईरितः अयम् अनात्म-बन्धः अज्ञानमूलः नैसर्गिकः अमुष्य

जन्म-अप्यय-व्याधि-जरादि-दुःख-प्रवाह-पातं जनयति ।

अनादिः-अनन्तः – without beginning & end; ईरितः – is described as; अयम् – this; अनात्म-बन्धः – bondage of the non-self; अज्ञानमूलः – springs from ignorance; नैसर्गिकः – naturally; अमुष्य – an individual soul; जन्म-अप्यय-व्याधि-जरादि-दुःख-प्रवाह-पातं – the long train of miseries such as birth, death, disease & decrepitude; जनयति – it subjects to;

This bondage of the non-self springs from ignorance naturally, and is described as without beginning & end. It subjects an individual soul to the long train of miseries such as birth, death, disease & decrepitude.

नास्त्रैर्न शस्त्रैरनिलेन वन्हिना

छेत्तुं न शक्यो न च कर्मकोटिभिः।

विवेकविज्ञानमहासिना विना

धातुः प्रसादेन शितेन मञ्जुना ॥ १४७ ॥

धातुः-प्रसादेन शितेन मञ्जुना विवेक-विज्ञान-महा-असिना विना (अयं बन्धः) न च कर्मकोटिभिः न अस्त्रैः न शस्त्रैः न अनिलेन न वन्हिना छेत्तुं शक्यः।

धातुः-प्रसादेन – through purification of the mind; शितेन – sharpened; मञ्जुना – wonderful विवेक-विज्ञान-महा-असिना – the sword of knowledge that comes of discrimination; विना – except; (अयं बन्धः– this bondage ); न च कर्मकोटिभिः – neither by millions of acts; छेत्तुं शक्यः – can be destroyed; न अस्त्रैः – nor by missiles; न शस्त्रैः – nor by weapons; न अनिलेन – nor by wind; न वन्हिना – nor by fire.

Except the wonderful sword of knowledge that comes of discrimination sharpened through purification of the mind; this bondage can be destroyed neither by millions of acts, nor by missiles, nor by weapons, nor by wind nor by fire.

श्रुतिप्रमाणैकमतेः स्वधर्म

निष्ठा तयैवात्मविशुद्धिरस्य।

विशुद्धबुद्धेः परमात्मवेदनं

तेनैव संसारसमूलनाशः॥ १४८ ॥

श्रुति-प्रमाण-एकमतेः स्व-धर्म-निष्ठा तया-एव आत्म-विशुद्धिः अस्य विशुद्धबुद्धेः परमात्मवेदनं तेन एव संसार-समूल नाशः।

श्रुति-प्रमाण-एकमतेः – one who is passionately devoted to the authority of Vedas; स्व-धर्म-निष्ठा – acquires steadiness in one’s own duty; तया-एव – which alone conducts to; आत्म-विशुद्धिः – the purity of his mind; अस्य-विशुद्धबुद्धेः – this man of pure mind; परमात्मवेदनं – realizes the Supreme-Self; तेन-एव – and by that alone; संसार-समूल – world with its root; नाशः – is destroyed.

One who is passionately devoted to the authority of Vedas acquires steadiness in one’s own duty which alone conducts to the purity of his mind, this man of pure mind realizes the and by that alone Supreme-Self world is destroyed with its root.

कोशैरन्नमयाद्यैः पञ्चभिरात्मा न संवृतो भाति।

निजशक्तिसमुत्पन्नैः शैवालपटलैरिवाम्बु वापीस्थम्॥ १४९॥

आत्मा निज-शक्ति-समुत्पन्नैः अन्नमयाद्यैः पञ्चभिः-कोशैः संवृतः न-भाति शैवाल-पटलैः वापी-स्थम् अम्बु-इव।

आत्मा – the Self; अन्नमयाद्यैः – the material one and the rest; पञ्चभिः-कोशैः – the five sheaths;

संवृतः – covered by; न-भाति – ceases to appear; इव – just like; वापी-स्थम् – of a tank;

अम्बु – the water; निज-शक्ति-समुत्पन्नैः – by its accumulation; शैवाल-पटलैः – of sedge.

Covered by the five sheaths, the material one and the rest, the Self ceases to appear, just like the water of a tank by its accumulation of sedge.

तच्छैवालापनये सम्यक् सलिलं प्रतीयते शुद्धम्।

तृष्णासन्तापहरं सद्यः सौख्यप्रदं परं पुंसः ॥ १५० ॥

तत्-शैवाल-अपनये तृष्णा-सन्तापहरं सद्यः परं सौख्यप्रदं शुद्धम् सलिलं पुंसःसम्यक् प्रतीयते ।

तत्-शैवाल-अपनये – on the removal of that sedge; तृष्णा-सन्तापहरं –that allays the pangs of thirst;

सद्यः – immediate; सौख्यप्रदं – gives joy; परं-शुद्धम् – the perfectly pure; सलिलं – water;

पुंसः – the man; सम्यक् – unobstructed; प्रतीयते – appears before.

On the removal of that sedge the perfectly pure water that allays the pangs of thirst and gives immediate joy, appears unobstructed before the man.

पञ्चानामपि कोशानामपवादे विभात्ययं शुद्धः।

नित्यानन्दैकरसः प्रत्यग्रूपः परः स्वयंज्योतिः ॥ १५१ ॥

पञ्चानाम्-अपि-कोशानाम् अपवादे अयं शुद्धः नित्यानन्दैकरसः प्रत्यक्-रूपः परः स्वयं-ज्योतिः विभाति।

पञ्चानाम्-अपि-कोशानाम् – when all the five sheaths; अपवादे – have been eliminated; अयं – this;

शुद्धः – pure; नित्यानन्दैकरसः – the essence of everlasting & unalloyed bliss;

प्रत्यक्-रूपः – indwelling; परः – supreme; स्वयं-ज्योतिः – self-effulgent; विभाति – appears.

When all the five sheaths have been eliminated - this essence of everlasting & unalloyed bliss, indwelling, supreme, pure and self-effulgent Self appears/shines by Itself.

आत्मानात्मविवेकः कर्तव्यो बन्धमुक्तये विदुषा।

तेनैवानन्दी भवति स्वं विज्ञाय सच्चिदानन्दम्॥ १५२ ॥

विदुषा बन्ध-मुक्तये आत्म-अनात्म-विवेकः-कर्तव्यः, तेन-एव स्वं सत्-चित्-आनन्दम् विज्ञाय आनन्दी-भवति।

विदुषा – the wise one; बन्ध-मुक्तये – to remove one's bondage; आत्म-अनात्म-विवेकः-कर्तव्यः–

should discriminate between the self & the non-Self; तेन-एव – by that alone;

स्वं – one's own self; सत्-चित्-आनन्दम् – Existence-Knowledge-Bliss-Absolute;

विज्ञाय – knowing; आनन्दी-भवति – becomes happy.

To remove one's bondage the wise one should discriminate between the self & the non-Self; by that alone knowing one's own self as Existence-Knowledge-Bliss-Absolute one becomes happy.

मुञ्जादिषीकामिव दृश्यवर्गात्

प्रत्यञ्चमात्मानमसङ्गमक्रियम्।

विविच्य तत्र प्रविलाप्य सर्वं

तदात्मना तिष्ठति यः स मुक्तः ॥ १५३ ॥

यः मुञ्जात्-इषीकां-इव दृश्यवर्गात् प्रत्यञ्चं-असङ्गं-अक्रियं-आत्मानं विविच्य तदा तत्र सर्वं-प्रविलाप्य आत्मना-तिष्ठति स मुक्तः।

यः — who; मुञ्जात्-इषीकां-इव – as one separates a stalk of Munga-grass from its enveloping sheaths; दृश्यवर्गात्-प्रत्यञ्चं-असङ्गं-अक्रियं-आत्मानं – between all sense-objects and the indwelling, unattached & inactive Self; विविच्य – discriminates; तदा – then; तत्र – in It; सर्वं-प्रविलाप्य – by merging everything; आत्मना-तिष्ठति – remains in a state of identity with that-Self; स – he; मुक्तः – indeed is free.

He indeed is free who discriminates between all sense-objects and the indwelling, unattached & inactive Self- as one separates a stalk of Munga-grass from its enveloping sheaths and then remains (as a witness) in a state of identity with that-Self by merging everything in It.

देहोऽयमन्नभवनोऽन्नमयस्तु कोशः
चान्नेन जीवति विनश्यति तद्विहीनः।
त्वक्चर्ममांसरुधिरास्थिपुरीषराशिः
नायं स्वयं भवितुमर्हति नित्यशुद्धः॥ १५४॥

अन्नभवनः देहः तु अन्नमयः कोशः अयं अन्नेन जीवति, तद् विहीनः विनश्यति च।
अयं त्वक्-चर्म-मांस-रुधिर-अस्थिपुरीष-राशिः स्वयं नित्यशुद्धः भवितुम् न अर्हति।

अन्नभवनः – is the product of food; देहः-तु – this body of ours; अन्नमयः-कोशः – comprises of the material sheath; अयं – it; अन्नेन – on food; जीवति – lives; तद्-विहीनः – without it; विनश्यति – dies; च – and; अयं – it; त्वक्-चर्म-मांस-रुधिर-अस्थिपुरीष-राशिः – is a mass of skin, flesh, blood, bones & filth; स्वयं – by itself; नित्यशुद्धः – the eternally pure, self-existent Atman; भवितुम्-न-अर्हति – can never be.

This body of ours is the product of food and comprises of the material sheath; it lives on food and dies without it; it is a mass of skin, flesh, blood, bones & filth and by itself can never be the eternally pure, self-existent Atman.

पूर्वं जनेरधिमृतेरपि नायमस्ति
जातक्षणः क्षणगुणोऽनियतस्वभावः।
नैको जडश्च घटवत्परिदृश्यमानः
स्वात्मा कथं भवति भावविकारवेत्ता॥ १५५॥

अयम् (देहः) जनेः-पूर्वं मृतेः-अधिः अपि न-अस्ति । जातक्षणः क्षणगुणः अनियत-स्वभावः न-एकः च-जडः घटवत्-परिदृश्यमानः भाव-विकार-वेत्ता कथं भवति स्व-आत्मा।

अयम् (देहः) – this body; जनेः-पूर्वं-मृतेः-अधिः-अपि-न – neither before birth nor after death; अस्ति – does exist; जातक्षणः – only between birth & death; क्षणगुणः – is momentary; अनियत-स्वभावः – changeful by nature; न-एकः – manifold, च-जडः – inert; घटवत्-परिदृश्यमानः – perceivable by

senses like a jar; भाव-विकार-वेत्ता – the witness of changes in all things; कथं-भवति – how can it be; स्व-आत्मा – one's own-Self.

This body does exist neither before birth nor after death but only between birth & death and is momentary, changeful by nature, manifold, inert, perceivable by senses like a jar; how can it be one's own-Self the witness of changes in all things?

पाणिपादादिमान्देहो नात्मा व्यङ्गेऽपि जीवनात्।

तत्तच्छक्तेरनाशाच्च न नियम्यो नियामकः ॥ १५६ ॥

पाणि-पादादिमान्-देहः न-आत्मा व्यङ्गे-अपि-जीवनात् तत्-तत्-शक्तेः-अनाशात् नियम्यो न-च-नियामकः।

पाणि-पादादिमान्-देहः – the body consisting of arms, legs etc.; न-आत्मा – cannot be the Atman;

व्यङ्गे-अपि-जीवनात् – for one continues to live even when particular limbs are gone;

तत्-तत्-शक्तेः-अनाशात्–and the different functions of the remaining organism also remain intact;

नियम्यो – the body which is subject to another's rule; न-च-नियामकः – cannot be the Ruler.

The body consisting of arms, legs etc. cannot be the Atman, for one continues to live even when particular limbs are gone, and the different functions of the remaining organism also remain intact; the body which is subject to another's rule, cannot be the Ruler (which is the Self of all or the Atman).

देहतद्धर्मतत्कर्मतदवस्थादिसाक्षिणः।

सत एव स्वतःसिद्धं तद्वैलक्षण्यमात्मनः ॥ १५७ ॥

देह-तद्धर्म-तत्कर्म-तदवस्थादि-साक्षिणः सतः-आत्मनः तत्-वैलक्षण्यम् स्वतः-एव-सिद्धं।

देह-तद्धर्म-तत्कर्म-तदवस्थादि-साक्षिणः – the body, its characteristics, its activities, its states etc. of which It is the witness; सतः-आत्मनः – the Atman as the abiding Reality; तत्-वैलक्षण्यम् – that is different from; स्वतः-एव-सिद्धं – is self-evident.

That the Atman as the abiding Reality is different from the body, its characteristics, its activities, its states etc. of which It is the witness, is self-evident.

शल्यराशिर्मांसलिप्तो मलपूर्णोऽतिकश्मलः।

कथं भवेदयं वेत्ता स्वयमेतद्विलक्षणः ॥ १५८ ॥

अयं (देहः) शल्य-राशिः मांस-लिप्तः मल-पूर्णः अति-कश्मलः, एतत्-विलक्षणः स्वयम्-वेत्ता, कथं-भवेत् ?

अयं (देहः) – this body being; शल्य-राशिः – a pack of bones; मांस-लिप्तः – covered with flesh;

मल-पूर्णः – full of filth; अतिकश्मलः – highly impure; एतत्-विलक्षणः – which is ever distinct;

स्वयम्-वेत्ता – be the self-existent Atman, the knower; कथं-भवेत् – how can.

How can this body being a pack of bones covered with flesh, full of filth and highly impure be the self-existent Atman, the knower which is ever distinct?

त्वङ्मांसमेदोऽस्थिपुरीषराशा-

वहंमतिं मूढजनः करोति।

विलक्षणं वेत्ति विचारशीलो

निजस्वरूपं परमार्थ भूतम् ॥ १५९ ॥

त्वङ्-मांस-मेदो-अस्थि-पुरीष-राशौ मूढजनः अहं-मतिं करोति । विचारशीलः विलक्षणं-निजस्वरूपं परमार्थ-भूतम् वेत्ति ।

त्वङ्-मांस-मेदो-अस्थि-पुरीष-राशौ – a mass of skin, flesh, fat, bones, and filth; मूढजनः – it is the foolish man; अहं-मतिं-करोति –identifies himself-with; विचारशीलः – the man of discrimination; विलक्षणं-निजस्वरूपं – his own Self as ever distinct; परमार्थ-भूतम् – the only reality; वेत्ति – knows.

It is the foolish man who identifies himself-with a mass of skin, flesh, fat, bones, and filth, while the man of discrimination knows his own Self, the only reality as ever distinct.

देहोऽहमित्येव जडस्य बुद्धिः
देहे च जीवे विदुषस्त्वहंधीः ।
विवेकविज्ञानवतो महात्मनो
ब्रह्माहमित्येव मतिः सदात्मनि ॥ १६० ॥

जडस्य-एव अहम्-देहः इति-बुद्धिः, विदुषः-तु देहे-जीवे-च अहंधीः, विवेकविज्ञानवतः महात्मनः सत् आत्मनि अहं-ब्रह्म-एव इति-मतिः ।

जडस्य – the stupid man; अहम्-देहः-एव – 'I am the body only'; इति-बुद्धिः – thinks as; विदुषः – the book-learned man; देहे-जीवे-च – the mixture of body & soul; अहंधीः – identifies himself with; विवेकविज्ञानवतः-तु-महात्मनः – while the sage possessed of realization due to discrimination; सत्-आत्मनि-अहं-ब्रह्म-एव-इति-मतिः – looks upon the eternal Atman as his Self, and thinks, 'I am the Brahman'.

The stupid man thinks as 'I am the body only', the book-learned man identifies himself with the mixture of body & soul while the sage possessed of realization due to discrimination looks upon the eternal Atman as his Self, and thinks, 'I am the Brahman'.

अत्रात्मबुद्धिं त्यज मूढबुद्धे
त्वङ्मांसमेदोऽस्थिपुरीषराशौ ।
सर्वात्मनि ब्रह्मणि निर्विकल्पे
कुरुष्व शांति परमां भजस्व ॥ १६१ ॥

मूढ-बुद्धे अत्र-त्वङ्-मांस-मेदः-अस्थि-पुरीष-राशौ आत्मबुद्धिं-त्यज सर्वात्मनि-निर्विकल्पे-ब्रह्मणि *आत्मबुद्धिं*-कुरुष्व *एवं* परमां-शांति भजस्व ।

मूढ-बुद्धे – O foolish person; अत्र-त्वङ्-मांस-मेदः-अस्थि-पुरीष-राशौ – here with this bundle of skin, flesh, fat, bones, & filth; आत्मबुद्धिं-त्यज – give up your identification; सर्वात्मनि-निर्विकल्पे-ब्रह्मणि – the Absolute Brahman the Self of all; *आत्मबुद्धिं*-कुरुष्व – instead identify yourself with; *एवं* – and; परमां-शांति – supreme Peace; भजस्व – experience.

O foolish person, give up your identification here with this bundle of skin, flesh, fat, bones, & filth, instead identify yourself with the Absolute Brahman the Self of all and experience supreme Peace.

देहेन्द्रियादावसति भ्रमोदितां

विद्वानहंतां न जहाति यावत्।

तावन्न तस्यास्ति विमुक्तिवार्ता-

प्यस्त्वेष वेदान्तनयान्तदर्शी ॥ १६२ ॥

यावत् देहेन्द्रियादौ भ्रम-उदितां असति अहंतां न जहाति तावत् विद्वान् वेदान्त-नयान्तदर्शी अस्तु तस्य विमुक्तिवार्ता अपि न अस्ति।

यावत् – so long as; असति-देहेन्द्रियादौ – body-organs etc. which are unreal; भ्रम-उदितां-अहंतां – his mistaken identification with; न-जहाति– does not give up; विद्वान् – a wise one; तावत् – till then; वेदान्त-नयान्तदर्शी – only a scholar of Vedanta-philosophy; अस्तु – he remains; तस्य-विमुक्तिवार्ता – talk of emancipation for him; अपि – even; न-अस्ति – there can not be;

So long as a wise one does not give up his mistaken identification with body-organs etc. which are unreal, he remains only a scholar of Vedanta-philosophy till then there can not be even talk of emancipation for him.

छायाशरीरे प्रतिबिम्बगात्रे

यत्स्वप्नदेहे हृदि कल्पिताङ्गे।

यथात्मबुद्धिस्तव नास्ति काचि-

ज्जीवच्छरीरे च तथैव माऽस्तु ॥ १६३ ॥

यथा छायाशरीरे प्रतिबिम्बगात्रे यत्-स्वप्नदेहे हृदि-कल्पिताङ्गे तव काचित् आत्मबुद्धिः न-अस्ति तथा-एव जीवत्-शरीरे-च मा-अस्तु।

यथा – just as; छायाशरीरे – the shadow of your body; प्रतिबिम्बगात्रे – the image of your body; स्वप्नदेहे – the dream body; हृदि-कल्पिताङ्गे – the body that you imagine in your heart; तव-न-अस्ति – you never have; काचित् – any; यत्-आत्मबुद्धिः – identification with;– तथा-एव – likewise; जीवत्-शरीरे-च – with your-living body also मा-अस्तु – cease you to do.

Just as you never have any identification with the shadow of your body, the image of your body, the dream body or the body that you imagine in your heart; cease you to do likewise with your-living body also.

देहात्मधीरेव नृणामसद्धियां

जन्मादिदुःखप्रभवस्य बीजम्।

यतस्ततस्त्वं जहि तां प्रयत्नात्

त्यक्ते तु चित्ते न पुनर्भवाशा ॥ १६४ ॥

यतः देहात्मधीः-एव असद्-धियां-नृणाम् जन्मादि-दुःख-प्रभवस्य-बीजम् ततः त्वं प्रयत्नात् तां जहि चित्ते-तु-त्यक्ते पुनः-न भवाशा।

यतः – as; देहात्मधीः-एव – identification with the body alone; असद्-धियां-नृणाम् – of people who are attached to the unreal; जन्मादि-दुःख-प्रभवस्य-बीजम् – is the root that produces the misery of birth etc.; ततः –therefore; त्वं – you; प्रयत्नात् – with utmost care; तां – this; जहि – destroy; चित्ते-तु-त्यक्ते – (when this identification caused by) the mind is given up; पुनः-न – there is no more; भवाशा – chance for rebirth.

As identification with the body alone is the root that produces the misery of birth etc. of people who are attached to the unreal; therefore destroy you this with utmost care. (When this identification caused by) the mind is given up there is no more chance for rebirth.

कर्मेन्द्रियैः पञ्चभिरञ्चितोऽयं
प्राणो भवेत्प्राणमयस्तु कोशः
येनात्मवानन्नमयोऽनुपूर्णः
प्रवर्ततेऽसौ सकलक्रियासु ॥ १६५ ॥

अयं-प्राणः-तु पञ्चभिः-कर्मेन्द्रियैः अञ्चितः प्राणमयः-कोशः-भवेत् येन अनुपूर्णः आत्मवान् असौ-अन्नमयः सकलक्रियासु प्रवर्तते ।

अयं-प्राणः-तु – this Prana – the vital force, with which we are all familar; पञ्चभिः-कर्मेन्द्रियैः – the five organs of action; अञ्चितः – coupled with; प्राणमयः-कोशः-भवेत् – forms the vital sheath; येन – by which; अनुपूर्णः – permeated; आत्मवान् – as if it were living; असौ-अन्नमयः –the material sheath; सकलक्रियासु – in all activities; प्रवर्तते – engages itself;

This Prana – the vital force, with which we are all familiar, coupled with the five organs of action, forms the vital sheath, permeated by which the material sheath engages itself in all activities as if it were living.

नैवात्मापि प्राणमयो वायुविकारो
गन्ताऽऽगन्ता वायुवदन्तर्बहिरेषः ।
यस्मात्किञ्चित्क्वापि न वेत्तीष्टमनिष्टं
स्वं वान्यं वा किञ्चन नित्यं परतन्त्रः ॥ १६६ ॥

एषः-प्राणमयः-(कोशः)-अपि आत्मा-न-एव, वायुविकारः यस्मात् वायुवत् अन्तः-बहिः गन्ता-आगन्ता, किञ्चित् क्व-अपि स्वं-वा वा-इष्टं-अनिष्टं किञ्चन-अन्यं-वा न-वेत्ती (तथा) नित्यं परतन्त्रः ।

एषः-प्राणमयः-(कोशः)-अपि – even this vital-sheath; आत्मा-न – and not the Self; वायुविकारः-एव – also is a modification of vital-force; यस्मात् – because; वायुवत् – like the vital-force; अन्तः-बहिः-गन्ता-आगन्ता – it enters into and comes out of body; किञ्चित् – in the least; स्वं-वा – either its own; इष्टं-अनिष्टं-वा – weal and woe; किञ्चन-अन्यं-वा – of any other; क्व-अपि-न-वेत्ती – never knows; नित्यं-परतन्त्रः – being eternally dependent on the Self.

Even this vital-sheath also is a modification of vital-force and not the Self, because it enters into and comes out of body like the vital-force, and never knows either its own weal and woe or that of any other, being eternally dependent on the Self.

ज्ञानेन्द्रियाणि च मनश्च मनोमयः स्यात्

कोशो ममाहमिति वस्तुविकल्पहेतुः ।

संज्ञादिभेदकलनाकलितो बलीयां-

स्तत्पूर्वकोशमभिपूर्य विजृम्भते यः ॥ १६७ ॥

ज्ञानेन्द्रियाणि-च मनः-च मनोमयः-कोशः-स्यात्, 'अहं-मम्' -इति वस्तुविकल्पहेतुः संज्ञादिभेद्-कलना-आकलितः बलीयान्, यः तत्-पूर्वकोशं अभिपूर्य विजृम्भते ।

ज्ञानेन्द्रियाणि-च – the organs of knowledge; मनः-च – together with the mind; मनोमयः-कोशः-स्यात् – forms the mental-sheath; 'अहं-मम्' -इति – such as 'I and mine'; वस्तुविकल्पहेतुः – the cause of the diversity of things; संज्ञादिभेद्-कलना-आकलितः – endued with the faculty of imagination of name etc,; बलीयान् – it is powerful; यः – which; तत्-पूर्वकोशं-अभिपूर्य – as permeating the preceding; विजृम्भते – manifests itself.

The organs of knowledge together with the mind form the mental-sheath - the cause of the diversity of things such as 'I and mine'. It is powerful and endued with the faculty of imagination of name etc.; which manifests itself as permeating the preceding, i.e. the vital-sheath.

पञ्चेन्द्रियैः पञ्चभिरेव होतृभिः

प्रचीयमानो विषयाज्यधारया ।

जाज्वल्यमानो बहुवासनेन्धनैः

मनोमयाग्निर्दहति प्रपञ्चम् ॥ १६८ ॥

पञ्चभिः-होतृभिः-एव-पञ्चेन्द्रियैः बहु-वासना-इन्धनैः जाज्वल्यमानः विषय-आज्य-धारया प्रचीयमानः मनोमय-अग्निः प्रपञ्चम् वहति ।

पञ्चभिः-होतृभिः-एव-पञ्चेन्द्रियैः – by the five sense-organs serving as five priests; बहु-वासना-इन्धनैः –with the fuel of numerous desires; जाज्वल्यमानः – set ablaze; विषय-आज्य-धारया – with the offering in the form of the stream of oblations of the sense-objects; प्रचीयमानः – increasing; मनोमय-अग्निः – the mental sheath which is the sacrificial fire; प्रपञ्चम् – this phenomenal universe; वहति – bring about;

The mental sheath which is the sacrificial fire, set ablaze with the fuel of numerous desires, increasing with the offering, in the form of the stream of oblations of the sense-objects, offered by the five sense-organs serving as five priests, bring about this phenomenal universe.

न ह्यस्त्यविद्या मनसोऽतिरिक्ता

मनो ह्यविद्या भवबन्धहेतुः ।

तस्मिन्विनष्टे सकलं विनष्टं

विजृम्भितेऽस्मिन्सकलं विजृम्भते ॥ १६९ ॥

मनसः हि अतिरिक्ता अविद्या-न-अस्ति । मनः-हि भवबन्धहेतुः अविद्या, तस्मिन-विनष्टे सकलं-विनष्टं,

अस्मिन्-विजृम्भिते सकलं-विजृम्भते ।

मनसः-अतिरिक्ता – outside the mind; अविद्या-हि-न-अस्ति – there does not exist any ignorance;

मनः-हि – the mind alone is; भवबन्धहेतुः – the cause of the bondage of transmigration;

अविद्या – the ignorance; तस्मिन-विनष्टे –when tht is destroyed; सकलं-विनष्टं – all else is destroyed; अस्मिन्-विजृम्भिते – when it is manifested; सकलं-विजृम्भते – everything else is manifested.

There does not exist any ignorance outside the mind; the mind alone is the cause of the bondage of transmigration-the ignorance; when tht is destroyed all else is destroyed; and when it is manifested everything else is manifested.

स्वप्नेऽर्थशून्ये सृजति स्वशक्त्या

भोक्त्रादिविश्वं मन एव सर्वम् ।

तथैव जाग्रत्यपि नो विशेषः

तत्सर्वमेतन्मनसो विजृम्भणम् ॥ १७० ॥

अर्थशून्ये-स्वप्ने मन-एव स्वशक्त्या सर्वम् भोक्त्रादिविश्वं सृजति । तथा-एव जाग्रति-अपि नो-विशेषः

तत् एतत्-सर्वम् मनसः-विजृम्भणम् ।

अर्थशून्ये-स्वप्ने – in dreams where there is no actual contact with the external world;

मन-एव – the mind alone; स्वशक्त्या – by its own power;

सर्वम्-भोक्त्रादिविश्वं – the whole universe consisting of the experiencer etc.; सृजति – creates;

तथा-एव – similarly; जाग्रति-अपि – in the waking state also; नो-विशेषः – there is no difference;

ततः – therefore; एतत्-सर्वम् – this entire (phenomenal universe);

मनसः-विजृम्भणम् – is the projection of the mind.

In dreams - where there is no actual contact with the external world, the mind alone creates the whole universe consisting of the experiencer etc. by its own power; similarly in the waking state also there is no difference; therefore this entire (phenomenal universe) is the projection of the mind.

सुषुप्तिकाले मनसि प्रलीने

नैवास्ति किञ्चित्सकलप्रसिद्धेः ।

अतो मनःकल्पित् एव पुंसः

संसार एतस्य न वस्तुतोऽस्ति ॥ १७१ ॥

सुषुप्तिकाले मनसि-प्रलीने किञ्चित्-एव न-अस्ति (इति) सकल-प्रसिद्धेः,

अतः एतस्य-पुंसः संसारः मनः-कल्पित्-एव, वस्तुतः-न-अस्ति ।

सुषुप्तिकाले – in dreamless sleep; मनसि-प्रलीने – when the mind is reduced to the causal state; किञ्चित्-एव न-अस्ति – there exists nothing (for the person asleep); (इति) सकल-प्रसिद्धेः – as is evident from universal experience; अतः – hence; एतस्य-पुंसः-संसारः – this man's relative existence; मनः-कल्पित्-एव – is simply the creation of his mind; वस्तुतः-न-अस्ति – has no objective reality.

In dreamless sleep when the mind is reduced to the causal state, there exists nothing (for the person asleep), as is evident from universal experience; hence this man's relative existence is simply the creation of his mind, and has no objective reality.

वायुनाऽऽनीयते मेघः पुनस्तेनैव नीयते ।

मनसा कल्प्यते बन्धो मोक्षस्तेनैव कल्प्यते ॥ १७२ ॥

मेघः वायुना आनीयते, पुनः-तेन-एव नीयते, (तथा) बन्धः मनसा कल्प्यते, तेन-एव मोक्षः कल्प्यते ।

मेघः – clouds; वायुना – by the wind; आनीयते – are brought in; पुनः-तेन-एव – again by the same; नीयते – driven away; (तथा) – similarly; बन्धः – man's bondage; मनसा – by the mind; कल्प्यते – is caused; तेन-एव – by that alone; मोक्षः – liberation too; कल्प्यते – is caused.

Clouds are brought in by the wind and again driven away by the same-wind; similarly, man's bondage is caused by the mind, and liberation too is caused by that-mind alone.

देहादिसर्वविषये परिकल्प्य रागं

बध्नाति तेन पुरुषं पशुवद्गुणेन ।

वैरस्यमत्र विषवत् सुवुधाय पश्चाद्

एनं विमोचयति तन्मन एव बन्धात् ॥ १७३ ॥

(तत्-मन-प्रथमं) देहादि-सर्वविषये रागं परिकल्प्य तेन-गुणेन पशुवत् पुरुषं-बध्नाति । पश्चात् अत्र विषवत् वैरस्यम सु-विधाय तत्-मन-एव एनं-पुरुषं बन्धात्-विमोचयति ।

(मन-प्रथमं) – the mind first; देहादि-सर्वविषये – for the body and all other sense-objects; रागं – an attachment in man; परिकल्प्य – by creating; तेन-गुणेन – through that attachment; पशुवत् – like a beast by means of ropes; पुरुषं-बध्नाति – binds him; पश्चात् – latter; अत्र – for these sense-objects; विषवत् – as if they were poison; वैरस्यम – an utter distaste; सु-विधाय – by creating; तत्-मन-एव – the self-same mind only; एनं-पुरुषं-बन्धात्-विमोचयति – frees him from the bondage.

By creating an attachment in man for the body and all other sense-objects, (the mind first) binds him through that attachment like a beast by means of ropes; and latter by creating an utter distaste for these sense-objects as if they were poison, the self-same mind only frees him from the bondage.

तस्मान्मनः कारणमस्य जन्तोः

बन्धस्य मोक्षस्य च वा विधाने ।

बन्धस्य हेतुर्मलिनं रजोगुणैः

मोक्षस्य शुद्धं विरजस्तमस्कम् ॥ १७४ ॥

तस्मात् अस्य-जन्तोः बन्धस्य-च-मोक्षस्य-वा-विधाने कारणम्-मनः-एव ।

रजोगुणैः-मलिनं बन्धस्य-(हेतुः-तथा) विरजः-तमस्कम् शुद्धं मोक्षस्य-हेतुः ।

तस्मात् – therefore; अस्य-जन्तोः-बन्धस्य-च-मोक्षस्य-वा-विधाने – that brings about man's bondage or liberation; कारणम्-मनः-एव – the mind is the only cause; रजोगुणैः-मलिनं – when tainted by the effects of rajas; बन्धस्य-हेतुः – it leads to bondage; तथा – and; विरजः-तमस्कम् – divested of the rajas & tamas elements; शुद्धं – when pure; मोक्षस्य-हेतुः – it conduces to the liberation.

Therefore the mind is the only cause that brings about man's bondage or liberation; when tainted by the effects of rajas it leads to bondage, and when pure - divested of the rajas & tamas elements it conduces to the liberation.

विवेकवैराग्यगुणातिरेका-

च्छुद्धत्वमासाद्य मनो विमुक्त्यै ।

भवत्यतो बुद्धिमतो मुमुक्षो-

स्ताभ्यां दृढाभ्यां भवितव्यमग्रे ॥ १७५ ॥

विवेक-वैराग्य-गुणातिरेकात् मनः शुद्धत्वम्-आसाद्य विमुक्त्यै-भवति ।अतः बुद्धिमतः-मुमुक्षोः अग्रे ताभ्यां-दृढाभ्यां भवितव्यम ।

विवेक-वैराग्य-गुणातिरेकात् – through preponderance of discrimination & renunciation; मनः – the mind; शुद्धत्वम्-आसाद्य – attaining purity; विमुक्त्यै-भवति – makes for liberation; अतः – hence; बुद्धिमतः-मुमुक्षोः – the wise seeker after liberation; अग्रे – must first; ताभ्यां-दृढाभ्यां-भवितव्यम – strengthen these two.

Attaining purity through preponderance of discrimination & renunciation, the mind makes for liberation. Hence the wise seeker after liberation must first strengthen these two.

मनो नाम महाव्याघ्रो विषयारण्यभूमिषु ।

चरत्यत्र न गच्छन्तु साधवो ये मुमुक्षवः ॥ १७६ ॥

विषय-अरण्यभूमिषु मनः-नाम-महाव्याघ्रः चरति । अत्र ये साधवः मुमुक्षवः न-गच्छन्तु ।

विषय-अरण्यभूमिषु – in the forest-tract of sense-pleasures; मनः-नाम-महाव्याघ्रः – a huge tiger called mind; चरति – there prowls; अत्र – there; ये – who; साधवः – good people; मुमुक्षवः – who have longing for liberation; न-गच्छन्तु – never go.

In the forest-tract of sense-pleasures *there* prowls a huge tiger called mind. Let good people who have longing for liberation never go there.

मनः प्रसूते विषयानशेषान्

स्थूलात्मना सूक्ष्मतया च भोक्तुः ।

शरीरवर्णाश्रमजातिभेदान्

गुणक्रियाहेतुफलानि नित्यम् ॥ १७७ ॥

मनः भोक्तुः शरीर-वर्ण-आश्रम-जाति-भेदान् अशेषान्-विषयान स्थूलात्मना सूक्ष्मतया गुण-क्रिया-हेतु-फलानि च नित्यम् प्रसूते ।

मनः – the mind; भोक्तुः – for the experiencer; शरीर-वर्ण-आश्रम-जाति-भेदान् – the differences of body, caste, order of life, & tribe; अशेषान्-विषयान – all sense-objects without exception; स्थूलात्मना – gross in the waking state; सूक्ष्मतया – fine in the dream state; गुण-क्रिया-हेतु-फलानि – the varieties of qualification, action, motives & results; च – as well as; नित्यम् – continually; प्रसूते – produces.

The mind continually produces for the experiencer the differences of body, caste, order of life, & tribe, the varieties of qualification, action, motives & results, as well as all sense-objects without exception - gross in the waking state & fine in the dream state.

असंगचिद्रूपममुं विमोह्य

देहेन्द्रियप्राणगुणैर्निबद्ध्य ।

अहंममेति भ्रमयत्यजस्रं

मनः स्वकृत्येषु फलोपभुक्तिषु ॥ १७८ ॥

असंग-चिद्-रूपम् अमुं विमोह्य देह-इन्द्रिय-प्राण-गुणैः निबध्य स्वकृत्येषु 'अहं-मम'-इति फल-उपभुक्तिषु मनः अजस्रं भ्रमयति ।

असंग-चिद्-रूपम् – which is unattached Pure Intelligence; अमुं – the soul-Jiva; विमोह्य – deluding; देह-इन्द्रिय-प्राण-गुणैः – by attributes such as body, organs & vital-force; निबध्य – binding it; स्वकृत्येषु – of results achieved by own-self; 'अहं-मम'-इति – with ideas of "me" & "mine"; फल-उपभुक्तिषु – amidst the varied enjoyment; मनः – the mind; अजस्रं – भ्रमयति – causes it to wander.

Deluding the soul-Jiva, which is unattached Pure Intelligence, and binding it by attributes such as body, organs & vital-force, the mind causes it to wander, with ideas of "me" & "mine", amidst the varied enjoyment of results achieved by own-self.

अध्यासदोषात्पुरुषस्य संसृतिः

अध्यासबन्धस्त्वमुनैव कल्पितः ।

रजस्तमोदोषवतोऽविवेकिनो

जन्मादिदुःखस्य निदानमेतत् ॥ १७९ ॥

पुरुषस्य अध्यासदोषात् संसृतिः अध्यासबन्धः अमुना-एव-तु-कल्पितः ।

रजः-तमः-दोषवतः अविवेकिनः जन्मादि-दुःखस्य एतत् निदानम् ।

पुरुषस्य – man's; अध्यासदोषात् – is due to the evil of super-imposition; संसृतिः – transmigration;

अध्यासबन्धः – the bondage of super-imposition; अमुना-एव-तु-कल्पितः – is created by the mind

alone; रजः-तमः-दोषवतः – who is tainted by rajas & tamas; अविवेकिनः – of non-discriminating

one; जन्मादि-दुःखस्य – of misery of birth etc.; एतत् – is this (mind-itself); निदानम् – the cause.

Man's transmigration is due to the evil of super-imposition and the bondage of super-imposition is created by the mind alone. The cause of misery of birth etc– of non-discriminating one who is tainted by rajas & tamas is this (mind-itself).

अतः प्राहुर्मनोऽविद्यां पण्डितास्तत्त्वदर्शिनः ।

येनैव भ्राम्यते विश्वं वायुनेवाभ्रमण्डलम् ॥ १८० ॥

अतः तत्त्वदर्शिनः पण्डिताः मनः अविद्यां प्राहुः, येन एव वायुना अभ्रमण्डलम् इव विश्वं भ्राम्यते ।

अतः – hence; तत्त्वदर्शिनः – who havefathomed its secret; पण्डिताः – sages; मनः – the mind;

अविद्यां – ignorance; प्राहुः – have designated as; येन – by which; एव – alone;

वायुना – by the wind; अभ्रमण्डलम् – masses of clouds; इव – like; विश्वं – the universe;

भ्राम्यते – is moved to & fro.

Hence sages who have fathomed its secret have designated the mind as ignorance, by which alone the universe is moved to & fro, like masses of clouds by the wind.

तन्मनःशोधनं कार्यं प्रयत्नेन मुमुक्षुणा ।

विशुद्धे सति चैतस्मिन्मुक्तिः करफलायते ॥ १८१ ॥

मुमुक्षुणा प्रयत्नेन तत्-मनः शोधनं कार्यं, तस्मिन-विशुद्धे-सति-च मुक्तिः कर-फलायते ।

मुमुक्षुणा – the seeker after liberation; प्रयत्नेन – carefully; तत्-मनः – the mind;

शोधनं-कार्यं – must purify; तस्मिन-विशुद्धे-सति-च – and when that is purified; मुक्तिः – the liberation;

कर-फलायते – as easy of access as a fruit on the palm of one's hand.

The seeker after liberation must purify the mind carefully; and when that is purified the liberation as easy of access as a fruit on the palm of one's hand.

मोक्षैकसक्त्या विषयेषु रागं

निर्मूल्य संन्यस्य च सर्वकर्म ।

सच्छ्रद्धया यः श्रवणादिनिष्ठो

रजःस्वभावं स धुनोति बुद्धेः ॥ १८२ ॥

यः मोक्ष-एक-सक्त्या विषयेषु रागं निर्मूल्य च सर्वकर्म संन्यस्य सच्छ्रद्धया श्रवणादिनिष्ठः सः बुद्धेः रजः-स्वभावं धुनोति ।

यः – who; मोक्ष-एक-सक्त्या – by means of one-pointed devotion to the liberation;

विषयेषु – to sense-objects; रागं – the attachment; निर्मूल्य – roots out; च – and;

सर्वकर्म – all actions; संन्यस्य – renounces; सच्छ्रद्धया – with faith in the Real Brahman;

श्रवणादिनिष्ठः – regularly practices hearing etc.; सः – he; बुद्धेः – of the intellect;

रजः-स्वभावं – the rajasik nature; धुनोति – succeeds in purging.

He who by means of one-pointed devotion to the liberation roots out the attachment to sense-objects, renounces all actions, and with faith in the Real Brahman regularly practices hearing etc., succeeds in purging the rajasik nature of the intellect.

मनोमयो नापि भवेत्परात्मा

ह्याद्यन्तवत्त्वात्परिणामिभावात्।

दुःखात्मकत्वाद्विषयत्वहेतोः

द्रष्टा हि दृश्यात्मतया न दृष्टः॥ १८३॥

आदि-अन्तवत्त्वात् परिणामि-भावात् दुःखात्मकत्वात् विषयत्वहेतोः हि, मनोमयः अपि परात्मा न-भवेत्।

न-हि-द्रष्टा दृश्यात्मतया दृष्टः।

परिणामि-भावात् – is subject to modifications; दुःखात्मकत्वात् – is characterized by pain & sufferings; विषयत्वहेतोः – is an object; आदि-अन्तवत्त्वात्-हि – because it has a beginning & an end;

मनोमयः – the mental sheath; अपि – also; परात्मा – the Supreme-Self; न-भवेत् – can not be;

न-हि-द्रष्टा – the subject can never be; दृश्यात्मतया-दृष्टः – identified with the object of knowledge.

The mental sheath also can not be the Supreme-Self because it has a beginning & an end, is subject to modifications, is characterized by pain & sufferings, and is an object. The subject can never be identified with the object of knowledge.

बुद्धिर्बुद्धीन्द्रियैः सार्धं सवृत्तिः कर्तृलक्षणः।

विज्ञानमयकोशः स्यात्पुंसः संसारकारणम्॥ १८४॥

सवृत्तिः-बुद्धि बुद्धिः-इन्द्रियैः-सार्धं कर्तृलक्षणः विज्ञानमय-कोशः-स्यात् पुंसः संसारकारणम्।

सवृत्तिः-बुद्धि – the intellect with its modifications, बुद्धिः-इन्द्रियैः-सार्धं – the organs of knowledge;

कर्तृलक्षणः – having the characteristics which are; विज्ञानमय-कोशः-स्यात् – forms *Vijnanamaya kosha* or knowledge sheath; पुंसः – of the agent; संसारकारणम् – the cause of man's transmigration.

The intellect with its modifications and the organs of knowledge forms *Vijnanamaya kosha* or knowledge sheath of the agent, having the characteristics which are the cause of man's transmigration.

अनुव्रजच्चित्प्रतिबिम्बशक्तिः

विज्ञानसंज्ञः प्रकृतेर्विकारः।

ज्ञानक्रियावानहमित्यजस्रं

देहेन्द्रियादिष्वभिमन्यते भृशम्॥ १८५॥

अनुव्रजत्-चित्प्रतिबिम्बशक्तिः प्रकृतेः-विकारः विज्ञानसंज्ञः ज्ञानक्रियावान अजस्रं भृशम् देहेन्द्रियादिषु 'अहं'-इति अभिमन्यते ।

अनुव्रजत्-चित्प्रतिबिम्बशक्तिः – which seems to be followed by a reflection of the power of chit – the consciousness; प्रकृतेः-विकारः – is a modification of Prakrti – the nature; विज्ञानसंज्ञः – known as the knowledge sheath; ज्ञानक्रियावान – being endowed with the function of knowledge; अजस्रं – always; भृशम् – wholly; देहेन्द्रियादिषु – with the body, organs etc,; 'अहं'-इति – as 'me'; अभि मन्यते – identifies itself.

This knowledge sheath, which seems to be followed by a reflection of the power of chit – the consciousness is a modification of Prakrti – the nature, and being endowed with the function of knowledge always wholly identifies itself as 'me' with the body, organs etc.

अनादिकालोऽयमहंस्वभावो
जीवः समस्तव्यवहारवोढा ।
करोति कर्माण्यपि पूर्ववासनः
पुण्यान्यपुण्यानि च तत्फलानि ॥ १८६ ॥

भुङ्क्ते विचित्रास्वपि योनिषु व्रज-
न्नायाति निर्यात्यध ऊर्ध्वमेषः ।
अस्यैव विज्ञानमयस्य जाग्रत्-
स्वप्नाद्यवस्थाः सुखदुःखभोगः ॥ १८७ ॥

अन्-आदिकालः अहं-स्वभावः अयम्-जीवः समस्तव्यवहारवोढा । पूर्व-वासनः पुण्यानि-अपुण्यानि-कर्माणि-अपि करोति तत् फलानि भुङ्क्ते च । एषः विचित्रासु-अपि-योनिषु व्रजन् अधः-ऊर्ध्वम्-आयाति-निर्याति ।अस्य विज्ञानमयस्य-एव जाग्रत्-स्वप्नादि-अवस्थाः सुख-दुःख-भोगः ।

अन्-आदिकालः – without beginning; अहं-स्वभावः – characterized by egoism; अयम्-जीवः – this jiva – an individual soul; समस्तव्यवहारवोढा – carries on all the activities on the relative plane; पूर्व-वासनः – through previous desires; पुण्यानि-अपुण्यानि-कर्माणि – good & evil actions; करोति – it performs; तत् – their; फलानि-अपि – results also; भुङ्क्ते – experiences; च – and; एषः – it; विचित्रासु-अपि-योनिषु – in various species; व्रजन् – being born; अधः-ऊर्ध्वम्-आयाति-निर्याति – it comes-up & goes-down; अस्य-विज्ञानमयस्य-एव – this knowledge sheath itself has; जाग्रत्-स्वप्नादि-अवस्थाः – waking, dream & other states, सुख-दुःख-भोगः – experiences of joy & grief.

This jiva – an individual soul which is without beginning and characterized by egoism, carries on all the activities on the relative plane. Through previous desires it performs good & evil actions and experiences their results also. Being born in various species it comes-up & goes-down. This knowledge sheath itself has waking, dream & other states and experiences of joy & grief.

देहादिनिष्ठाश्रमधर्मकर्म-

गुणाभिमानः सततं ममेति ।

विज्ञानकोशोऽयमतिप्रकाशः

प्रकृष्टसान्निध्यवशात्परात्मनः ।

अतो भवत्येष उपाधिरस्य

यदात्मधीः संसरति भ्रमेण ॥ १८८ ॥

परात्मनः प्रकृष्ट-सान्निध्यवशात् अयम-विज्ञानकोशः अतिप्रकाशः देहादिनिष्ठ-आश्रम-धर्म-कर्म-गुणाभिमानः सततं मम-इति ।अतः एषः अस्य उपाधिः-भवति, यद्-आत्मधीः भ्रमेण संसरति ।

परात्मनः – to the Supreme-Self; प्रकृष्ट-सान्निध्यवशात् – owing to its close proximity; अयम-विज्ञानकोशः – this knowledge sheath; अतिप्रकाशः – being exceedingly effulgent; देहादिनिष्ठ-आश्रम-धर्म-कर्म-गुणाभिमानः – mistakes itself with the duties, functions, and attributes of the order of life, which belong to the body; सततं – always; मम-इति – as its own; अतः – therefore; अस्य – on the Self; एषः-उपाधिः-भवति – it becomes a superimposition; यद्-आत्मधीः – which identifying Itself with it; भ्रमेण – through delusion; संसरति – suffers transmigration;

Owing to its close proximity to the Supreme-Self being exceedingly effulgent this knowledge sheath identifying itself with It becomes a superimposition on the Self (to form an individual-soul), which always mistakes itself with the duties, functions, and attributes of the order of life, which belong to the body, as its own, and therefore suffers transmigration through delusion.

योऽयं विज्ञानमयः प्राणेषु हृदि स्फुरत्स्वयं ज्योतिः ।

कूटस्थः सन्नात्मा कर्ता भोक्ता भवत्युपाधिस्थः ॥ १८९ ॥

यः स्वयं-स्फुरत्-ज्योतिः प्राणेषु हृदि विज्ञानमयः ।

(सः)-अयं आत्मा-कूटस्थः-सन् उपाधिस्थः कर्ता-भोक्ता-भवति ।

यः – which is; स्वयं-स्फुरत्-ज्योतिः – the self-shining-flame (Ref. CWSv-3); प्राणेषु – in the midst of the *Prana*; हृदि – within the heart; विज्ञानमयः – the Knowledge sheath; (सः)-अयं-आत्मा – that this Atman; कूटस्थः-सन् – eventhough immutable; उपाधिस्थः – owing to Its superimposition; कर्ता-भोक्ता-भवति – becomes the agent and experiencer.

The self-shining-flame which is in the midst of the *Prana* – the Knowledge sheath within the heart, that this Atman eventhough immutable becomes the agent and experiencer owing to Its' superimposition.

स्वयं परिच्छेदमुपेत्य बुद्धेः

तादात्म्यदोषेण परं मृषात्मनः ।

सर्वात्मकः सन्नपि वीक्षते स्वयं

स्वतः पृथक्त्वेन मृदो घटानिव ॥ १९० ॥

सर्वात्मकः-सन्-अपि बुद्धेः परिच्छेदं-स्वयं-उपेत्य परं मृषात्मनः-तादात्म्यदोषेण मृदः-घटान्-इव स्वतः-स्वयं-पृथक्त्वेन-वीक्षते ।

सर्वात्मकः-सन्-अपि – though the Self of everything that exists; बुद्धेः– of the knowledge sheath; स्वयं-परिच्छेदं-उपेत्य – Itself assuming the limitations; परं – the Supreme Atman; मृषात्मनः-तादात्म्यदोषेण – wrongly identifying Itself with this totally unreal entity; मृदः-घटान्-इव – like earthen jars from the clay of which they are made; स्वयं-स्वतः-पृथक्त्वेन-वीक्षते – looks upon Itself as something different.

Though the Self of everything that exists, the Supreme Atman, Itself assuming the limitations of the knowledge sheath and wrongly identifying Itself with this totally unreal entity, looks upon Itself as something different - like earthen jars from the clay of which they are made.

उपाधिसम्बन्धवशात्परात्मा
ह्युपाधिधर्माननुभाति तद्गुणः ।
अयोविकारानविकारिवन्हिवत्
सदैकरूपोऽपि परः स्वभावात् ॥ १९१ ॥

परात्मा स्वभावात् हि परः सद् एकरूपः अपि उपाधि-सम्बन्धवशात् तद्गुणः उपाधिधर्मान् अनुभाति *यथा* अयोविकारान् अविकारिवन्हिवत् ।

परात्मा – the Supreme Self; स्वभावात्-हि-परः-सद्-एकरूपः-अपि – even though naturally perfect and eternally unchanging; उपाधि-सम्बन्धवशात् – owing to Its connection with the superimpositions; तद्गुणः-उपाधिधर्मान्-अनुभाति – assumes the qualities of superimposition and appears to act just as they do; *यथा* – like; अयोविकारान्-अविकारिवन्हिवत् – the changeless fire assumes the modifications of the iron which it turns red-hot.

Owing to Its connection with the superimpositions, the Supreme Self, even though naturally perfect and eternally unchanging, assumes the qualities of superimposition and appears to act just as they do - like the changeless fire assumes the modifications of the iron which it turns red-hot.

शिष्य उवाच ।

भ्रमेणाप्यन्यथा वाऽस्तु जीवभावः परात्मनः ।
तदुपाधेरनादित्वान्नानादेर्नाश इष्यते ॥ १९२ ॥

शिष्य उवाच भ्रमेण वा अन्यथा-अपि परात्मनः जीवभावः अस्तु तद्-उपाधेः-अनादित्वात् अनादेः नाशः न-इष्यते ।

शिष्य – the student; उवाच – questioned; भ्रमेण – be it through delusion; वा – or; अन्यथा – otherwise; अपि – either; परात्मनः – the Supreme-Self; जीवभावः – to consider Itself as the Jiva; अस्तु – has come; तद्-उपाधेः-अनादित्वात् – this superimposition is without beginning; अनादेः – that which has no beginning; नाशः – have an end; न-इष्यते – can not be suppose to;

The student questioned :

Be it through delusion or otherwise that the Supreme-Self has come– to consider Itself as the Jiva, this superimposition is without beginning, and that which has no beginning can not be suppose to have an end either.

अतोऽस्य जीवभावोऽपि नित्या भवति संसृतिः ।

न निवर्तेत तन्मोक्षः कथं मे श्रीगुरो वद ॥ १९३ ॥

अतः अस्य जीवभावः अपि न-निवर्तेत संसृतिः नित्या-भवति तत्-मोक्षः कथं श्रीगुरो मे-वद ।

अतः – therefore; अस्य – of the ever free Atman; जीवभावः – self-hypnotized state of an individual soul; अपि – also; न-निवर्तेत – has no end; संसृतिः – its transmigration; नित्या-भवति – must continue for ever; तत्-मोक्षः – can there be liberation for an individual soul; कथं – how; then; श्रीगुरो – O revered Master; मे-वद – kindly enlighten me on this point;

Therefore self-hypnotized state of an individual soul of the ever free Atman also has no end and its transmigration must continue for ever. How then can there be liberation for an individual soul? Kindly enlighten me on this point, O revered Master.

श्रीगुरुरुवाच ।

सम्यक्पृष्टं त्वया विद्वन्सावधानेन तच्छृणु ।

प्रामाणिकी न भवति भ्रान्त्या मोहितकल्पना ॥ १९४ ॥

श्री-गुरुः-उवाच (हे)-विद्वन् त्वया सम्यक्-पृष्टं, तत् सावधानेन श्रृणु । भ्रान्त्या मोहित-कल्पना प्रामाणिकी- न-भवति ।

श्री-गुरुः-उवाच – the teacher replied; (हे)-विद्वन् – O learned one; त्वया – you; सम्यक्-पृष्टं – have questioned rightly; तत् – therefore; सावधानेन – attentively; श्रृणु – listen; भ्रान्त्या – by delusion; मोहित-कल्पना – the imagination which has been conjured; प्रामाणिकी- न-भवति – can never be accepted as a proved-fact.

The teacher replied :

You have questioned rightly, O learned one! Listen therefore attentively: The imagination which has been conjured by delusion can never be accepted as a proved-fact.

भ्रान्तिं विना त्वसङ्गस्य निष्क्रियस्य निराकृतेः ।

न घटेतार्थसम्बन्धो नभसो नीलतादिवत् ॥ १९५ ॥

नभसः नीलतादिवत् असङ्गस्य निष्क्रियस्य निराकृतेः अर्थसम्बन्धः तु भ्रान्तिं-विना न-घटेत ।

नभसः – with reference to the sky; नीलतादिवत् – as in the case of blueness etc.; असङ्गस्य-निष्क्रियस्य-निराकृतेः – of the Self which is unattached, beyond activity and formless; अर्थसम्बन्धः –connection with the objective world; तु – भ्रान्तिं-विना – but for delusion; न-घटेत – there can be no;

But for delusion there can be no connection of the Self which is unattached, beyond activity and formless with the objective world, as in the case of blueness etc. with reference to the sky.

स्वस्य द्रष्टुर्निर्गुणस्याक्रियस्य

प्रत्यग्बोधानन्दरूपस्य बुद्धेः ।

भ्रान्त्या प्राप्तो जीवभावो न सत्यो

मोहापाये नास्त्यवस्तुस्वभावात् ॥ १९६ ॥

द्रष्टुः निर्गुणस्य अक्रियस्य प्रत्यग्-बोध-आनन्दरूपस्य जीवभावः बुद्धेः भ्रान्त्या प्राप्तः न-सत्यः अवस्तुस्वभावात् मोह-अपाये न-अस्ति ।

द्रष्टुः – the witness; निर्गुणस्य – which is beyond qualities; अक्रियस्य – beyond activity; प्रत्यग्-बोध – which is realized within as knowledge; आनन्दरूपस्य – Bliss-Absolute; जीवभावः – the selfhood as an individual soul of the Atman; बुद्धेः – of the intellect; भ्रान्त्या – by the delusion; प्राप्तः – has been superimposed; न-सत्यः – is not real; अवस्तुस्वभावात् – because it is by nature an unreality; मोह-अपाये – when the delusion is gone; न-अस्ति – it ceases to exists.

The selfhood as an individual soul of the Atman the witness which is beyond qualities, beyond activity and Bliss-Absolute, and which is realized within as knowledge, has been superimposed by the delusion of the intellect, and is not real. And because it is by nature an unreality, it ceases to exist when the delusion is gone.

यावद्भ्रान्तिस्तावदेवास्य सत्ता
मिथ्याज्ञानोज्जृम्भितस्य प्रमादात् ।
रज्ज्वां सर्पो भ्रान्तिकालीन एव
भ्रान्तेर्नाशे नैव सर्पोऽपि तद्वत् ॥ १९७ ॥

अस्य मिथ्याज्ञान-उज्जृम्भितस्य सत्ता यावत् प्रमादात् भ्रान्तिः तावत्-एव । रज्ज्वां सर्पः भ्रान्तिकालीनः-एव भ्रान्तेः नाशे सर्पः-अपि न-एव तद्वत् ।

मिथ्याज्ञान-उज्जृम्भितस्य – being caused by indiscrimination; अस्य-सत्ता – it exists; यावत्-भ्रान्तिः-तावत्-एव – so long as the delusion lasts; प्रमादात् – due to illusion; रज्ज्वां-सर्पः – the rope is supposed to be the snake; भ्रान्तिकालीनः-एव – only so long as the mistake lasts; भ्रान्तेः-नाशे – when the illusion has vanished; सर्पः-अपि – a snake too; न-एव – there is no more; तद्वत् – similar is the case here.

It exists so long as the delusion lasts, being caused by indiscrimination due to illusion. The rope is supposed to be the snake only so long as the mistake lasts, and when the illusion has vanished there is no more a snake too. Similar is the case here.

अनादित्वमविद्यायाः कार्यस्यापि तथेष्यते ।
उत्पन्नायां तु विद्यायामाविद्यकमनाद्यपि ॥ १९८ ॥
प्रबोधे स्वप्नवत्सर्वं सहमूलं विनश्यति ।
अनाद्यपीदं नो नित्यं प्रागभाव इव स्फुटम् ॥ १९९ ॥

अविद्यायाः तथा कार्यस्य-अपि अनादित्वम् इष्यते । विद्यायाम् तु उत्पन्नायां अविद्यकम् अनादि-अपि, प्रबोधे स्वप्नवत्, सहमूलं सर्वं विनश्यति । इदं अनादि अपि, प्राग्-अभाव इव, नो-नित्यं स्फुटम् ।

अविद्यायाः – nescience; तथा – and; कार्यस्य-अपि – its effects likewise; अनादित्वम् – beginningless; इष्यते – are considered as; विद्यायाम् – knowledge or realization; तु – but; उत्पन्नायां – with the rise of; सर्वं-अविद्यकम् – entire effects of nescience; अनादि-अपि – even though beginningless;

प्रबोधे – on waking up from sleep; स्वप्नवत्– like dreams; सहमूलं – together with their root;

विनश्यति – are destroyed; इदं – the phenomenal universe; अनादि – without beginning; अपि –

even though; प्राग्-अभाव – previous non-existence; इव – like; नो-नित्यं – is not eternal; स्फुटम्– it is clear that.

Nescience and its effects likewise are considered as beginning less. But with the rise of knowledge or realization, the entire effects of nescience, even though beginningless, are destroyed together with their root - like dreams on waking up from sleep. It is clear that the phenomenal universe, even though without beginning, is not eternal - like previous non-existence.

अनादेरपि विध्वंसः प्रागभावस्य वीक्षितः ।

यद्बुद्ध्युपाधिसम्बम्धात्परिकल्पितमात्मनि ॥ २०० ॥

जीवत्वं न ततोऽन्यस्तु स्वरूपेण विलक्षणः ।

सम्बन्धस्त्वात्मनो बुद्ध्या मिथ्याज्ञानपुरःसरः ॥ २०१ ॥

प्राग् अभावस्य अनादेः अपि विध्वंसः वीक्षितः ।यद् बुद्धया उपाधि सम्बम्धात् आत्मनि जीवत्वं परिकल्पितमं

न ततः तु अन्यः स्वरूपेण विलक्षणः । बुद्धया तु आत्मनः सम्बन्धः मिथ्याज्ञानपुरःसरः ।

प्राग्– previous; अभावस्य – non-existence; अनादेः – beginningless; अपि – even though; विध्वंसः

– to have an end; वीक्षितः – is observed; यद्– which; बुद्धया – such as intellect; उपाधि –

superimposed attributes; सम्बम्धात्– through its relation with; आत्मनि – to be in the Atman;

जीवत्वं – the life; परिकल्पितमं – is imagined; तुः – so; न-स्वरूपेण – is not real; ततः – whereas;

अन्य – the other (the Atman); विलक्षणः – is essentially different from it; बुद्धया – and the

intellect; आत्मनः – between theAtman सम्बन्धः – the relation; तु-मिथ्याज्ञानपुरःसरः – is due to a false knowledge;

Previous non-existence, even though beginning less, is observed to have an end. So the life which is imagined to be in the Atman through its relation with superimposed attributes such as intellect is not real; whereas the other (the Atman) is essentially different from it. The relation between the Atman and the intellect is due to a false knowledge.

विनिवृत्तिर्भवेत्तस्य सम्यग्ज्ञानेन नान्यथा ।

ब्रह्मात्मैकत्वविज्ञानं सम्यग्ज्ञानं श्रुतेर्मतम् ॥ २०२ ॥

तस्य विनिवृत्तिः सम्यग्ज्ञानेन भवेत् न-अन्यथा । ब्रह्मात्मैकत्व-विज्ञानं सम्यक्-ज्ञानं *(इति)* श्रुतेः मतम् ।

तस्य – of that superimposition; विनिवृत्तिः – the cessation; सम्यग्ज्ञानेन – through perfect

knowledge; भवेत्– takes place; न-अन्यथा – by no other means; ब्रह्मात्मैकत्व-विज्ञानं – the

realization of the identity of the individual soul and Brahman; सम्यक्-ज्ञानं – perfect knowledge;

*(इति)*-श्रुतेः-मतम् – consists in accourding to the Srutis;

The cessation of that superimposition takes place through perfect knowledge, and by no other means. Perfect knowledge, according to the Srutis, consists in the realization of the identity of the individual soul and Brahman.

तदात्मानात्मनोः सम्यग्विवेकेनैव सिध्यति।

ततो विवेकः कर्तव्यः प्रत्यगात्मसदात्मनोः॥ २०३॥

तत् आत्मा-अनात्मनोः सम्यग्-विवेकेन-एव सिध्यति।ततः प्रत्यग्-आत्म-सत्-आत्मनोः विवेकः कर्तव्यः ।

तत् – that realization; आत्मा-अनात्मनोः – between the Self and the non-Self; सम्यग्-विवेकेन-एव – by perfect discrimination; सिध्यति – is attained; ततः – therefore; प्रत्यग्-आत्म-सत्-आत्मनोः – between the individual soul and the eternal self; विवेकः – for the discrimination; कर्तव्यः – one must strive.

That realization is attained by perfect discrimination between the Self and the non-Self. Therefore one must strive for the discrimination between the individual soul and the eternal self.

जलं पंकवदत्यन्तं पंकापाये जलं स्फुटम्।

यथा भाति तथात्मापि दोषाभावे स्फुटप्रभः॥ २०४॥

यथा अत्यन्तं-पंकवत्-जलं पंक-अपाये स्फुटम्-जलं तथा आत्मा-अपि दोष-अभावे स्फुटप्रभःभाति।

यथा – just as; अत्यन्तं-पंकवत्-जलं – the water which is very muddy; पंक-अपाये – when the mud is removed; स्फुटम-जलं – appears as transparent water; तथा – so; आत्मा-अपि – the Atman also; दोष-अभावे – when the taint has been removed; स्फुटप्रभः – undimmed luster; भाति – manifests Its.

Just as the water which is very muddy again appears as transparent water when the mud is removed, so the Atman also manifests Its undimmed luster when the taint has been removed.

असन्निवृत्तौ तु सदात्मना स्फुटं

प्रतीतिरेतस्य भवेत्प्रतीचः।

ततो निरासः करणीय एव

सदात्मनः साध्वहमादिवस्तुनः॥ २०५॥

असत्-निवृत्तौ तु एतस्य प्रतीचः सदात्मना प्रतीतिः स्फुटं भवेत्। ततः सत्-आत्मनः अहम्-आदि-वस्तुनः साधु निरासः एव करणीयः ।

असत्-निवृत्तौ – when the unreal ceases to exists; तु – very; एतस्य – of this; प्रतीचः – very individual soul; सदात्मना – as the eternal Self; प्रतीतिःभवेत् – realized; स्फुटं – definitely; ततः – therefore; सत्-आत्मनः – from the eternal Self; अहम्-आदि-वस्तुनः – things like egoism; साधु – completely; निरासः – to remove; एव – करणीयः – one must make it a point.

When the unreal ceases to exists, this very individual soul is definitely realized as the eternal Self. Therefore one must make it a point to remove completely things like egoism from the eternal Self.

अतो नायं परात्मा स्याद्विज्ञानमयशब्दभाक्।

विकारित्वाज्जडत्वाच्च परिच्छिन्नत्वहेतुतः।

दृश्यत्वाद्व्यभिचारित्वान्नानित्यो नित्य इष्यते॥ २०६॥

विकारित्वात् जडत्वात् दृश्यत्वात्-व्यभिचारित्वात् परिच्छिन्नत्व-हेतुतः च अनित्यः नित्यः-न-इष्यते ।

अतः अयं विज्ञानमय-शब्दभाक् परात्मा न-स्यात् ।

विकारित्वात् – because it is subject to change; जडत्वात् – because it is insentient; दृश्यत्वात्-व्यभिचारित्वात्-च – because it is an object of the senses and is not constantly present; परिच्छिन्नत्व-हेतुतः – because it is a limited thing; अनित्यः – an unreal thing; नित्यः-न-इष्यते – can not be taken for the real Atman; अतः – because; अयं – this; विज्ञानमय-शब्दभाक् – knowledge sheath that we have been speaking of; परात्मा – the Supreme Self; न-स्यात् – can not be;

The knowledge sheath that we have been speaking of can not be the Supreme Self; because it is subject to change, insentient, a limited thing, an object of the senses and is not constantly present; an unreal thing can not be taken for the real Atman.

आनन्दप्रतिबिम्बचुम्बिततनुर्वृत्तिस्तमोजृम्भिता
स्यादानन्दमयः प्रियादिगुणकः स्वेष्टार्थलाभोदयः ।
पुण्यस्यानुभवे विभाति कृतिनामानन्दरूपः स्वयं
सर्वो नन्दति यत्र साधु तनुभृन्मात्रः प्रयत्नं विना ॥ २०७ ॥

आनन्द-प्रतिबिम्ब-चुम्बित-तनुः तमः-जृम्भिता वृत्तिः आनन्दमयः स्यात् स्व-इष्ट-अर्थ-लाभ-उदयः प्रियादिगुणकः पुण्यस्य अनुभवे कृतिनां विभाति । यत्र सर्वः तनु-भृन्मात्रः प्रयत्नं विना स्वयं साधु आनन्दरूपः नन्दति ।

आनन्द-प्रतिबिम्ब-चुम्बित-तनुः – which manifests itself catching a reflection of the Atman which is Bliss Absolute; तमः-जृम्भिता – of nescience; वृत्तिः – modification; आनन्दमयः – the blissful sheath; प्रियादिगुणकः – whose attributes are pleasure and the rest; स्यात् – is that; स्व-इष्ट-अर्थ-लाभ-उदयः – which appears in view when some object agreeable to oneself presents itself; पुण्यस्य-कृतिनां-अनुभवे – by the fortune during the fruition of their virtuous deeds; विभाति – it makes itself spontaneously felt; यत्र – where; सर्वः – every; तनु-भृन्मात्रः – corporal being; प्रयत्नं-विना – without the least effort; स्वयं – themseves; साधु-आनन्दरूपः – great joy; नन्दति – derives.

The blissful sheath is that modification of nescience which manifests itself catching a reflection of the Atman which is Bliss Absolute; whose attributes are pleasure and the rest; and which appears in view when some object agreeable to oneself presents itself. It makes itself spontaneously felt by the fortune during the fruition of their virtuous deeds; where every corporal being derives great joy without the least effort.

आनन्दमयकोशस्य सुषुप्तौ स्फूर्तिरुत्कटा ।
स्वप्नजागरयोरीषदिष्टसंदर्शनादिना ॥ २०८ ॥

आनन्दमय-कोशस्य-उत्कटा-स्फूर्तिः सुषुप्तौ स्वप्नजागरयोः इष्ट-संदर्शनाविना इषत् ।

आनन्दमय-कोशस्य-उत्कटा-स्फूर्तिः – the blissful sheath has its fullest play; सुषुप्तौ – during profound sleep; स्वप्नजागरयोः – while in the dreamin and wakeful states; इष्ट-संदर्शनादिना – occasioned by the sight of agreeable objects and so forth; इषत् – it has only partial manifestation.

The blissful sheath has its fullest play during profound sleep, while in the dreaming and wakeful states it has only partial manifestation occasioned by the sight of agreeable objects and so forth.

नैवायमानन्दमयः परात्मा

सोपाधिकत्वात्प्रकृतेर्विकारात्।

कार्यत्वहेतोः सुकृतक्रियाया

विकारसंघातसमाहितत्वात्॥ २०९॥

अयं आनन्दमयः सोपाधिकत्वात् प्रकृतेः विकारात् सुकृत-क्रियाया कार्यत्वहेतोः विकार-संघात-समाहितत्वात् परात्मा-न-एव।

अयं –this; आनन्दमयः – the blissful sheath; सोपाधिकत्वात् – because it is endowed with – changeful attributes; प्रकृतेः – of the nature; विकारात् – is modification; सुकृत-क्रियाया – past good deeds; कार्यत्वहेतोः – is the effect of; विकार-संघात-समाहितत्वात् – imbedded in the other sheaths which are modifications; परात्मा-न-एव – nor is the Supreme Self.

Nor is this the blissful sheath the Supreme Self, because it is endowed with changeful attributes, is modification of the nature, is the effect of past good deeds, and imbedded in the other sheaths which are modifications.

पञ्चानामपि कोशानां निषेधे युक्तितः श्रुतेः।

तन्निषेधावधि साक्षी बोधरूपोऽवशिष्यते॥ २१०॥

पञ्चानाम्-अपि-कोशानां श्रुतेः युक्तितः निषेधे तत्-निषेध-अवधिः साक्षी बोधरूपः अवशिष्यते।

पञ्चानाम्-अपि-कोशानां – when all the five sheaths; श्रुतेः – of Vedic passages; युक्तितः – by the reasoning; निषेधे – have been eliminated; तत्-निषेध-अवधिः – as the culminating point; साक्षी – is the witness; बोधरूपः – of the nature Knowledge Absolute – the Atman; अवशिष्यते – what remains.

When all the five sheaths have been eliminated by the reasoning of Vedic passages, what remains is the witness of the nature Knowledge Absolute – the Atman.

योऽयमात्मा स्वयंज्योतिः पञ्चकोशविलक्षणः।

अवस्थात्रयसाक्षी सन्निर्विकारो निरञ्जनः।

सदानन्दः स विज्ञेयः स्वात्मत्वेन विपश्चिता॥ २११॥

यः-अयम्-आत्मा स्वयं-ज्योतिः पञ्च-कोश-विलक्षणः अवस्था-त्रय-साक्षी-सन् निर्विकारः निरञ्जनः सदानन्दः विपश्चिता सः स्व-आत्मत्वेन विज्ञेयः।

यः-अयम्-आत्मा – this Atman which is; स्वयं-ज्योतिः – self-effulgent; पञ्च-कोश-विलक्षणः – distinct from the five sheaths; अवस्था-त्रय-साक्षी-सन् – the Witness of the three states; निर्विकारः – the

Changeless; निरञ्जनः – the Untainted; सदानन्दः – the everlasting Bliss; विपश्चिता – by the wise man; सः – that; स्व-आत्मत्वेन – as his own Self; विज्ञेयः – is to be realized.

This self-effulgent Atman which is distinct from the five sheaths, the Witness of the three states, the Changeless, the Untainted, the everlasting Bliss; that is to be realized by the wise man as his own Self.

शिष्य उवाच ।

मिथ्यात्वेन निषिद्धेषु कोशेष्वेतेषु पञ्चसु ।

सर्वाभावं विना किञ्चिन्न पश्याम्यत्र हे गुरो ।

विज्ञेयं किमु वस्त्वस्ति स्वात्मनाऽऽत्मविपश्चिता ॥ २१२ ॥

शिष्य-उवाच एतेषु-पञ्चसु-कोशेषु मिथ्यात्वेन निषिद्धेषु सर्व-अभावं-विना अत्र किञ्चित् न-पश्यामि । हे गुरो ।

आत्मविपश्चिता स्व-आत्मना विज्ञेयं-वस्तु किम्-अस्ति उ ।

शिष्य-उवाच – the pupil puts forward query; एतेषु-पञ्चसु-कोशेषु – these five sheaths; मिथ्यात्वेन – as unreal; निषिद्धेषु – after have been eliminated; सर्व-अभावं-विना – but Void, the absence of everything; अत्र – in this universe; किञ्चित्-न-पश्यामि – I find nothing; हे गुरो – O Master; आत्मविपश्चिता – the wise knower of the Self; स्व-आत्मना-विज्ञेयं-वस्तु – entity with which should realize his identity; किम्-अस्ति – what is there left forsooth; उ – or there is nothing.

The pupil puts forward query:
After these five sheaths have been eliminated as unreal, I find nothing, O Master, in this universe but Void, the absence of everything. What entity is there left forsooth with which the wise knower of the Self should realize his identity, or there is nothing?

श्रीगुरुरुवाच ।

सत्यमुक्तं त्वया विद्वन्निपुणोऽसि विचारणे ।

अहमादिविकारास्ते तदभावोऽयमप्यनु ॥ २१३ ॥

सर्वे येनानुभूयन्ते यः स्वयं नानुभूयते ।

तमात्मानं वेदितारं विद्धि बुद्ध्या सुसूक्ष्मया ॥ २१४ ॥

श्रीगुरुः-उवाच विद्वन् त्वया-सत्यम्-उक्तं । विचारणे निपुणः-असि ।अहमादि-विकाराः ते अनु अयं-अपि-तद्-अभावः सर्वे येन अनुभूयन्ते यः-स्वयं न-अनुभूयते तम्-वेदितारं-आत्मानं सुसूक्ष्मया-बुद्ध्या विद्धि ।

श्रीगुरुः-उवाच – the Master replyed; विद्वन् – O learned man!; त्वया-सत्यम्-उक्तं – you have said it rightly; विचारणे – in discrimination; निपुणः-असि – indeed you are very clever; अहमादि-विकाराः – those modifications such as egoism; ते – that; अनु – but; अयं-अपि-तद्-अभावः – as well as their subsequent absence; सर्वे – all; येन – by which; अनुभूयन्ते – are perceived; यः-स्वयं – which Itself; न-अनुभूयते – is not perceived; तम्-वेदितारं-आत्मानं – that Atman – the knower; सुसूक्ष्मया-बुद्ध्या – through the sharpest intellect; विद्धि – you should know.

The Master replyed:
You have said it rightly O learned man! Indeed you are very clever in discrimination. That by which all those modifications such as egoism as well as their subsequent absence (during deep sleep) are perceived, but which Itself is not perceived, you should know that Atman – the knower through the sharpest intellect.

तत्साक्षिकं भवेत्तत्तद्यद्यद्येनानुभूयते ।

कस्याप्यननुभूतार्थे साक्षित्वं नोपयुज्यते ॥ २१५ ॥

यत्-यत् येन अनुभूयते तत्-तत् तत्-साक्षिकं-भवेत । अननुभूत-अर्थे कस्य-अपि साक्षित्वं न-उपयुज्यते ।

यत्-यत् – whatever; येन – by someone; अनुभूयते – is perceived; तत्-तत् – that much only; तत्-साक्षिकं-भवेत – he can be witness for; अननुभूत-अर्थे – when there is nobody to perceive a thing; कस्य-अपि-न-उपयुज्यते – none can; साक्षित्वं – claim it as having been perceived;

Whatever is perceived by someone, he can be witness for that much only. But when there is nobody to perceive a thing, none can claim it as having been perceived.

असौ स्वसाक्षिको भावो यतः स्वेनानुभूयते ।

अतः परं स्वयं साक्षात्प्रत्यगात्मा न चेतरः ॥ २१६ ॥

यतः स्वेन अनुभूयते स्वसाक्षिकः-भावः असौ अतः प्रत्यगात्मा स्वयं साक्षात्-परं न-च-इतरः ।

यतः – because; स्वेन – by Itself; अनुभूयते – is cognized; स्वसाक्षिकः-भावः – It is a self cognized entity; असौ – this Atman; अतः – hence; प्रत्यगात्मा – the individual soul; स्वयं – itself; साक्षात्-परं – directly the Supreme Brahman; न-च-इतरः – and nothing else.

This Atman is a self cognized entity because It is cognized by Itself. Hence the individual soul itself and directly the Supreme Brahman and nothing else.

जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरं योऽसौ समुज्जृम्भते

प्रत्यग्रूपतया सदाहमहमित्यन्तः स्फुरन्नैकधा ।

नानाकारविकारभागिन इमान् पश्यन्नहंधीमुखान्

नित्यानन्दचिदात्मना स्फुरति तं विद्धि स्वमेतं हृदि ॥ २१७ ॥

यः-असौ जाग्रत्-स्वप्न-सुषुप्तिषु प्रत्यग्-रूपतया सदा-स्फुटतरं समुज्जृम्भते, अहम्-अहम्-इति अन्तः-स्फुरन् न-एकधा, नाना-आकार-विकार-भागिनः इमान् अहं-धी-मुखान्-पश्यन हृदि नित्य-आनन्द-चित्-आत्मना स्फुरति, तं-एतं-स्वं विद्धि ।

यः-असौ – that which; जाग्रत्-स्वप्न-सुषुप्तिषु – in the states of wakefulness, dream & profound sleep; प्रत्यग्-रूपतया – the individual self; सदा-स्फुटतरं – clearly; समुज्जृम्भते – manifests itself; अहम्-अहम्-इति – egoistic impressions; अन्तः-स्फुरन् – which is inwardly perceived in the mind; न-एकधा – as an unbroken series of; नाना-आकार-विकार-भागिनः – which are diverse forms and modifications; इमान् – all these; अहं-धी-मुखान्-पश्यन – which witnesses the egoism the intellect; हृदि – within your heart; नित्य-आनन्द-चित्-आत्मना – the Existence-Knowledge-Bliss Absolute; स्फुरति – makes Itself felt as; तं-एतं-स्वं – this Atman, your own Self; विद्धि – you should know.

That which clearly manifests itself in the states of wakefulness, dream & profound sleep; which is inwardly perceived in the mind; the individual self as an unbroken series of egoistic impressions which witnesses the egoism the intellect etc.; which are diverse forms and modifications all these makes Itself felt as the Existence-Knowledge-Bliss Absolute; you should know this Atman, your own Self within your heart.

घटोदके बिम्बितमर्कबिम्ब-

मालोक्य मूढो रविमेव मन्यते ।

तथा चिदाभासमुपाधिसंस्थं

भ्रान्त्याहमित्येव जडोऽभिमन्यते ॥ २१८ ॥

घटोदके बिम्बितम् अर्कबिम्ब-मालोक्य मूढः रविम्-एव मन्यते

तथा जडः उपाधिसंस्थं चिदाभासम् भ्रान्त्या अहम्-एव-इति-अभिमन्यते ।

घटोदके – in the water of a jar; बिम्बितम् – mirrored; अर्कबिम्बं – the reflection of the sun; आलोक्य – seeing; मूढः – the fool; रविम्-एव – the sun itself; मन्यते – thinks it is; तथा – similarly; जडः – the stupid man; उपाधिसंस्थं – caught in the intellect; चिदाभासम् – the reflection of the Atman which is Knowledge-Absolute which is Its superimposition; भ्रान्त्या – through delusion; अहम्-एव-इति-अभिमन्यते – identifies himself with.

Seeing the reflection of the sun mirrored in the water of a jar, the fool thinks it is the sun itself. Similarly the stupid man, through delusion identifies himself with the reflection of the Atman which is Knowledge-Absolute caught in the intellect, which is Its superimposition.

घटं जलं तद्गतमर्कबिम्बं

विहाय सर्वं विनिरीक्ष्यतेऽर्कः ।

तटस्थ एतत्त्रितयावभासकः

स्वयंप्रकाशो विदुषा यथा तथा ॥ २१९ ॥

यथा विदुषा घटं जलं तद्गतम्-अर्कबिम्बं सर्वं-विहाय एतत्-त्रितय-अवभासकः तटस्थः स्वयंप्रकाशः अर्कः विनिरीक्ष्यते तथा ।

यथा – just as; विदुषा – the wise man; घटं – the jar; जलं – the water; तद्गतम्-अर्कबिम्बं – the reflection of the sun in it; सर्वं-विहाय – leaves aside; एतत्-त्रितय-अवभासकः – which illumines these three; तटस्थः – is independent; of them; स्वयंप्रकाशः – the self- luminous; अर्कः – sun; विनिरीक्ष्यते – sees; *तथा – similarly..*

Just as the wise man leaves aside the jar, the water & the reflection of the sun in it, and sees the self-luminous sun which illumines these three and is independent; of them. Similarly …

देहं धियं चित्प्रतिबिम्बमेवं

विसृज्य बुद्धौ निहितं गुहायाम् ।

द्रष्टारमात्मानमखण्डबोधं

सर्वप्रकाशं सदसद्विलक्षणम् ॥ २२० ॥

नित्यं विभुं सर्वगतं सुसूक्ष्मं

अन्तर्बहिःशून्यमनन्यमात्मनः।

विज्ञाय सम्यङ्निजरूपमेतत्

पुमान् विपाप्मा विरजो विमृत्युः॥ २२१॥

विशोक आनन्दघनो विपश्चित्

स्वयं कुतश्चिन्न बिभेति कश्चित्।

नान्योऽस्ति पन्था भवबन्धमुक्तेः

विना स्वतत्त्वावगमं मुमुक्षोः॥ २२२॥

देहं धियं एवं चित्प्रतिबिम्बं विसृज्य बुद्धौ-गुहायाम् निहितं अखण्ड-बोधं द्रष्टारं आत्मानं सर्वप्रकाशं सद्-असद्-विलक्षणं नित्यं विभुं सर्वगतं सुसूक्ष्मं अन्तः-बहिः-शून्यं अनन्यं आत्मनः एतत् निजरूपं सम्यक्-विज्ञाय पुमान् विपाप्मा विरजः विमृत्युः विशोकः आनन्दघनः विपश्चित् कश्चित् स्वयं कुतश्चित् न-बिभेति। मुमुक्षोः स्वतत्त्वावगमं-विना भवबन्धमुक्तेः अन्यः-पन्था-न-अस्ति ।

देहं – the body; धियं – the intellect; एवं – and; चित्प्रतिबिम्बं – the reflection of chit-the conscious in it; विसृज्य – discarding; बुद्धौ-गुहायाम् – in the recesses of the intellect; निहितं – which is hidden; अखण्ड-बोधं – the Knowledge Absolute; द्रष्टारं – the witness; आत्मानं – the Self; सर्वप्रकाशं – the cause of manifestation of everything; सद्-असद्-विलक्षणं – is distinct from the gross & subtle; नित्यं – eternal; विभुं – omnipresent; सर्वगतं – all pervading; सुसूक्ष्मं – extremely subtle; अन्तः-बहिः-शून्यं – which has neither interior nor exterior; अनन्यं – the true nature; आत्मनः – of oneself; एतत् – this; निजरूपं – is identical with one-self; सम्यक्-विज्ञाय – fully relizing; पुमान् – one becomes; विपाप्मा-विरजः-विमृत्युः-विशोकः-– free from sin, taint, death, & grief; आनन्दघनः – and becomes the embodiment of Bliss; विपश्चित् – illumined himself; कश्चित्-स्वयं-कुतश्चित्-न-बिभेति – he is afraid of none; मुमुक्षोः – for the seeker after liberation; स्वतत्त्वावगमं-विना – than the realization of the truth of one's own Self; भवबन्धमुक्तेः – for the breaking of the bonds of transmigration; अन्यः-पन्था-न-अस्ति – there is no way out.

*Similarly,* discarding the body, the intellect & the reflection of chit-the conscious in it, and fully realizing the witness, the Self the Knowledge Absolute, the cause of manifestation of everything, which is hidden in the recesses of the intellect, is distinct from the gross & subtle, eternal, omnipresent, all pervading and extremely subtle, and which has neither interior nor exterior & which is identical with one-self - the true nature of oneself, one becomes free from sin, taint, death, & grief and becomes the embodiment of Bliss. Illumined himself, he is afraid of none. For the seeker after liberation for the breaking of the bonds of transmigration there is no way out than the realization of the truth of one's own Self.

ब्रह्माभिन्नत्वविज्ञानं भवमोक्षस्य कारणम्।

येनाद्वितीयमानन्दं ब्रह्म सम्पद्यते बुधैः॥ २२३॥

भवमोक्षस्य ब्रह्म-अभिन्नत्व-विज्ञानं कारणम् येन बुधैः अद्वितीयम्-आनन्दं-ब्रह्म सम्पद्यते ।

भवमोक्षस्य-कारणम् – the cause of liberationfrom the bonds of Samsara; ब्रह्म-अभिन्नत्व-विज्ञानं – the realization of one's identity with Brahman; येन – by means of which; बुधैः – the wise man; अद्वितीयम्-आनन्दं-ब्रह्म – Brahman, the one without a second, the Bliss Absolute; सम्पद्यते – attains.

The realization of one's identity with Brahman is the cause of liberation from the bonds of *Samsara*, by means of which the wise man attains Brahman, the one without a second, the Bliss Absolute.

ब्रह्मभूतस्तु संसृत्यै विद्वान्नावर्तते पुनः ।

विज्ञातव्यमतः सम्यग्ब्रह्माभिन्नत्वमात्मनः ॥ २२४ ॥

ब्रह्मभूतः-तु पुनः संसृत्यै न-आवर्तते अतः आत्मनः ब्रह्म-अभिन्नत्वम सम्यक्-विज्ञातव्यम विद्वान् ।

ब्रह्मभूतः-तु – once having realized Brahman; विद्वान् – a wise one; संसृत्यै – to the realm of transmigration; पुनः-न-आवर्तते – one no longer returns; अतः – therefore; आत्मनः-ब्रह्म-अभिन्नत्वम – one's identity with Brahman; सम्यक्-विज्ञातव्यम – must fully realize.

Once having realized Brahman, one no longer returns to the realm of transmigration; therefore a wise one must fully realize one's identity with Brahman.

सत्यं ज्ञानमनन्तं ब्रह्म विशुद्धं परं स्वतःसिद्धम् ।

नित्यानन्दैकरसं प्रत्यगभिन्नं निरन्तरं जयति ॥ २२५ ॥

सत्यं ज्ञानम् अनन्तं विशुद्धं परं स्वतः-सिद्धम् नित्य-आनन्द-एकरसं प्रत्यग्-अभिन्नं निरन्तरं ब्रह्म जयति ।

सत्यं –Existence; ज्ञानम् – Knowledge; अनन्तं – Infinity; विशुद्धं – Pure; परं – Supreme; स्वतः-सिद्धम् – Self- existent; नित्य-आनन्द-एकरसं – eternal & indivisible Bliss; प्रत्यग्-अभिन्नं – not different from the individual soul; निरन्तरं – devoid of interior or exterior; ब्रह्म – the Brahman; जयति – is triumphant.

The Brahman which is Existence, Knowledge, Infinity, Pure, Supreme, Self-existent, eternal & indivisible Bliss, not different from the individual soul, and devoid of interior or exterior is triumphant.

सदिदं परमाद्वैतं स्वस्मादन्यस्य वस्तुनोऽभावात् ।

न ह्यन्यदस्ति किञ्चित् सम्यक् परमार्थतत्त्वबोधदशायाम् ॥ २२६ ॥

स्वस्मात्-अन्यस्य-वस्तुनः-अभावात इदं सत् परम्-अद्वैतं परमार्थ-तत्त्व-बोध-दशायाम् अन्यत्-किञ्चित् सम्यक् हि न-अस्ति ।

स्वस्मात्-अन्यस्य-वस्तुनः-अभावात – since there is nothing else but the Self; इदं – it is this; सत् – is real; परम्-अद्वैतं – Supreme Oneness; परमार्थ-तत्त्व-बोध-दशायाम् – in the state of realization of the highest Truth; अन्यत्-किञ्चित् – other independent entity; सम्यक् – हि – verily; न-अस्ति – there remains no.

It is this Supreme Oneness which alone is real, since there is nothing else but the Self. Verily, there remains no other independent entity in the state of realization of the highest Truth.

यदिदं सकलं विश्वं नानारूपं प्रतीतमज्ञानात्।

तत्सर्वं ब्रह्मैव प्रत्यस्ताशेषभावनादोषम्॥ २२७॥

यत्-इदं-सकलं-विश्व अज्ञानात् नानारूपं-प्रतीतम् प्रत्यस्त-अशेष-भावना-दोषम् तत्-सर्वं ब्रह्म-एव *(अस्ति)*।

यत्-इदं-सकलं-विश्वं-तत्-सर्वं – This entire universe which; अज्ञानात् – trough ignorance; नानारूपं-प्रतीतम् – appears as of diverse forms; प्रत्यस्त-अशेष-भावना-दोषम् – which is absolutely free from all the limitations human thought; ब्रह्म-एव – is nothing else but Brahman. *(अस्ति)*।

This entire universe which trough ignorance appears as of diverse forms is nothing else but Brahman which is absolutely free from all the limitations human thought.

मृत्कार्यभूतोऽपि मृदो न भिन्नः

कुम्भोऽस्ति सर्वत्र तु मृत्स्वरूपात्।

न कुम्भरूपं पृथगस्ति कुम्भः

कुतो मृषा कल्पितनाममात्रः॥ २२८॥

कुम्भः मृत्कार्यभूतः-अपि मृदः भिन्नः न-अस्ति। सर्वत्र कुम्भरूपं मृत्स्वरूपात् तु पृथक् न-अस्ति।

कुम्भः कुतः? मृषा-कल्पित-नाममात्रः *(अस्ति)*।

कुम्भः – a jar; मृत्कार्यभूतः-अपि – though a modification of clay; मृदः – clay; भिन्नः – different from; न-अस्ति – is not; सर्वत्र – everywhere; कुम्भरूपं – the form of jar; मृत्स्वरूपात् – from the nature of clay; तु – verily; पृथक् – different; न-अस्ति – is not; मृषा-कल्पित-नाममात्रः – it is merely fictitious, a fancied name only; कुम्भः-कुतः – why then call it a jar? *(अस्ति)*।

A jar though a modification of clay, is not different from that clay. Everywhere the form of jar is not verily different from the nature of clay. Why then call it a jar? It is merely fictitious, a fancied name only.

केनापि मृद्भिन्नतया स्वरूपं

घटस्य संदर्शयितुं न शक्यते।

अतो घटः कल्पित एव मोहा-

न्मृदेव सत्यं परमार्थभूतम्॥ २२९॥

घटस्य-स्वरूपं मृद्-भिन्नतया केन-अपि संदर्शयितुं न-शक्यते।

अतः घटः मोहात् कल्पितः-एव, मृद्-एव परमार्थभूतम सत्यं ।

घटस्य-स्वरूपं – the essence of a jar; मृद्-भिन्नतया – is something other than clay; केन-अपि-न-शक्यते – none can; संदर्शयितुं – demonstrate that; अतः – hence; घटः – the jar; मोहात् – through delusion; कल्पितः-एव – is merely imagined; मृद्-एव – the component of clay alone; परमार्थभूतम-सत्यं – is the abiding reality in respect of it.

None can demonstrate that the essence of a jar is something other than clay. Hence the jar is merely imagined through delusion, and the component of clay alone is the abiding reality in respect of it.

सद्ब्रह्मकार्यं सकलं सदेवं

तन्मात्रमेतन्न ततोऽन्यदस्ति ।

अस्तीति यो वक्ति न तस्य मोहो

विनिर्गतो निद्रितवत्प्रजल्पः ॥ २३० ॥

सकलं सद्-ब्रह्मकार्यं, सत्-एवं। एतत् तत्-मात्रम ततः अन्यत् न-अस्ति ।

यः-वक्ति अस्ति-इति तस्य मोहः न-विनिर्गतः, निद्रितवत् प्रजल्पः ।

सकलं – the whole universe; सद्-ब्रह्मकार्यं – being the effect of the real Brahman; सत्-एवं –is in reality nothing but Brahman; एतत्-तत्-मात्रम् – Its essence is That; ततः-अन्यत् – apart from It; न-अस्ति – it does not exist apart from It; यः-वक्ति – he who says; अस्ति-इति – it does; तस्य-मोहः-न-विनिर्गतः – is still under delusion; निद्रितवत् – like one asleep; प्रजल्पः – he babbles.

The whole universe being the effect of the real Brahman, is in reality nothing but Brahman. Its essence is That, and it does not exist apart from It. he who says it does is still under delusion - he babbles like one asleep.

ब्रह्मैवेदं विश्वमित्येव वाणी

श्रौती ब्रूतेऽथर्वनिष्ठा वरिष्ठा ।

तस्मादेतद्ब्रह्ममात्रं हि विश्वं

नाधिष्ठानाद्भिन्नताऽऽरोपितस्य ॥ २३१ ॥

'इदं-विश्वं ब्रह्म-एव' इति-एव ब्रूते अथर्वनिष्ठा वरिष्ठा श्रौती-वाणी ।

तस्मात् एतद्-विश्वं ब्रह्ममात्रं हि न आरोपितस्य अधिष्ठानात् भिन्नता ।

इदं-विश्वं – this universe; ब्रह्म-एव – is verily Brahman; इति-एव – such is; ब्रूते – pronounces; अथर्वनिष्ठा – the Athrva Veda; वरिष्ठा – the august; श्रौती-वाणी – Vedic dictum; तस्मात् – therefore; एतद्-विश्वं – this universe; ब्रह्ममात्रं-हि – is nothing but Brahman; न – has no; आरोपितस्य – for that which is superimposed; अधिष्ठानात् – from its substratum; भिन्नता – separate existence.

'This universe is verily Brahman' such is the august Vedic dictum, pronounces the *Athrva Veda*. Therefore this universe is nothing but Brahman, for that which is superimposed has no separate existence from its substratum.

सत्यं यदि स्याज्जगदेतदात्मनोऽ

नन्तत्त्वहानिर्निगमाप्रमाणता ।

असत्यवादित्वमपीशितुः स्या-

न्नैतत्त्रयं साधु हितं महात्मनाम् ॥ २३२ ॥

यदि एतत्-जगत् आत्मना सत्यं-स्यात् तत्त्वहानिः-न, निगम-अप्रमाणता, ईशितुः-अपि असत्य-वादित्वम्

स्यात् एतत्-त्रयं महात्मनाम् न-साधु-हितं ।

यदि – if; एतत्-जगत् – this universe; आत्मना – as it is; सत्यं-स्यात् – be real; तत्त्वहानिः-न – there would be no cessation of the dualistic element; निगम-अप्रमाणता – the scriptures would be falsified; ईशितुः-अपि – the Lord Himself; असत्य-वादित्वम् – would be guilty of an untruth; न-स्यात् – none is considered; एतत्-त्रयं – of these three; महात्मनाम् – by the noble minded; साधु-हितं – either desirable or wholesome.

If this universe as it is, be real there would be no cessation of the dualistic element, the scriptures would be falsified, and the Lord Himself would be guilty of an untruth. None of these three is considered either desirable or wholesome by the noble minded.

ईश्वरो वस्तुतत्त्वज्ञो न चाहं तेष्ववस्थितः ।

न च मत्स्थानि भूतानीत्येवमेव व्यचीक्लृपत् ॥ २३३ ॥

ईश्वरः वस्तुतत्त्वज्ञः 'अहं तेषु च न-अवस्थितः, मत्-स्थानि-न च-भूतानी' इति-एवं-एव व्यचीक्लृपत् ।

ईश्वरः – the Lord; वस्तुतत्त्वज्ञः – who knows the secret of all things; अहं – I; तेषु – in them; च – but; न-अवस्थितः – am not; मत्-स्थानि – in me; न-च-भूतानी – nor are the beings; इति-एवं-एव – this view in the words; व्यचीक्लृपत् – has supported.

The Lord, who knows the secret of all things has supported this view in the words: "But I am not in them" … "nor are the beings in me." [As perceived by the senses of living beings]

यदि सत्यं भवेद्विश्वं सुषुप्तामुपलभ्यताम् ।

यन्नोपलभ्यते किञ्चिदतोऽसत्स्वप्नवन्मृषा ॥ २३४ ॥

यदि विश्वं सत्यं भवेत्, सुषुप्तौ उपलभ्यताम् ।यत् किञ्चित् न उपलभ्यते, अतः असत् स्वप्नवत् मृषा ।

यदि – if; विश्वं – the universe; सत्यं – true; भवेत् – be; सुषुप्तौ – in the state of deep sleep; उपलभ्यताम् – let it then be perceived; यत्-अतः – as; किञ्चित्-न – it is not at all; उपलभ्यते – perceived; असत् – it must be unreal; स्वप्नवत् – like dreams; मृषा – false.

If the universe be true, let it then be perceived in the state of deep sleep also. As it is not at all perceived, it must be unreal and false, like dreams.

अतः पृथङ्नास्ति जगत्परात्मनः

पृथक्प्रतीतिस्तु मृषा गुणादिवत् ।

आरोपितस्यास्ति किमर्थवत्ताऽ-

धिष्ठानमाभाति तथा भ्रमेण ॥ २३५ ॥

अतः जगत् परात्मनः पृथक् न अस्ति । पृथक्-प्रतीतिः तु मृषा गुणादिवत् । आरोपितस्य अर्थवत्ता-किम अस्ति ? अधिष्ठानम् भ्रमेण तथा आभाति ।

अतः – therefore; जगत् – the universe; परात्मनः – from the Supreme Self; पृथक् – apart from; न – does not; अस्ति – exist; पृथक्-प्रतीतिः – the perception of its separateness; तु-मृषा – is false; गुणादिवत् – like the qualities; आरोपितस्य –a superimposed attribute; अर्थवत्ता-किम-अस्ति – has

any meaning apart from its subsratum; अधिष्ठानम् – it is the substratum which; भ्रमेण – through delusion; तथा – like that; आभाति – appears.

Therefore the universe does not exist apart from the Supreme Self; and the perception of its separateness is false like the qualities. Has a superimposed attribute any meaning apart from its substratum? It is the substratum which appears like that through delusion.

भ्रान्तस्य यद्यद्भ्रमतः प्रतीतं
ब्रह्मैव तत्तद्रजतं हि शुक्तिः ।
इदंतया ब्रह्म सदैव रूप्यते
त्वारोपितं ब्रह्मणि नाममात्रम् ॥ २३६ ॥

भ्रान्तस्य यद्-यद् भ्रमतः प्रतीतं तत्-तत् ब्रह्म-एव, शुक्तिः-हि रजतं । इदंतया ब्रह्म सदा-एव रूप्यते । ब्रह्मणि तु नाममात्रम् आरोपितं ।

भ्रान्तस्य – by a deluded man; यद्-यद्-तत्-तत् – whatever; भ्रमतः – through mistake; प्रतीतं – perceived; ब्रह्म-एव – is Brahman & Brahman alone; शुक्तिः-हि – nothing but the mother-of-pearl; रजतं – the silver is; इदंतया – as this universe; ब्रह्म – it is Brahman which; सदा-एव – always; रूप्यते – appears; ब्रह्मणि-आरोपितं – that which is superimposed on Brahman viz. the universe; तु – whereas; नाममात्रम् – is merely a name.

Whatever perceived by a deluded man through mistake is Brahman & Brahman alone! The silver is nothing but the mother-of-pearl. It is Brahman which always appears as this universe, whereas that which is superimposed on Brahman viz. the universe, is merely a name.

अतः परं ब्रह्म सदद्वितीयं
विशुद्धविज्ञानघनं निरञ्जनम् ।
प्राशान्तमाद्यन्तविहीनमक्रियं
निरन्तरानन्दरसस्वरूपम् ॥ २३७ ॥
निरस्तमायाकृतसर्वभेदं
नित्यं सुखं निष्कलमप्रमेयम् ।
अरूपमव्यक्तमनाख्यमव्ययं
ज्योतिः स्वयं किञ्चिदिदं चकास्ति ॥ २३८ ॥

अतः इदं किञ्चित् चकास्ति *(तत्)* स्वयं परं ब्रह्म सत् अद्वतीयं विशुद्ध-विज्ञानघनं निरञ्जनम् प्राशान्तम् आद्यन्तविहीनम् अक्रियं निरन्तर-आनन्द-रसस्वरूपम् निरस्त-मायाकृत-सर्वभेदं नित्यं सुखं निष्कलम् अप्रमेयम् अरूपम् अव्यक्तम् अनाख्यम् अव्ययं ज्योतिः ।

अतः – hence; इदं – this; किञ्चित् – whatever – viz. universe; चकास्ति – is manifested; *(तत्)* – स्वयं – Itself; परं – is the Supreme; ब्रह्म – Brahman; सत् – the real; अद्वतीयं – the One without a second; विशुद्ध – pure; विज्ञानघनं – the Essence of Knowledge; निरञ्जनम् – taintless;

प्रशान्तम् – serene; आद्यन्तविहीनम् – devoid of beginning & end; अक्रियं – beyond activity; निरन्तर-आनन्द-रसस्वरूपम् –the Essence of Bliss Absolute; निरस्त-मायाकृत-सर्वभेदं – transcending all the diversities created by Maya or nescience; नित्यं – eternal; सुखं – delight by nature; निष्कलम् – free from increase & decrease; अप्रमेयम् – immeasurable; अरूपम् – formless; अव्यक्तम् – undifferentiated; अनाख्यम् – nameless; अव्ययं – immutable; ज्योतिः – self-luminous.

Hence whatever is manifested viz. this universe, is the Supreme Brahman Itself; the real, the One without a second, pure, the Essence of Knowledge, taintless, serene, devoid of beginning & end, beyond activity, the Essence of Bliss Absolute, transcending all the diversities created by Maya or nescience, eternal, delight by nature, free from increase & decrease, immeasurable formless, undifferentiated, nameless, immutable, self-luminous.

ज्ञातृज्ञेयज्ञानशून्यमनन्तं निर्विकल्पकम् ।

केवलाखण्डचिन्मात्रं परं तत्त्वं विदुर्बुधाः ॥ २३९ ॥

ज्ञातृ-ज्ञेय-ज्ञान-शून्यम् अनन्तं निर्विकल्पकम् केवल-अखण्ड-चिन्मात्रं परं तत्त्वं विदुः बुधाः ।

ज्ञातृ-ज्ञेय-ज्ञान-शून्यम् – in which there is no difference of knower, knowledge & known; अनन्तं – infinite; निर्विकल्पकम् – which has no other alternative; केवल-अखण्ड-चिन्मात्रं – the essence of Consciousness Absolute; परं-तत्त्वं – the Supreme truth, Brahman; विदुः – realize; बुधाः – sages.

Sages realize the Supreme truth, Brahman, the essence of Consciousness Absolute in which there is no difference of knower, knowledge & known and which has no other alternative.

अहेयमनुपादेयं मनोवाचामगोचरम् ।

अप्रमेयमनाद्यन्तं ब्रह्म पूर्णमहं महः ॥ २४० ॥

अहेयम्-अनुपादेयं मनोवाचाम्-अगोचरम् अप्रमेयम् अनाद्यन्तं पूर्णम् महः ब्रह्म अहं *(अस्मि)* ।

अहेयम्-अनुपादेयं – which can be neither thrown away nor taken-up; मनोवाचाम्-अगोचरम् – which is beyond the reach of mind & speech; अप्रमेयम् – immeasurable; अनाद्यन्तं – without beginning & end; पूर्णम् – the whole; महः – of surpassing glory; ब्रह्म – Brahman; अहं – I; *(अस्मि)* – am.

I am the whole Brahman of surpassing glory, immeasurable, without beginning & end, which is beyond the reach of mind & speech, and which can be neither thrown away nor taken-up.

तत्त्वंपदाभ्यामभिधीयमानयोः

ब्रह्मात्मनोः शोधितयोर्यदीत्थम् ।

श्रुत्या तयोस्तत्त्वमसीति सम्यग्

एकत्वमेव प्रतिपाद्यते मुहुः ॥२४१ ॥

ऐक्यं तयोर्लक्षितयोर्न वाच्ययोः

निगद्यतेऽन्योन्यविरुद्धधर्मिणोः ।

खद्योतभान्वोरिव राजभृत्ययोः

कूपाम्बुराश्योः परमाणुमेर्वोः ॥ २४२ ॥*

यदि श्रुत्या सम्यग् मुहुः, तत्-त्वं-पदाभ्याम् अभिधीयमानयोः शोधितयोः ब्रह्म-आत्मनोः 'तत्-त्वं-असि' इति इत्थम् तयोः एकत्वम् एव प्रतिपाद्यते। तयोः ऐक्यं लक्षितयोः निगद्यते, न-वाच्ययोः, खद्योत-भान्वोः राज-भृत्ययोः कूप-अम्बुराश्योः परमाणु-मेर्वोः अन्योन्य-विरुद्धधर्मिणोः इव।

यदि – even if; श्रुत्या – by scriptures; मुहुः – repeatedly; तत्-त्वं-पदाभ्याम् – denoted by the terms that & you respectively; अभिधीयमानयोः – meaning which is sought to be inculcated; शोधितयोः – divesting these terms of their relative association; ब्रह्म-आत्मनोः – of Brahman & soul; 'तत्-त्वं-असि' – 'You are that' इति-एव – in the dictum; तयोः – their; सम्यग् – the absolute; एकत्वम् – identity; प्रतिपाद्यते – establishes; इत्थम् – in this way; तयोः – of their; ऐक्यं – the identity; लक्षितयोः – implied; निगद्यते –is established; न-वाच्ययोः – not literal; खद्योत-भान्वोः – the sun & a glow-warm; राज-भृत्ययोः – the king & a servant; कूप-अम्बुराश्योः – the ocean & a well; परमाणु-मेर्वोः – Mount Meru & an atom; अन्योन्य-विरुद्धधर्मिणोः – for they are of attributes contradictory to each other; इव – like.

Even if is scriptures in the dictum 'You are that' repeatedly establishes, the absolute identity of Brahman & soul, denoted by the terms that & you respectively, divesting these terms of their relative association; it establishes the identity of their implied and not literal meaning which is sought to be inculcated; for they are of attributes contradictory to each other like the sun & a glow-warm, the king & a servant, the ocean & a well or Mount Meru & an atom.

Or

Even if the absolute identity of Brahman & soul, denoted by the terms that & you respectively, divesting these terms of their relative association in the dictum 'You are that' is repeatedly established, by scriptures; it establishes the identity of their implied and not literal meaning which is sought to be inculcated; for they are of attributes contradictory to each other like the sun & a glow-warm, the king & a servant, the ocean & a well or Mount Meru & an atom.

तयोर्विरोधोऽयमुपाधिकल्पितो
न वास्तवः कश्चिदुपाधिरेषः।
ईशस्य माया महदादिकारणं
जीवस्य कार्यं श्रृणु पञ्चकोशम्॥ २४३॥

तयोः-अयम् विरोधः उपाधि-कल्पितः कश्चित् न-वास्तवः। श्रृणु एषः ईशस्य उपाधिः महदादिकारणं माया *(तस्य)* कार्यं पञ्चकोशम् *(तु)* जीवस्य *(उपाधिः)*।

तयोः – between them; अयम्-विरोधः – this contradiction; उपाधि-कल्पितः – is imagined by superimposition; कश्चित् – something; न-वास्तवः – and is not real; श्रृणु – listen; एषः – this; ईशस्य – in case of Isvara (the Lord); उपाधिः – this superimposition; महदादिकारणं – which is the cause of Mahat & the rest; माया – is nescience; *(तस्य)* – of Maya; कार्यं – which are the effect; पञ्चकोशम् – the five sheaths; *(तु)* – whereas; जीवस्य – in case of the individual soul.

This contradiction between them is imagined by superimposition and is not something real; and listen, this superimposition in case of Isvara (the Lord), is nescience, which is the cause of Mahat& the rest, whereas in case of the individual soul it consists of the five sheaths which are the effect of Maya .

एतावुपाधी परजीवयोस्तयोः

सम्यङ्निरासे न परो न जीवः ।

राज्यं नरेन्द्रस्य भटस्य खेटकः

तयोरपोहे न भटो न राजा ॥ २४४ ॥

एतौ पर-जीवयोः उपाधी तयोः-सम्यङ्-निरासे न-परः-न-जीवः नरेन्द्रस्य राज्यं भटस्य खेटकः तयोः-अपोहे न-राजा-न-भटो ।

एतौ – these two are; पर-जीवयोः – of the Lord and individual soul respectively; उपाधी – the superimpositions; तयोः-सम्यङ्-निरासे – when these are perfectly eliminated; न-परः-न-जीवः – there is neither the Lord nor individual soul; नरेन्द्रस्य – of a king; राज्यं – a kingdom is the symbol; भटस्य – of the solder; खेटकः – a shield; तयोः-अपोहे – when these are taken away; न-राजा-न-भटो – there is neither king nor solder.

These two are the superimpositions of the Lord and individual soul respectively, and when these are perfectly eliminated, there is neither the Lord nor individual soul. A kingdom is the symbol of a king, and a shield of the solder when these are taken away, there is neither king nor solder.

अथात आदेश इति श्रुतिः स्वयं

निषेधति ब्रह्मणि कल्पितं द्वयम् ।

श्रुतिप्रमाणानुगृहीतबोधा-

त्तयोर्निरासः करणीय एव ॥ २४५ ॥

'अथ अत आदेशः' इति-श्रुतिः-स्वयं ब्रह्मणि-कल्पितं द्वयम् निषेधति ।

श्रुति-प्रमाण-अनुगृहीत-बोधात् तयोः निरासः करणीयः-एव ।

'अथ अत आदेशः' – 'Now then is the injunction'; इति – in the words; श्रुतिः-स्वयं – the Vedas themselves; ब्रह्मणि-कल्पितं – imaginedin the Brahman; द्वयम् – the duality; निषेधति – repudiate; श्रुति-प्रमाण-अनुगृहीत-बोधात् – by means of realization supported by the authority of the Vedas; तयोः – those two superimpositions; निरासः – to eliminate; करणीयः-एव – one must needs.

The Vedas themselves in the words 'Now then is the injunction' etc., repudiate the duality imagined in the Brahman. One must needs to eliminate those two superimpositions by means of realization supported by the authority of the Vedas.

नेदं नेदं कल्पितत्वान्न सत्यं

रज्जुदृष्टव्यालवत्स्वप्नवच्च ।

इत्थं दृश्यं साधुयुक्त्या व्यपोह्य

ज्ञेयः पश्चादेकभावस्तयोर्यः ॥ २४६ ॥

'न इदं न इदं' रज्जौ-दृष्ट-व्यालवत् स्वप्नवत् च कल्पितत्वात् न सत्य इत्थं युक्त्या साधु दृश्यं व्यपोह्य पश्चात् तयोः एकभावः ज्ञेयः ।

'न इदं न इदं' – 'neither this gross nor this subtle universe'; रज्जौ-दृष्ट-व्यालवत् – like the snake seen in the rope; स्वप्नवत् – like dreams; च – and; कल्पितत्वात् – being imagined; न-सत्यं – they are not real; इत्थं – in this way; युक्त्या – by means of reasoning; साधु – perfectly; दृश्यं – the objective world; व्यपोह्य – eliminating; पश्चात् – next; तयोः-एकभावः – the oneness that underlies the Lord & an individual soul; ज्ञेयः – one should realize.

'Neither this gross nor this subtle universe (is the Atman).' They are not real, being imagined, like the snake seen in the rope or like dreams. Perfectly eliminating the objective world in this way by means of reasoning, one should next realize the oneness that underlies the Lord & an individual soul.

ततस्तु तौ लक्षणया सुलक्ष्यौ
तयोरखण्डैकरसत्वसिद्धये ।
नालं जहत्या न तथाऽजहत्या
किन्तूभयार्थात्मिकयैव भाव्यम् ॥ २४७ ॥

ततः-तु तयोः अखण्ड-एकरसत्व-सिद्धये तौ लक्षणया सुलक्ष्यौ, जहत्या-न-अलं, तथा न-अजहत्या, किन्तु उभयार्थात्मिकया एव भाव्यम् ।

ततः-तु – hence; तयोः – those two (the Lord & an individual soul); अखण्ड-एकरसत्व-सिद्धये – so that their absolute identity may be established; तौ – their; लक्षणया – through implied meanings; सुलक्ष्यौ – must be carefully considered, जहत्या-न – neither the method of total rejection; <u>*तथा*</u> न-अजहत्या – nor that of complete retention; अलं – will do; किन्तु – but; उभयार्थात्मिकया-एव – through the process which combines the two; भाव्यम् – one must reason it out.

Hence those two (the Lord & an individual soul) must be carefully considered through implied meanings, so that their absolute identity may be established. Neither the method of total nor that of complete retention rejection will do; but one must reason it out through the process which combines the two.

स देवदत्तोऽयमितीह चैकता
विरुद्धधर्मांशमपास्य कथ्यते ।
यथा तथा तत्त्वमसीतिवाक्ये
विरुद्धधर्मानुभयत्र हित्वा ॥ २४८ ॥
संलक्ष्य चिन्मात्रतया सदात्मनोः
अखण्डभावः परिचीयते बुधैः ।
एवं महावाक्यशतेन कथ्यते
ब्रह्मात्मनोरैक्यमखण्डभावः ॥ २४९ ॥

यथा 'सः-देवदत्तः-अयं-इति' इह विरुद्ध-धर्मांशम् अपास्य एकता कथ्यते तथा 'तत्-त्वम्-असि'-इति-वाक्ये उभयत्र विरुद्ध-धर्मान् हित्वा च चिन्मात्रतया-संलक्ष्य बुधैः सत्-आत्मनोः-अखण्डभावः परिचीयते एवं महावाक्यशतेन ब्रह्मात्मनोः ऐक्यं अखण्डभावः कथ्यते।

यथा – just as; 'सः-देवदत्तः-अयं' – "this is that Devatta", इति-इह – in the sentence; विरुद्ध-धर्मांशम् – the contradictory portion; अपास्य – eliminating; एकता – the identity; कथ्यते – is spoken of; तथा – so; 'तत्-त्वम्-असि' – "You are that" इति-वाक्ये – in the sentence; उभयत्र – on both sides; विरुद्ध-धर्मान् – the contradictory elements; हित्वा – give up; च – and; चिन्मात्रतया-संलक्ष्य – noticing carefully the essence of both, which is is the Consciousness-knowledge-Absolute; बुधैः – the wise man must; सत्-आत्मनोः-अखण्डभावः – the identity of the Lord & an individual soul; परिचीयते – recognize; एवं – thus; महावाक्यशतेन – hundreds of the prime-dictums in the scriptures; ब्रह्मात्मनोः – of the Brahman & an individual soul; ऐक्यं – the oneness; अखण्डभावः – identity; कथ्यते – inculcate.

Just as in the sentence, "this is that Devatta", the identity is spoken of, eliminating the contradictory portion, so in the sentence, "You are that", the wise man must give up the contradictory elements and recognize the identity of the Lord & an individual soul, noticing carefully the essence of both, which is the Consciousness-knowledge-Absolute. Thus hundreds of the prime-dictums in the scriptures inculcate the oneness & an identity of the Brahman & an individual soul.

अस्थूलमित्येतदसन्निरस्य
सिद्धं स्वतो व्योमवदप्रतर्क्यम्।
अतो मृषामात्रमिदं प्रतीतं
जहीहि यत्स्वात्मतया गृहीतम्।
ब्रह्माहमित्येव विशुद्धबुद्ध्या
विद्धि स्वमात्मानमखण्डबोधम्॥ २५०॥

'अस्थूलं'-इति एतत्-असत् निरस्य व्योमवत्-अप्रतर्क्यम् स्वतः-सिद्धं यत् स्व-आत्मतया प्रतीतं गृहीतम् इदं मृषामात्रं जहीहि अतः विशुद्धबुद्ध्या अखण्ड-बोधं स्वं-आत्मानम् 'अहं-ब्रह्म' इति-एव विद्धि, ।

'अस्थूलं'-इति – in the light of such passages as "It is not gross" etc.; एतत्-असत् – the non-self; निरस्य – eliminating; व्योमवत्-अप्रतर्क्यम् – unattached like the sky & beyond the range of thought; स्वतः-सिद्धं – which is self-established; यत् – which; स्व-आत्मतया – as your own self; प्रतीतं – which you have perceived; गृहीतम् – which you have accepted; इदं – this; मृषामात्रं – mere phantom; जहीहि – dismiss;अतः – thereafter; विशुद्धबुद्ध्या – by means of the purified understanding; अखण्ड-बोधं – the Knowledge Absolute; स्वं-आत्मानम् – your own Self; 'अहं-ब्रह्म' – "I am the Brahman"; इति-एव – that; विद्धि – realize.

Eliminating the non-self, in the light of such passages as "It is not gross" etc., which is self-established and unattached like the sky & beyond the range of thought; dismiss this mere phantom which you have perceived and accepted as your own self. Thereafter realize your own Self, by means of the purified understanding that "I am the Brahman" the Knowledge Absolute.

मृत्कार्यं सकलं घटादि सततं मृन्मात्रमेवाहितं

तद्वत्सज्जनितं सदात्मकमिदं सन्मात्रमेवाखिलम्।

यस्मान्नास्ति सतः परं किमपि तत्सत्यं स आत्मा स्वयं

तस्मात्तत्त्वमसि प्रशान्तममलं ब्रह्माद्वयं यत्परम्॥ २५१॥

घटादि-सकलं-मृत्कार्यं सततं मृन्मात्रम्-एव आहितं, तद्वत् इदं-अखिलम् सत्-जनितं सदात्मकम्-सत्-मात्रम्-एव, यस्मात् सतः-परं किम्-अपि न-अस्ति तत्-सत्यं सः-स्वयं-आत्मा, तस्मात् यत् प्रशान्तम् अमलं परम् अद्वयं ब्रह्म तत् त्वम् असि।

घटादि-सकलं-मृत्कार्यं – all modifications of clay such as a jar; सततं – which are always; मृन्मात्रम्-एव – are (in reality) nothing but clay; आहितं – accepted by the mind as real; तद्वत् – similarly; इदं-अखिलम् – this entire universe; सत्-जनितं – which is produced from the real Brahman; सदात्मकम्-सत्-मात्रम्-एव – is Brahman Itself and nothing but That; यस्मात् – because; सतः-परं – but Brahman; किम्-अपि – whatever else; न-अस्ति – there is nothing; तत्-सत्यं – that is the only reality; सः-स्वयं-आत्मा – self existent our own Self; तस्मात् – therefore; यत् – which is; प्रशान्तम् – serene; अमलं – pure; परम् – Supreme; अद्वयं – the one without a second; ब्रह्म – Brahman; तत् – that; त्वम् – you; असि – are.

All modifications of clay such as a jar, which are always accepted by the mind as real, are (in reality) nothing but clay. Similarly, this entire universe which is produced from the real Brahman, is Brahman Itself and nothing but That. Because there is nothing else whatever but Brahman and that is the only self existent reality, our own Self, therefore you are that, which is serene, pure, Supreme Brahman, the one without a second.

निद्राकल्पितदेशकालविषयज्ञात्रादि सर्वं यथा

मिथ्या तद्वदिहापि जाग्रति जगत्स्वाज्ञानकार्यत्वतः।

यस्मादेवमिदं शरीरकरणप्राणाहमाद्यप्यसत्

तस्मात्तत्त्वमसि प्रशान्तममलं ब्रह्माद्वयं यत्परम्॥ २५२॥

यथा निद्रा-कल्पित-देश-काल-विषय-ज्ञात्रादि सर्वं मिथ्या तद्वत् इह-जाग्रति-अपि जगत् स्व-अज्ञान-कार्यत्वतः यस्मात् इदं शरीर-करण-प्राण-अहमादि-एवं अपि असत्।

तस्मात् यत् प्रशान्तम् अमलं परम् अद्वयं ब्रह्म तत् त्वम् असि।

यथा – as; देश-काल-विषय-ज्ञात्रादि – the place, time, knower etc.; निद्रा-कल्पित – called up in dream; सर्वं – all; मिथ्या – are unreal; तद्वत् – so; इह-जाग्रति-अपि – also here in the waking state; जगत् – is the world experienced; स्व-अज्ञान-कार्यत्वतः – for it is all an effect of one's own ignorance; *यस्मात् – because*; इदं – this; शरीर-करण-प्राण-अहमादि – body, the organs, the vital

force, egotism etc.; अपि – also; एवं – thus; असत् – are thus unreal; तस्मात् – therefore; यत् – which is; प्रशान्तम् – serene; अमलं – pure; परम् – Supreme; अद्वयं – one without second; ब्रह्म – the Brahman; तत् – that; त्वम् – you; असि – are.

As the place, time, knower etc. called up in dream are all unreal, so also is the world experienced here in the waking state, for it is all an effect of one's own ignorance. Thus this body, the organs, the vital force, egotism etc. are also unreal; therefore you are that which is serene, pure, the Supreme Brahman one without second.

यत्र भ्रान्त्या कल्पित तद्विवेके

तत्तन्मात्रं नैव तस्माद्विभिन्नम्।

स्वप्ने नष्टं स्वप्नविश्वं विचित्रं

स्वस्माद्भिन्नं किन्नु दृष्टं प्रबोधे ॥ २५३ ॥

यत्र भ्रान्त्या कल्पित तत्-विवेके तत् तन्मात्रं-एव तस्मात् न विभिन्नम्।

विचित्रं स्वप्नविश्वं स्वप्ने-दृष्टं प्रबोधे नष्टं स्वस्मात्-भिन्नं किं-नु ?

तत्– what is यत्र – in something; भ्रान्त्या – erroneously; कल्पित – supposed to exist; तत्-विवेके – when the truth about it has been known; तन्मात्रं-एव – nothing but its substratum only; तस्मात्-न-विभिन्नम् – not at all different from it; विचित्रं – the diversified; स्वप्नविश्वं – dream universe; स्वप्ने-दृष्टं-नष्टं– appears and passes away in the dream itself; प्रबोधे – on waking; – स्वस्मात्-भिन्नं – as something distinct from one's own Self; किं-नु – does it appear?

What is erroneously supposed to exist in something, when the truth about it has been known, is nothing but its substratum only, and not at all different from it: the diversified dream universe appears and passes away in the dream itself; does it appear on waking as something distinct from one's own Self ?

जातिनीतिकुलगोत्रदूरगं

नामरूपगुणदोषवर्जितम्।

देशकालविषयातिवर्ति यद्

ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५४ ॥

जाति-नीति-कुल-गोत्र-दूरगं नाम-रूप-गुण-दोष-वर्जितम् देश-काल-विषय-अतिवर्ति यद् ब्रह्म तत् त्वम् असि भावय आत्मनि।

जाति-नीति-कुल-गोत्र-दूरगं – beyond the caste & creed, family& lineage; नाम-रूप-गुण-दोष-वर्जितम् – devoid of name& form, merits & demerits; देश-काल-विषय-अतिवर्ति – transcending space, time & sense-objects; यद् – which is; ब्रह्म – Brahman; तत् – that; त्वम् – you; असि – are; *(इति)* – like; भावय – meditate; आत्मनि – in your mind.

Meditate in your mind like you are that Brahman which is beyond the caste & creed, family& lineage; devoid of name& form, merits & demerits; and transcending space, time & sense-objects.

यत्परं सकलवागगोचरं

गोचरं विमलबोधचक्षुषः ।

शुद्धचिद्घनमनादि वस्तु यद्

ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५५ ॥

यत् परं सकल-वाग्-अगोचरं विमल-बोध-चक्षुषः गोचरं शुद्ध-चिद्घनम् अनादि यद् ब्रह्म-वस्तु तत्-त्वम्-असि

*(इति)* आत्मनि भावय ।

यत् – that; परं-ब्रह्म – Supreme Brahman; सकल-वाग्-अगोचरं – beyond the range of all speech; विमल-बोध-चक्षुषः –to the eye of pure illumination; गोचरं – but accessible; शुद्ध-चिद्घनम् – pure & the embodiment of Knowledge; अनादि-वस्तु – beginningless entity; यद् – which is; तत्-त्वम्-असि – you are that; *(इति)* – like; आत्मनि – in your mind; भावय – meditate.

Meditate in your mind like you are that Supreme Brahman, that beginning-less entity, which is beyond the range of all speech, but accessible to the eye of pure illumination, pure & the embodiment of Knowledge.

षड्भिरूर्मिभिरयोगि योगिहृद्-

भावितं न करणैर्विभावितम् ।

बुद्ध्यवेद्यमनवद्यमस्ति यद्

ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५६ ॥

षड्भिः-उर्मिभिः अयोगि योगि-हृद्-भावितं करणैः न-र्विभावितम् बुद्धि-अवेद्यम् यद् अनवद्यम् अस्ति ब्रह्म

तत् त्वम् असि*(इति)* आत्मनि भावय ।

षड्भिः-उर्मिभिः – by sixfold wave {viz. decay, death, hunger, thirst, grief & delusion}; अयोगि – untouched, योगि-हृद्-भावितं – meditated by the yogin/Self-controlled one's heart; करणैः – by the sense-organs; न-र्विभावितम् – but not grasped; बुद्धि-अवेद्यम् – which intellect cannot know; यद् – which is; अनवद्यम् अस्ति – which is unimpeachable; ब्रह्म – Brahman; तत् – that; त्वम् – you; असि – are; *(इति)* – like; आत्मनि – in your mind; भावय – meditate.

Meditate in your mind like you are that Brahman which is untouched by six-fold wave {viz. decay, death, hunger, thirst, grief & delusion}; meditated by the yogin/Self-controlled one's heart, but not grasped by the sense-organs; which intellect cannot know; and which is unimpeachable.

भ्रान्तिकल्पितजगत्कलाश्रयं

स्वाश्रयं च सदसद्विलक्षणम् ।

निष्कलं निरुपमानवद्धि यद्

ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५७ ॥

भ्रान्ति-कल्पित-जगत्-कलाश्रयं स्व-आश्रयं सद्-असद्-विलक्षणम् निष्कलं च निरुपमानवत् हि यद्

ब्रह्म तत् त्वम् असि*(इति)* आत्मनि भावय ।

भ्रान्ति-कल्पित-जगत्-कलाश्रयं – the substratum of the universe with its various subdivisions, which are all creation of delusion; स्व-आश्रयं –which itself has no other supprot; सद्-असद्-विलक्षणम् – distinct from the gross & subtle; निष्कलं – has no parts; च – and; निरुपमानवत् हि – has verily no exemplar; यद् – which is; ब्रह्म – Brahman; तत् – that; त्वम् – you; असि – are; *(इति)* – like; आत्मनि – in your mind; भावय – meditate.

Meditate in your mind like you are that Brahman which is: the substratum of the universe with its various subdivisions-which are all creation of delusion, distinct from the gross & subtle; and which itself has verily no: other support, parts, or exemplar.

जन्मवृद्धिपरिणत्यपक्षय-
व्याधिनाशनविहीनमव्ययम्।
विश्वसृष्ट्यवविघातकारणं
ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५८ ॥

जन्म-वृद्धि-परिणति-अपक्षय-व्याधि-नाशन-विहीनम् अव्ययम् विश्व-सृष्टि-अव-विघात-कारणं ब्रह्म तत् त्वम् असि *(इति)* आत्मनि भावय।

जन्म-वृद्धि-परिणति-अपक्षय-व्याधि-नाशन-विहीनम् – free from birth, growth, development, waste, disease & death; अव्ययम् – indestructible; विश्व-सृष्टि-अव-विघात-कारणं – the cause of the projection, maintenance & dissolution of the universe; ब्रह्म – Brahman; तत् – that; त्वम् – you; असि – are; *(इति)* – like; आत्मनि – in your mind; भावय – meditate.

Meditate in your mind like you that Brahman which is: indestructible, free from birth, growth, development, waste, disease & death and the cause of the projection, maintenance & dissolution of the universe.

अस्तभेदमनपास्तलक्षणं
निस्तरङ्गजलराशिनिश्चलम्।
नित्यमुक्तमविभक्तमूर्ति यद्
ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५९ ॥

अस्तभेदम् अनपास्तलक्षणं निस्तरङ्ग-जलराशि-निश्चलम् नित्यमुक्तम् अविभक्तमूर्ति यद् ब्रह्म तत् त्वम् असि *(इति)* आत्मनि भावय।

अस्तभेदम् – free from differentiation; अनपास्तलक्षणं – whose essence is never non-existent; निस्तरङ्ग-जलराशि-निश्चलम् – unmoved like the ocean without waves; नित्यमुक्तम् – the ever free; अविभक्तमूर्ति – of indivisible form; यद् – which is; ब्रह्म – Brahman; तत् – that; त्वम् – you; असि – are; *(इति)* – like; आत्मनि – in your mind; भावय – meditate.

Meditate in your mind like you are that Brahman the ever free which is: free from differentiation, unmoved like the ocean without waves, of indivisible form; and whose essence is never non-existent.

एकमेव सदनेककारणं

कारणान्तरनिरास्यकारणम्।

कार्यकारणविलक्षणं स्वयं

ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६० ॥

एकम्-एव-सत् अनेककारणं कारणान्तर-निरासि-अकारणम् कार्य-कारण-विलक्षणं स्वयं ब्रह्म तत् त्वम् असि *(इति)* आत्मनि भावय।

एकम्-एव-सत् – the single Truth; अनेककारणं – the cause of many; कारणान्तर-निरासि – refutes all othet causes; अकारणम् – Itself without cause; कार्य-कारण-विलक्षणं – distinct from nescience and its effect, the universe; स्वयं – independent; ब्रह्म– Brahman; तत् – that; त्वम् – you; असि – are; *(इति)* – like; आत्मनि – in your mind; भावय – meditate.

Meditate in your mind like you are that Brahman which is: the single Truth, independent, the cause of many - but Itself without cause & distinct from nescience and its effect, the universe.

निर्विकल्पकमनल्पमक्षरं

यत्क्षराक्षरविलक्षणं परम्।

नित्यमव्ययसुखं निरञ्जनं

ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६१ ॥

निर्विकल्पकम् अनल्पम् अक्षरं क्षर-अक्षर-विलक्षणं परम् नित्यम् अव्ययसुखं निरञ्जनं यत् ब्रह्म तत् त्वम् असि *(इति)* आत्मनि भावय।

निर्विकल्पकम् – free from duality; अनल्पम् – infinite; अक्षरं – indestructible; क्षर-अक्षर-विलक्षणं – distinct from a body & embodied-soul; परम् – supreme; नित्यम् – eternal; अव्ययसुखं – the Bliss free from decay; निरञ्जनं – taintless; यत् – which is; ब्रह्म – Brahman; तत् – that; त्वम् – you; असि – are; *(इति)* – like; आत्मनि – in your mind; भावय – meditate.

Meditate in your mind like you are that Brahman which is: free from duality, infinite, indestructible, distinct from a body & embodied-soul, supreme, eternal, the Bliss free from decay, and taintless.

यद्विभाति सदनेकधा भ्रमा-

न्नामरूपगुणविक्रियात्मना।

हेमवत्स्वयमविक्रियं सदा

ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६२ ॥

यत् सत् भ्रमात् नामरूपगुणविक्रियात्मना अनेकधा विभाति स्वयम् हेमवत् सदा अविक्रियं ब्रह्म तत् त्वम् असि *(इति)* आत्मनि भावय।

यत् – which is; सत् – the Realty; भ्रमात् – owing to delusion; नामरूपगुणविक्रियात्मना – taking on names, forms, attributes, & changes; अनेकधा – variously; विभाति – appears; स्वयम् – Itself; हेमवत्

– like gold in its modifications; सदा – always; अविक्रियं – unchanged; ब्रह्म – Brahman; तत् – that; त्वम् – you; असि – are; *(इति)* – like; आत्मनि – in your mind; भावय – meditate.

Meditate in your mind like you are that Brahman which is: the Realty that appears variously owing to delusion, taking on names, forms, attributes, & changes; but Itself always unchanged, like gold in its modifications.

यच्चकास्त्यनपरं परात्परं

प्रत्यगेकरसमात्मलक्षणम् ।

सत्यचित्सुखमनन्तमव्ययं

ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६३ ॥

यत् अनपरं परात् परं प्रत्यग्-एकरसम् आत्मलक्षणम् सत्य-चित्-सुखम् अनन्तम् अव्ययं ब्रह्म चकास्ति तत् त्वम् असि *(इति)* आत्मनि भावय ।

यत् – which is; अनपरं – beyond everything; परात्-परं – superior to Its effects, the universe; प्रत्यग्-एकरसम् – the inmost Self of all, free from differentiation; आत्मलक्षणम् – the Real Self; सत्य-चित्-सुखम् – the Existence-Consciousness-Bliss Absolute; अनन्तम् – infinite; अव्ययं – immutable; ब्रह्म – Brahman; चकास्ति – shining; तत् – that; त्वम् – you; असि – are; *(इति)* – like; आत्मनि – in your mind; भावय – meditate.

Meditate in your mind like you are that Brahman which is: shining, beyond everything, superior to Its effects, the universe, the inmost Self of all, free from differentiation, the Real Self the Existence-Consciousness-Bliss Absolute, infinite, and immutable.

उक्तमर्थमिममात्मनि स्वयं

भावयेत्प्रथितयुक्तिभिर्धिया ।

संशयादिरहितं कराम्बुवत्

तेन तत्त्वनिगमो भविष्यति ॥ २६४ ॥

उक्तम्-इमम्-अर्थम् स्वयं आत्मनि प्रथितयुक्तिभिः धिया भावयेत्, तेन कराम्बुवत्-संशयादिरहितं तत्त्वनिगमं-भविष्यति ।

उक्तम्-इमम्-अर्थम् – on the Truth inculcated above; स्वयं – oneself; आत्मनि – in one's own mind; प्रथितयुक्तिभिः – by means of recognized arguments; धिया – through the intellect; भावयेत् – one must meditate; तेन – by that means; कराम्बुवत् – like water in the palm of one's hand; संशयादिरहितं – free from doubt etc.; तत्त्वनिगमं – the Truth; भविष्यति – on will realize.

On the Truth inculcated above, one must oneself meditate in one's own mind, through the intellect, by means of recognized arguments. By that means on will realize the Truth free from doubt etc., like water in the palm of one's hand.

सम्बोधमात्रं परिशुद्धतत्त्वं

विज्ञाय संघे नृपवच्च सैन्ये ।

तदाश्रयः स्वात्मनि सर्वदा स्थितो

विलापय ब्रह्मणि विश्वजातम् ॥ २६५ ॥*

नृपवत्-च-सैन्ये संघे परिशुद्धतत्त्वं विज्ञाय तद्-आश्रयः स्वात्मनि-सर्वदा-स्थितः सम्बोधमात्रं विश्वजातम् ब्रह्मणि विलापय ।

नृपवत्-च-सैन्ये – like the king in an army; संघे – in this body; परिशुद्धतत्त्वं – the Brahman, knowledge absolute; विज्ञाय – realizing; तद्-आश्रयः – by resting on that knowledge; स्वात्मनि-सर्वदा-स्थितः – being ever established in your own Self; सम्बोधमात्रं-विश्वजातम् – the universe which remains mere excellent perception;, ब्रह्मणि– in Brahman; विलापय – merge.

Realizing in this body the Brahman - knowledge absolute - like the king in an army – and being ever established in your own Self by resting on that knowledge, merge the universe which remains mere excellent perception in Brahman.

बुद्धौ गुहायां सदसद्विलक्षणं

ब्रह्मास्ति सत्यं परमद्वितीयम् ।

तदात्मना योऽत्र वसेद्गुहायां

पुनर्न तस्याङ्गगुहाप्रवेशः ॥ २६६ ॥

बुद्धौ-गुहायां सद्-असद्-विलक्षणं परम् अद्वितीयम् सत्यं ब्रह्म अस्ति । यः तदात्मना अत्र गुहायां वसेत् तस्य पुनः न अङ्ग-गुहाप्रवेशः ।

बुद्धौ-गुहायां – in the cave of the intellect; सद्-असद्-विलक्षणं – distinct from the gross & subtle; सत्यं-अद्वितीयम् – the Existence one without a second;; परम्-ब्रह्म – the supreme Brahman; अस्ति – there is; तस्य-यः – for one who; तदात्मना – with the realization that he is not different from the Brahman; अत्र-गुहायां – here in this cave; वसेत् – lives; पुनः-न – there is no more; अङ्ग-गुहाप्रवेशः – rebirth.

In the cave of the intellect there is the supreme Brahman, the Existence one without a second and distinct from the gross & subtle. For one who lives here in this cave with the realization that he is not different from the Brahman there is no more rebirth.

ज्ञाते वस्तुन्यपि बलवती वासनाऽनादिरेषा

कर्ता भोक्ताप्यहमिति दृढा याऽस्य संसारहेतुः ।

प्रत्यग्दृष्ट्याऽऽत्मनि निवसता सापनेया प्रयत्ना-

न्मुक्तिं प्राहुस्तदिह मुनयो वासनातानवं यत् ॥ २६७ ॥

वस्तुनि-ज्ञाते-अपि 'कर्ता-भोक्ता अपि अहम्'-इति एषा-दृढा-बलवती-अनादि-वासना या-अस्य-संसारहेतुः सा आत्मनि-निवसता प्रत्यग्-दृष्ट्या प्रयत्नात्-अपनेया । इह यत्-वासना-तानवं तद्-मुक्तिं, मुनयःप्राहुः ।

वस्तुनि-ज्ञाते-अपि – even after the Truth has been realized; 'कर्ता-भोक्ता अपि अहम्'-इति – that 'the agent & experiencer also I am' एषा-दृढा-बलवती-अनादि-वासना – there remains that strong, beginning-less, obstinate impression; या-अस्य-संसारहेतुः – which is the cause of one's transmigration; सा – It; आत्मनि-निवसता – by living in a state of constant identification with the Suprwme-Self; प्रत्यग्-दृष्ट्या – remaining as a witness; प्रयत्नात्-अपनेया – it has to be carefully removed; इह – here & now; यत्-वासना-तानवं – which is the attenuation of impression; तद्-मुक्तिं – that liberation; मुनयः – sages; प्राहुः – call.

Even after the Truth has been realized, there remains that strong, beginning-less, obstinate impression that 'the agent & experiencer also I am', which is the cause of one's transmigration. It has to be carefully removed by living in a state of constant identification with the Supreme-Self and remaining as a witness. Sages call that liberation which is the attenuation of impression here & now.

अहं ममेति यो भावो देहाक्षादावनात्मनि ।

अध्यासोऽयं निरस्तव्यो विदुषा स्वात्मनिष्ठया ॥ २६८ ॥

देह-अक्षादौ अनात्मनि 'अहं मम्' इति यः भावः अध्यासः अयं विदुषा स्वात्मनिष्ठया निरस्तव्यः ।

देह-अक्षादौ – in body, organs etc.; अनात्मनि – which are the non-Self; 'अहं मम्' – 'me & mine' इति-यः-भावः – the idea of; अध्यासः – is superimposition; अयं – this; विदुषा – the wise man; स्वात्मनिष्ठया – by identifying himself with the Atman; निरस्तव्यः – must put a stop to.

The idea of 'me & mine' in body, organs etc., which are the non-Self is superimposition; the wise man must put a stop to this, by identifying himself with the Atman.

ज्ञात्वा स्वं प्रत्यगात्मानं बुद्धितद्वृत्तिसाक्षिणम् ।

सोऽहमित्येव सद्वृत्त्याऽनात्मन्यात्ममतिं जहि ॥ २६९ ॥

बुद्धि-तद्-वृत्ति-साक्षिणम् प्रत्यगात्मानं स्वं ज्ञात्वा 'सः अहं' इति-एव सद्-वृत्त्या अनात्मनि आत्ममतिं जहि ।

बुद्धि-तद्-वृत्ति-साक्षिणम् – the witness of the intellect & its modifications; प्रत्यगात्मानं – Inmost Self; स्वं – your own; ज्ञात्वा – realizing; 'सः अहं' – 'I am That' इति-एव – this; सद्-वृत्त्या – constantly revolving the positive thought; अनात्मनि – with the non-Self; आत्ममतिं – identification; जहि – conquer.

Realizing your own Inmost Self, the witness of the intellect & its modifications, and constantly revolving the positive thought, 'I am That', conquer this identification with the non-Self.

लोकानुवर्तनं त्यक्त्वा त्यक्त्वा देहानुवर्तनम् ।

शास्त्रानुवर्तनं त्यक्त्वा स्वाध्यासापनयं कुरु ॥ २७० ॥

लोकानुवर्तनं त्यक्त्वा, देहानुवर्तनम् त्यक्त्वा, शास्त्रानुवर्तनं त्यक्त्वा, स्व-अध्यास-अपनयं कुरु ।

लोकानुवर्तनं –the observance of social formalities; त्यक्त्वा – relinquishing; देहानुवर्तनम् – all ideas of trimming up the body; त्यक्त्वा – giving up; शास्त्रानुवर्तनं – too much engrossment with the scriptures; त्यक्त्वा – avoiding;

स्व-अध्यास-अपनयं – the superimposition that has come upon yourself; कुरु – do away with.
Relinquishing the observance of social formalities, giving up all ideas of trimming up the body, and avoiding too much engrossment with the scriptures, do away with the superimposition that has come upon yourself.

लोकवासनया जन्तोः शास्त्रवासनयापि च ।

देहवासनया ज्ञानं यथावन्नैव जायते ॥२७१ ॥

लोकवासनया-देहवासनया-शास्त्रवासनया-अपि-च जन्तोः यथावत् ज्ञानं न-एव-जायते ।

लोकवासनया-देहवासनया-शास्त्रवासनया-अपि-च – owing to the desire to: run after society, keep the body in good trim & the passion for too much study of the scriptures; जन्तोः – people; यथावत् – ज्ञानं – proper realization; न-एव-जायते – can not attain to.
Owing to the desire to: run after society, keep the body in good trim & the passion for too much study of the scriptures, people can not attain to proper realization.

संसारकारागृहमोक्षमिच्छो-

रयोमयं पादनिबन्धशृंखलम् ।

वदन्ति तज्ज्ञाः पटु वासनात्रयं

योऽस्माद्विमुक्तः समुपैति मुक्तिम् ॥ २७२ ॥

संसार-कारागृह-मोक्षम्-इच्छयोः वासनात्रय अयोमयं पटुं पाद-निबन्ध-शृंखलम् तज्ज्ञाः वदन्ति ।

यः अस्मात् विमुक्तः मुक्तिम् समुपैति ।

संसार-कारागृह-मोक्षम्-इच्छयोः – for one who seeks liberation from the prison of this world; वासनात्रय – those three desires; अयोमयं – iron; पटुं – as strong; पाद-निबन्ध-शृंखलम् – fetters to shakle down one's feet; तज्ज्ञाः – by the wise; वदन्ति – have been designated; यः – अस्मात् – विमुक्तः – he who is free from them; मुक्तिम् – to liberation; समुपैति – truly attains.
For one who seeks liberation from the prison of this world, those three desires have been designated by the wise as strong iron fetters to shackle down one's feet. He who is free from them truly attains to liberation.

जलादिसंसर्गवशात्प्रभूत-

दुर्गन्धधूताऽगरुदिव्यवासना ।

संघर्षणेनैव विभाति सम्य-

ग्विधूयमाने सति बाह्यगन्धे ॥ २७३ ॥

जलादि-संसर्गवशात आगरु-दिव्यवासना प्रभूत-दुर्गन्ध संघर्षणेन एव धूता बाह्यगन्धे सम्यक् विधूयमाने सति विभाति ।

जलादि-संसर्गवशात – due to contact with water etc,; आगरु-दिव्यवासना – the lovely fragrance of sandalwood; प्रभूत-दुर्गन्ध-धूता – hidden by a powerful stench; संघर्षणेन-एव– by rubbing only; बाह्यगन्धे-सम्यक्-विधूयमाने-सति – as soon as the foreign smell has been fully removed; विभाति – manifest itself.

The lovely fragrance of sandalwood which is hidden by a powerful stench due to contact with water etc, manifest itself as soon as the foreign smell has been fully removed by rubbing only.

अन्तःश्रितानन्तदूरन्तवासना-

धूलीविलिप्ता परमात्मवासना ।

प्रज्ञातिसंघर्षणतो विशुद्धा

प्रतीयते चन्दनगन्धवत् स्फुटम् ॥ २७४ ॥

अन्तः-श्रिता-अनन्त-दूरन्त-वासना-धूली-विलिप्ता परमात्मवासना प्रज्ञा-अति-संघर्षणतः विशुद्धा

चन्दन-गन्धवत् स्फुटम् प्रतीयते ।

अन्तः-श्रिता-अनन्त-दूरन्त-वासना-धूली-विलिप्ता – which is covered with the dust of endless, violent impressions imbedded in the mind; परमात्मवासना – the perfume i.e. real nature of the Supreme-Self; प्रज्ञा-अति-संघर्षणतः – by the constant friction of knowledge i.e. contemplation on the real nature of the Supreme-Self; विशुद्धा – when purified; चन्दन-गन्धवत् – like the fragrance of the sandal-wood; स्फुटम् – clearly; प्रतीयते – is perceived.

Like the fragrance of the sandal-wood, the perfume i.e. real nature of the Supreme-Self, which is covered with the dust of endless, violent impressions imbedded in the mind, when purified by the constant friction of knowledge i.e. contemplation on the real nature of the Supreme-Self, is clearly perceived.

अनात्मवासनाजालैस्तिरोभूतात्मवासना ।

नित्यात्मनिष्ठया तेषां नाशे भाति स्वयं स्फुटम् ॥ २७५ ॥

अनात्म-वासना-जालैः तिरोभूता आत्मवासना नित्य-आत्म-निष्ठया तेषां-नाशे स्वयं-स्फुटम्-भाति ।

अनात्म-वासना-जालैः – by innumerable desires for things other than the Self; तिरोभूता – is obstructed; आत्मवासना – the desire for Self-realization; नित्य-आत्म-निष्ठया – by constant attachment to the Self; तेषां-नाशे – when they have been destroyed; स्वयं-स्फुटम्-भाति – the Self clearly manifests Itself of Its own accord.

The desire for Self-realization is obstructed by innumerable desires for things other than the Self; when they have been destroyed by constant attachment to the Self, the Self clearly manifests Itself of Its own accord.

यथा यथा प्रत्यगवस्थितं मनः

तथा तथा मुञ्चति बाह्यवासनाम् ।

निःशेषमोक्षे सति वासनानां

आत्मानुभूतिः प्रतिबन्धशून्या ॥ २७६ ॥

यथा-यथा मनः प्रत्यग्-अवस्थितं तथा-तथा मुञ्चति बाह्य-वासनाम् । वासनानां निःशेष-मोक्षे-सति

प्रतिबन्धशून्या आत्मानुभूतिः (भवति) ।

यथा-यथा – as; मनः – the mind; प्रत्यग्-अवस्थितं –becomes gradually established in the innermost Self; तथा-तथा – it proportionately; मुञ्चति – gives up; बाह्य-वासनाम् – the desires for external objects; वासनानां-निःशेष-मोक्षे-सति – when all such desires are eliminated; प्रतिबन्धशून्या – the unobstructed; आत्मानुभूतिः (भवति) – there takes place realization of the Atman.

As the mind becomes gradually established in the innermost Self, it proportionately gives up the desires for external objects; and when all such desires are eliminated, there takes place the unobstructed realization of the Atman.

स्वात्मन्येव सदा स्थित्वा मनो नश्यति योगिनः ।

वासनानां क्षयश्चातः स्वाध्यासापनयं कुरु ॥ २७७ ॥

स्वात्मनि एव सदा स्थित्वा नश्यति मनः योगिनः वासनानां क्षयः च अतः स्व-अध्यास-अपनयं कुरु ।

स्वात्मनि-एव – on his own Self; सदा-स्थित्वा – being constantly fixed; नश्यति – dies; मनः –mind; योगिनः – of the the yogin/Self-controlled one; वासनानां – of his desires; क्षयः – the cessation; च – alongwith; अतः – so; स्व-अध्यास – yor own superimposition; अपनयं-कुरु – you should do away with.

Being constantly fixed on his own-Self, dies mind of the the yogin/Self-controlled one along-with the cessation of his desires; so you should do away with your own superimposition.

तमो द्वाभ्यां रजः सत्त्वात्सत्त्वं शुद्धेन नश्यति ।

तस्मात्सत्त्वमवष्टभ्य स्वाध्यासापनयं कुरु ॥ २७८ ॥

तमः द्वाभ्यां, रजः सत्त्वात्, सत्त्वं शुद्धेन नश्यति । तस्मात् सत्त्वम् अवष्टभ्य स्व-अध्यास अपनयं-कुरु ।

तमः – tamas; द्वाभ्यां – by both sattva & rajas; रजः – rajas; सत्त्वात् – by sattva; सत्त्वं – sattva; शुद्धेन – by the pure sattva; नश्यति – is destroyed; तस्मात् – hence; सत्त्वम् – sattva; अवष्टभ्य – through the help of; स्व-अध्यास – your superimposition; अपनयं-कुरु – do away with.

Tamas is destroyed by both sattva & rajas, rajas by sattva, and sattva by the pure sattva; hence do away with your superimposition through the help of sattva.

प्रारब्धं पुष्यति वपुरिति निश्चित्य निश्चलः ।

धैर्यमालम्ब्य यत्नेन स्वाध्यासापनयं कुरु ॥ २७९ ॥

वपुः प्रारब्धं पुष्यति इति निश्चित्य निश्चलः धैर्यम् आलम्ब्य यत्नेन स्व-अध्यास अपनयं-कुरु ।

वपुः – this body; प्रारब्धं – the resultant of past work that has led to the present birth; पुष्यति – will maintain; इति – that; निश्चित्य – knowing for certain; निश्चलः – remain quiet; धैर्यम् – patience; आलम्ब्य – with; यत्नेन – carefully; स्व-अध्यास – your superimposition; अपनयं-कुरु – do away with.

Knowing for certain that the resultant of past work that has led to the present birth will maintain this body, remain quiet and do away with your superimposition carefully and with patience.

नाहं जीवः परं ब्रह्मेत्यतद्व्यावृत्तिपूर्वकम् ।

वासनावेगतः प्राप्तस्वाध्यासापनयं कुरु ॥ २८० ॥

'अहं जीवःन (तु) परं ब्रह्म' इति अतद्-व्यावृत्ति-पूर्वकम् वासनावेगतः प्राप्त स्व-अध्यास अपनयं-कुरु ।

'अहं जीवःन (तु) परं ब्रह्म' – 'I am not the individual soul, but the Supreme Brahman'; इति – thus;

अतद्-व्यावृत्ति-पूर्वकम् – eliminating all that is not-Self; वासनावेगतः – through the momentum of the past impressions; प्राप्त – which has come; स्व-अध्यास – your superimposition; अपनयं-कुरु – do away with.

'I am not the individual soul, but the Supreme Brahman' – eliminating thus all that is not-Self, do away with your superimposition, which has come through the momentum of the past impressions.

श्रुत्या युक्त्या स्वानुभूत्या ज्ञात्वा सार्वात्म्यमात्मनः ।

क्वचिदाभासतः प्राप्तस्वाध्यासापनयं कुरु ॥ २८१ ॥

श्रुत्या युक्त्या स्व-अनुभूत्या आत्मनः सार्वात्म्यम् ज्ञात्वा क्वचिद्-आभासतः प्राप्त स्व-अध्यास अपनयं-कुरु ।

श्रुत्या-युक्त्या-स्व-अनुभूत्या – by means of scriptures, reasoning & your own perception; आत्मनः – yourself; सार्वात्म्यम् – as the Self of all; ज्ञात्वा – realizing; क्वचिद् – some time; आभासतः – erroneously; प्राप्त – which has appeared; स्व-अध्यास – your superimposition;अपनयं-कुरु – do away with.

Realizing yourself as the Self of all by means of scriptures, reasoning & your own perception, do away with your superimposition which has appeared some time erroneously.

अनादानविसर्गाभ्यामीषन्नास्ति क्रिया मुनेः ।

तदेकनिष्ठया नित्यं स्वाध्यासापनयं कुरु ॥ २८२ ॥

अन-आदान-विसर्गाभ्याम् ईषत्-क्रिया मुनेः न अस्ति । तत्-एक-निष्ठया नित्यं स्व-अध्यास अपनयं-कुरु ।

अन-आदान-विसर्गाभ्याम् – since he has no idea of accepting or giving up; ईषत्-क्रिया – whatever with action; मुनेः – the sage; न – has no; अस्ति – connection; तत्-एक-निष्ठया – through engrossment on that (or the Brahman); नित्यं – constant; स्व-अध्यास – your superimposition; अपनयं-कुरु – do away with.

The sage has no connection whatever with action, since he has no idea of accepting or giving up; so through constant engrossment on that (or the Brahman), do away with your superimposition.

तत्त्वमस्यादिवाक्योत्थब्रह्मात्मैकत्वबोधतः ।

ब्रह्मण्यात्मत्वदाढर्याय स्वाध्यासापनयं कुरु ॥ २८३ ॥

तत्त्वमसि-आदि-वाक्योत्थ-ब्रह्मात्मैकत्व-बोधतः ब्रह्मणि-आत्मत्व-दाढर्याय स्व-अध्यास अपनयं-कुरु ।

तत्त्वमसि-आदि-वाक्योत्थ-ब्रह्मात्मैकत्व-बोधतः – through the realization of the identity of Brahman and the soul, resulting from such great dicta as "You are That (Brahman)";

ब्रह्मणि-आत्मत्व-दाढर्याय – with a view to strengthening your identification with Brahman;

स्व-अध्यास – your superimposition; अपनयं-कुरु – do away with.

Through the realization of the identity of Brahman and the soul, resulting from such great dicta as "You are That (Brahman)", do away with your superimposition with a view to strengthening your identification with Brahman.

अहंभावस्य देहेऽस्मिन्निःशेषविलयावधि ।

सावधानेन युक्तात्मा स्वाध्यासापनयं कुरु ॥ २८४ ॥

अस्मिन्-देहे अहंभावस्य निःशेष-विलय अवधि सावधानेन युक्तात्मा स्व-अध्यास अपनयं-कुरु ।

अस्मिन्-देहे-अहंभावस्य –the identification with this body; निःशेष-विलय – is completely rooted out; अवधि – until; सावधानेन – with wathchfulness; युक्तात्मा – a concentrated mind; स्व-अध्यास – your superimposition; अपनयं-कुरु – do away with.

Until the identification with this body is completely rooted out, do away with your superimposition with watchfulness and a concentrated mind.

प्रतीतिर्जीवजगतोः स्वप्नवद्भाति यावता ।

तावन्निरन्तरं विद्वन्स्वाध्यासापनयं कुरु ॥ २८५ ॥

यावता जीवजगतोः स्वप्नवत् प्रतीति भाति तावत् विद्वन् निरन्तरं स्व-अध्यास अपनयं-कुरु ।

यावता-तावत् – so long as; जीवजगतोः– of the universe & soul; स्वप्नवत् – a dream-like; प्रतीति – perception; भाति – persist; विद्वन् – O! learned one; निरन्तरं – without the least break; स्व-अध्यास – your superimposition; अपनयं-कुरु – do away with.

So long as even a dream-like perception of the universe & soul persist, do away with your superimposition, O! learned one, without the least break.

निद्राया लोकवार्तायाः शब्दादेरपि विस्मृतेः ।

क्वचिन्नावसरं दत्त्वा चिन्तयात्मानमात्मनि ॥ २८६ ॥

निद्रायाः लोकवार्तायाः शब्दादेः विस्मृतेः क्वचित् अवसरं-अपि न-दत्त्वा आत्मनि आत्मानम् चिन्तय ।

निद्रायाः – of sleep; लोकवार्तायाः – of concern in secular matters; शब्दादेः – of the sense-objects; विस्मृतेः – the oblivion on account of; क्वचित् – अवसरं-अपि – the slightest chance to; न-दत्त्वा – without giving; आत्मनि – in your mind; आत्मानम् – on the Self; चिन्तय – reflect.

Without giving the slightest chance to the oblivion on account of: sleep, concern in secular matters, or the sense-objects reflect on the Self in your mind.

मातापित्रोर्मलोद्भूतं मलमांसमयं वपुः ।

त्यक्त्वा चाण्डालवद्दूरं ब्रह्मीभूय कृती भव ॥ २८७ ॥

माता-पित्रोः मल-उद्भूतं मलमांसमयं वपुः चाण्डालवत् दूरं-त्यक्त्वा ब्रह्मीभूय कृती-भव ।

माता-पित्रोः – of the parents; मल-उद्भूतं – which has come from impurities; मलमांसमयं – itself consists of flesh & impurities; वपुः – the body; चाण्डालवत् – as one does an outcast; दूरं-त्यक्त्वा – shunning from a safe distance; ब्रह्मीभूय – becoming yourself Brahman; कृती-भव – realize the consummation of your life.

Shunning from a safe distance the body which has come from impurities of the parents and itself consists of flesh & impurities – as one does an outcast – and becoming yourself Brahman realize the consummation of your life.

घटाकाशं महाकाश इवात्मानं परात्मनि ।

विलाप्याखण्डभावेन तूष्णी भव सदा मुने ॥ २८८ ॥

आत्मानं परात्मनि घटाकाशं महाकाशे इव अखण्डभावेन विलाप्य (हे) मुने सदा तूष्णी-भव ।

आत्मानं – the finite soul; परात्मनि – in the Supreme Self; घटाकाशं – the space enclosed by a jar; महाकाशे – in the infinite space; इव – like; अखण्डभावेन – by means of meditation on their identity; विलाप्य – merging; (हे) मुने – O sage; सदा – always; तूष्णी-भव – keep quiet.

Merging the finite soul in the Supreme Self, like the space enclosed by a jar in the infinite space, by means of meditation on their identity, & always keep quiet O! sage.

स्वप्रकाशमधिष्ठानं स्वयंभूय सदात्मना ।

ब्रह्माण्डमपि पिण्डाण्डं त्यज्यतां मलभाण्डवत् ॥ २८९ ॥

सदात्मना अधिष्ठानं स्वप्रकाशम् स्वयंभूय पिण्डाण्डं ब्रह्माण्डम् अपि मलभाण्डवत् त्यज्यतां ।

सदात्मना-अधिष्ठानं – the substratum of all phenomena; स्वप्रकाशम् – the self-effulgent Brahman; स्वयंभूय – becoming yourself .. as that reality; पिण्डाण्डं – microcosm; ब्रह्माण्डम् – macrocosm; अपि – and; मलभाण्डवत् – like two filthy receptcles; त्यज्यतां – give up both.

Becoming yourself the self-effulgent Brahman, the substratum of all phenomena - as that reality give up both microcosm and macrocosm, like two filthy receptacles.

चिदात्मनि सदानन्दे देहारूढामहंधियम् ।

निवेश्य लिङ्गमुत्सृज्य केवलो भव सर्वदा ॥ २९० ॥

देह-आरूढाम् अहं-धियम् सदानन्दे चिदात्मनि निवेश्य लिङ्गम् उत्सृज्य सर्वदा केवलः भव ।

देह-आरूढाम् – now rooted in the body; अहं-धियम् – the identification; सदानन्दे-चिदात्मनि – to the Atman, the Existence-Knowledge-Bliss-Absolute; निवेश्य – transferring; लिङ्गम्-उत्सृज्य – discarding it from the subtle-body too; सर्वदा – ever; केवलः – independent and one without second; भव – be.

Transferring the identification now rooted in the body to the Atman, the Existence-Knowledge-Bliss-Absolute, and discarding it from the subtle-body too, be ever independent and one without second.

यत्रैष जगदाभासो दर्पणान्तः पुरं यथा ।

तद्ब्रह्माहमिति ज्ञात्वा कृतकृत्यो भविष्यसि ॥ २९१ ॥

यथा दर्पणान्तः पुरं यत्र एषः जगदाभासः 'तद् ब्रह्म अहम्' इति ज्ञात्वा कृतकृत्यः भविष्यसि ।

यथा – as of; दर्पणान्तः – in a mirror; पुरं – a city; यत्र – in which there is; एषः – this; जगदाभासः – reflection of the universe; तद् – that; ब्रह्म – Brahman; अहम् – I am; इति – the fact; ज्ञात्वा – knowing; कृतकृत्यः – the consummation of your life; भविष्यसि – you will attain.

Knowing the fact 'I am that Brahman', in which there is this reflection of the universe as of a city in a mirror - you will attain the consummation of your life.

यत्सत्यभूतं निजरूपमाद्यं

चिदद्वयानन्दमरूपमक्रियम् ।

तदेत्य मिथ्यावपुरुत्सृजेत

शैलूषवद्वेषमुपात्तमात्मनः ॥ २९२ ॥

यत् सत्यभूतं आद्यं चिद् अद्वयानन्दम् अरूपम् अक्रियम् तद् निजरूपम् एत्य आत्मनः उपात्त शैलूषवत् वेषम्

मिथ्यावपुः उत्सृजेत ।

यत् – that which is; सत्यभूतं – real; आद्यं – primeval; चिद् – the knowledge; अद्वय – the one without a second; आनन्दम् – Bliss Absolute; अरूपम्-अक्रियम् – which is without form & activity; तद् – That; एत्य – attaining; आत्मनः-निजरूपम् – one's own Essence; उपात्त-वेषम् – his assumed mask; शैलूषवत् – like an actor; मिथ्यावपुः-उत्सृजेत – one should cease to identify oneself with one's false bodies.

That which is real and one's own Essence, the knowledge & Bliss Absolute, the one without a second, which is without form & activity - attaining That, one should cease to identify oneself with one's false bodies, like an actor giving up his assumed mask.

सर्वात्मना दृश्यमिदं मृषैव

नैवाहमर्थः क्षणिकत्वदर्शनात् ।

जानाम्यहं सर्वमिति प्रतीतिः

कुतोऽहमादेः क्षणिकस्य सिध्येत् ॥ २९३ ॥

इदं-दृश्यम् सर्वात्मना मृषा-एव, क्षणिकत्वदर्शनात् अहम् न एव अर्थः, क्षणिकस्य अहमादेः 'अहं सर्वम् जानामि'

इति प्रतीतिः, कुतः सिध्येत्?

इदं-दृश्यम् – this objective universe; सर्वात्मना – by all the means; मृषा-एव – is absolutely unreal; क्षणिकत्वदर्शनात् – for it is observed to be momentary; अहम् न एव अर्थः – neither is egoism a reality; क्षणिकस्य – which are momentary; अहमादेः – of egoism etc.; 'अहं सर्वम् जानामि' – "I know all"; इति प्रतीतिः – the perception; कुतः – how can; सिध्येत् – be true.

By all the means, this objective universe is absolutely unreal; neither is egoism a reality, for it is observed to be momentary. how can the perception "I know all" be true of egoism etc., which are momentary?

अहंपदार्थस्त्वहमादिसाक्षी

नित्यं सुषुप्तावपि भावदर्शनात् ।

ब्रूते ह्यजो नित्य इति श्रुतिः स्वयं

तत्प्रत्यगात्मा सदसद्विलक्षणः ॥ २९४ ॥

नित्यं तु अहं पदार्थः अहम्-आदि-साक्षी सुषुप्तौ-अपि भावदर्शनात् हि, 'अजः नित्यः' इति श्रुतिः स्वयं ब्रूते ।

तत्-प्रत्यग्-आत्मा सद्-असद्-विलक्षणः ।

नित्यं – the real; तु – but; अहं-पदार्थः – "I" is; अहम्-आदि-साक्षी – that which witnesses the ego and the rest; सुषुप्तौ-अपि – even in the state of profound sleep; भावदर्शनात्-हि – it exists always; 'अजः-नित्यः' –"It is birthless & eternal" इति – etc.; श्रुतिः – the Vedas; स्वयं – itself; ब्रूते – says; तत्-प्रत्यग्-आत्मा – therefore the Supreme-Self; सद्-असद्-विलक्षणः – is different from gross & subtle bodies.

But the real "I" is that which witnesses the ego and the rest. It exists always, even in the state of profound sleep. Therefore the Supreme-Self is different from gross & subtle bodies.

विकारिणां सर्वविकारवेत्ता

नित्याविकारो भवितुं समर्हति ।

मनोरथस्वप्नसुषुप्तिषु स्फुटं

पुनः पुनर्दृष्टमसत्त्वमेतयोः ॥ २९५ ॥

विकारिणां सर्वविकारवेत्ता नित्य-अविकारः भवितुं-सम्-अर्हति ।मनोरथ-स्वप्न-सुषुप्तिषु एतयोः असत्त्वम्

पुनः-पुनः स्फुटं दृष्टम् ।

विकारिणां – in things subject to change; सर्वविकारवेत्ता – the knower of all changes; नित्य-अविकारः – eternal & changeless; भवितुं-सम्-अर्हति – as it should necessarily be; मनोरथ-स्वप्न-सुषुप्तिषु – in imaginanation,dream, & profound sleep; एतयोः – of the gross & subtle bodies; असत्त्वम् – the unreality; पुनः-पुनः – is again & again; स्फुटं – clearly; दृष्टम् – observed.

The knower of all changes as it should necessarily be eternal & changeless in things subject to change, the unreality of which gross & subtle bodies is again & again clearly observed in imagination, dream, & profound sleep.

अतोऽभिमानं त्यज मांसपिण्डे

पिण्डाभिमानिन्यपि बुद्धिकल्पिते ।

कालत्रयाबाध्यमखण्डबोधं

ज्ञात्वा स्वमात्मानमुपैहि शान्तिम् ॥ २९६ ॥

अतः बुद्धिकल्पिते मांसपिण्डे पिण्ड-अभिमानिनि अपि अभिमानं त्यज ।

अखण्डबोधं कालत्रय-अबाध्यम् स्वम् आत्मानम् ज्ञात्वा शान्तिम् उपैहि ।

अतः – therefore; बुद्धिकल्पिते – which are both imagined by the intellect; मांसपिण्डे – this lump of flesh i.e. the gross body; पिण्ड-अभिमानिनि – with the ego i.e. the sense of identification with the subtle body etc.; अपि – as well as; अभिमानं – the identification with; त्यज – give up; अखण्डबोधं –which is Knowledge Absolute; कालत्रय-अबाध्यम् – can not be denied in the past, present or future; स्वम् – your own; आत्मानम् – Self; ज्ञात्वा – realizing; शान्तिम् – the Peace; उपैहि – attain to.

Therefore give up the identification with this lump of flesh i.e. the gross body, as well as with the ego i.e. the since of identification with the subtle body etc., which are both imagined by the intellect. Realizing your own Self, which is Knowledge Absolute and can not be denied in the past, present or future, attain to the Peace.

त्यजाभिमानं कुलगोत्रनाम-

रूपाश्रमेष्वार्द्रशवाश्रितेषु ।

लिङ्गस्य धर्मानपि कर्तृतादीं-

स्त्यक्त्वा भवाखण्डसुखस्वरूपः ॥ २९७ ॥

आद्र-शवाश्रितेषु कुल-गोत्र-नाम-रूप-आश्रमेषु अभिमानं त्यज कर्तृतादीन् अपि लिङ्गस्य-धर्मान् त्यक्त्वा अखण्ड-सुख-स्वरूपः भव ।

आद्र-शवाश्रितेषु – which pertain to the body that is like a rotten corpse (to a man of realization); कुल-गोत्र-नाम-रूप-आश्रमेषु – with family, lineage, name, form, & order of life; अभिमानं – identify yourself; त्यज – cease to; लिङ्गस्य-धर्मान् – which are attributes of the subtle body; कर्तृतादीन् – ideas of agency & so forth; अपि – similarly; त्यक्त्वा – giving up; अखण्ड-सुख-स्वरूपः – the Essence of Bliss Absolute; भव – be.

Cease to identify yourself with family, lineage, name, form, & order of life, which pertain to the body that is like a rotten corpse (to a man of realization). Similarly, giving up ideas of agency & so forth, which are attributes of the subtle body, be the Essence of Bliss Absolute.

सन्त्यन्ये प्रतिबन्धाः पुंसः संसारहेतवो दृष्टाः ।

तेषामेवं मूलं प्रथमविकारो भवत्यहंकारः ॥ २९८ ॥

पुंसः संसारहेतवो अन्ये प्रतिबन्धाः दृष्टाः सन्ति । तेषाम् एवं मूलं प्रथमविकारः अहंकारः भवति ।

पुंसः – for men; संसारहेतवो – which leads to transmigration; अन्ये – other; प्रतिबन्धाः – obstacles; दृष्टाः – observed; सन्ति – are; एवं – also; तेषाम् – of them; मूलं – the root; प्रथमविकारः – the first modification of nescience; अहंकारः – called egoism; भवति – is.

Other obstacles are also observed for men which leads to transmigration. The root of them (for above reason), is the first modification of nescience called egoism.

यावत्स्यात्स्वस्य सम्बन्धोऽहंकारेण दुरात्मना ।

तावन्न लेशमात्रापि मुक्तिवार्ता विलक्षणा ॥ २९९ ॥

यावत् स्वस्य दुरात्मना-अहंकारेण सम्बन्धः स्यात तावत् विलक्षणा मुक्तिवार्ता लेशमात्रा-अपि न ।

यावत्-तावत् – so long as; स्वस्य-स्यात – one has; दुरात्मना-अहंकारेण – through wicked ego; सम्बन्धः – any relation; विलक्षणा – which is unique; मुक्तिवार्ता – talk about liberation; लेशमात्रा-अपि – the least; न – there can not be.

So long as one has any relation through wicked ego, there can not be the least talk about liberation which is unique.

अहंकारग्रहान्मुक्तः स्वरूपमुपपद्यते ।

चन्द्रवद्विमलः पूर्णः सदानन्दः स्वयंप्रभः ॥ ३०० ॥

चन्द्रवत् अहंकारग्रहात् मुक्तः विमलः पूर्णः सदानन्दः स्वयंप्रभः स्वरूपम् उपपद्यते ।

चन्द्रवत् – as the moon from those of Rahu; अहंकारग्रहात् – the clutches of egoism; मुक्तः – freed from; विमलः-पूर्णः-सदानन्दः-स्वयंप्रभः – becomes pure, infinite, ever blissful, and self-luminous; स्वरूपम् – his real nature; उपपद्यते – man attains to;

Freed from the clutches of egoism as the moon from those of Rahu, man attains to his real nature, and becomes pure, infinite, ever blissful, and self-luminous.

यो वा पुरे सोऽहमिति प्रतीतो

बुद्ध्या प्रक्लृप्तस्तमसाऽतिमूढया ।

तस्यैव निःशेषतया विनाशे

ब्रह्मात्मभावः प्रतिबन्धशून्यः ॥ ३०१ ॥

यः-वा तमसा-अतिमूढया-बुद्ध्या प्रक्लृप्तः सः पुरे अहम-इति-प्रतीतः, तस्य-एव निःशेषतया-विनाशे प्रतिबन्धशून्यः-ब्रह्मात्मभावः ।

यः-वा – that which; तमसा-अतिमूढया-बुद्ध्या – by the intellect extremely deluded by nescience; प्रक्लृप्तः – has been created; सः – which is; पुरे-अहम-इति-प्रतीतः – perceived in the body as "I am such & such"; तस्य-एव – that egoism; निःशेषतया-विनाशे – when totally destroyed; प्रतिबन्धशून्यः-ब्रह्मात्मभावः – one attains an unobstructed identity with Brahman.

That which has been created by the intellect extremely deluded by nescience, and which is perceived in the body as "I am such & such" when that egoism is totally destroyed, one attains an unobstructed identity with Brahman.

ब्रह्मानन्दनिधिर्महाबलवताऽहंकारघोराहिना

संवेष्ट्यात्मनि रक्ष्यते गुणमयैश्चण्डेस्त्रिभिर्मस्तकैः

विज्ञानाख्यमहासिना श्रुतिमता विच्छिद्य शीर्षत्रयं

निर्मूल्याहिमिमं निधिं सुखकरं धीरोऽनुभोक्तुंक्षमः ॥ ३०२ ॥

ब्रह्मानन्दनिधिः महाबलवता अहंकारघोर-अहिना गुणमयैः त्रिभिः श्चण्डेः मस्तकैः संवेष्ट्य आत्मनि रक्ष्यते । धीरः श्रुतिमता विज्ञानाख्य-महा-असिना शीर्षत्रयं-विच्छिद्य इमं अहिम् निर्मूल्य सुखकर निधिं अनुभोक्तुंक्षमः ।

ब्रह्मानन्दनिधिः –the treasure of the bliss of Brahman; महाबलवता-अहंकारघोर-अहिना – by mighty dreadful serpent of egoism; गुणमयैः – consisting of the three gunas; त्रिभिः-श्चण्डेः-मस्तकैः –by means of three fierce hoods; संवेष्ट्य – is coiled round; आत्मनि – for its own use; रक्ष्यते – guarded; धीरः – only the wise man; श्रुतिमता – in accoardance with the teachings of the Vedas; विज्ञानाख्य-महा-असिना – with the great sword of realization; शीर्षत्रयं – its three hoods; विच्छिद्य – by severing; इमं-अहिम्-निर्मूल्य – destroying this serpent; सुखकर-निधिं – the treasure which confers bliss; अनुभोक्तुंक्षमः – can enjoy.

The treasure of the bliss of Brahman is coiled round by mighty dreadful serpent of egoism, and guarded for its own use by means of three fierce hoods consisting of the three gunas. Destroying this serpent by severing its three hoods with the great sword of realization in accordance with the teachings of the Vedas, only the wise man can enjoy the treasure which confers bliss.

यावद्वा यत्किञ्चिद्विषदोषस्फूर्तिरस्ति चेद्देहे ।

कथमारोग्याय भवेत्तद्वदहन्तापि योगिनो मुक्त्यै ॥ ३०३ ॥

यावत्-वा देहे यत्-किञ्चित्-विषदोषस्फूर्तिः अस्ति चेत्, कथम् आरोग्याय भवेत? तद्वत् अहन्ता अपि, योगिनः-मुक्त्यै ।

यावत्-वा – as long as; देहे – left in the body; यत्-किञ्चित्-विषदोषस्फूर्तिः – a trace of poisoning;

अस्ति – there is; कथम्-चेत्-आरोग्याय – how can one hope for recovery;

भवेत – it can be; तद्वत्-अहन्ता-अपि – similar is the effect of egoism;

योगिनः-मुक्त्यै – on the the yogin/Self-controlled one's liberation.

As long as there is a trace of poisoning left in the body, how can one hope for recovery? Similar is the effect of egoism on the the yogin/Self-controlled one's liberation.

अहमोऽत्यन्तनिवृत्त्या तत्कृतनानाविकल्पसंहृत्या ।

प्रत्यक्तत्त्वविवेकादिदमहमस्मीति विन्दते तत्त्वम् ॥ ३०४ ॥

प्रत्यक्-तत्त्व-विवेकात् अहमः अत्यन्तनिवृत्त्या तत्-कृत-नानाविकल्प-संहृत्या अहम् इदम् अस्मि इति तत्त्वम् विन्दते ।

प्रत्यक्-तत्त्व-विवेकात् – through the discrimination of inner Reality; अहमः-अत्यन्तनिवृत्त्या – through the complete cession of egoism; तत्-कृत-नानाविकल्प-संहृत्या – through the stoppage of the diverse mental waves due to it; अहम्-इदम्-अस्मि– as "I am This"; इति-तत्त्वम् – that Reality; विन्दते – one realizes.

Through the complete cession of egoism, through the stoppage of the diverse mental waves due to it, and through the discrimination of inner Reality, one realizes that Reality as "I am This".

अहंकारे कर्तर्यहमिति मतिं मुञ्च सहसा

विकारात्मन्यात्मप्रतिफलजुषि स्वस्थितिमुषि ।

यदध्यासात्प्राप्ता जनिमृतिजरादुःखबहुला

प्रतीचश्चिन्मूर्तेस्तव सुखतनोः संसृतिरियम् ॥ ३०५ ॥

विकारात्मनि स्वस्थिति-मुषि आत्म-प्रतिफल-जुषि कर्तरि-अहंकारे अहम्-इति-मतिं सहसा-मुञ्च ।

यत्-अध्यासात् चिन्मूर्तेः सुखतनोः प्रतीचः तव जनि-मृति-जरा-दुःखबहुला इयम्-संसृतिः प्राप्ता ।

विकारात्मनि – which is by its nature is modification; स्वस्थिति-मुषि – diverts one from being established in the Self; आत्म-प्रतिफल-जुषि – is endued with a reflection of the self; कर्तरि-अहंकारे – the agent; अहम्-इति-मतिं – your identification with egoism; सहसा-मुञ्च – giving up immediately; यत्-अध्यासात् – identifying thyself with which; चिन्मूर्तेः-सुखतनोः – the Essence of Knowledge & Bliss Absolute; प्रतीचः – the Witness; तव – you are; जनि-मृति-जरा-दुःखबहुला – full of the miseries of birth, decay & death; इयम्-संसृतिः – to this relative existence; प्राप्ता – you have come.

Giving up immediately your identification with egoism, the agent, which is by its nature is modification, is endued with a reflection of the self, diverts one from being established in the Self - identifying thyself with which you have come to this relative existence, full of the miseries of birth, decay & death, even though you are the Witness, the Essence of Knowledge & Bliss Absolute.

सदैकरूपस्य चिदात्मनो विभो-

रानन्दमूर्तेरनवद्यकीर्तेः ।

नैवान्यथा क्वाप्यविकारिणस्ते

विनाहमध्यासममुष्य संसृतिः ॥ ३०६ ॥

सदा एकरूपस्य-चिदात्मनः-विभोः-आनन्दमूर्तेः-अनवद्यकीर्तेः-अविकारिणः-ते अमुष्य अहम्-अध्यासम्-विना अन्यथा-क्व-अपि संसृतिः न-एव ।

सदा-एकरूपस्य-चिदात्मनः-विभोः-आनन्दमूर्तेः-अनवद्यकीर्तेः-अविकारिणः-ते – for you who are eternally the Absolute un-differentiated Knowledge & Bliss, omnipresent, immutable, and of untarnished glory; अमुष्य अहम्-अध्यासम्-विना – but for your identification with that egoism; अन्यथा-क्व-अपि-संसृतिः any transmigration; न-एव – there can never be.

But for your identification with that egoism there can never be any transmigration for you who are eternally the Absolute un-differentiated Knowledge & Bliss, omnipresent, immutable, and of untarnished glory.

तस्मादहंकारमिमं स्वशत्रुं

भोक्तुर्गले कण्टकवत्प्रतीतम् ।

विच्छिद्य विज्ञानमहासिना स्फुटं

भुङ्क्ष्वात्मसाम्राज्यसुखं यथेष्टम् ॥ ३०७ ॥

तस्मात् भोक्तुः-गले-कण्टकवत्-प्रतीतम् स्वशत्रुं इमं-अहंकारम् विज्ञान-महा-असिना विच्छिद्य आत्म-साम्राज्यसुखं स्फुटं यथेष्टम् भुङ्क्ष्व ।

तस्मात् – therefore; भोक्तुः-गले-कण्टकवत्-प्रतीतम् – which appears like a thorn sticking in the throat of a man taking his meal; स्वशत्रुं – your enemy; इमं-अहंकारम् – this egoism, विज्ञान-महा-असिना – with the great sword of realization; विच्छिद्य – destroying; आत्म-साम्राज्यसुखं – the bliss of your own empire – the majesty of the Atman; स्फुटं – directly; यथेष्टम् – freely; भुङ्क्ष्व – enjoy.

Therefore destroying with the great sword of realiation, your enemy, this egoism - which appears like a thorn sticking in the throat of a man taking his meal, and enjoy freely & directly the bliss of your own empire – the majesty of the Atman.

ततोऽहमादेर्विनिवर्त्य वृत्तिं

संत्यक्तरागः परमार्थलाभात्।

तूष्णीं समास्स्वात्मसुखानुभूत्या

पूर्णात्मना ब्रह्मणि निर्विकल्पः ॥ ३०८ ॥

अहमादेः वृत्तिं विनिवर्त्य परमार्थलाभात् संत्यक्तरागः आत्मसुखानुभूत्या ततः निर्विकल्पः-पूर्णात्मना ब्रह्मणि तूष्णीं-समास्स्व ।

ततः – thereafter; अहमादेः – of egoism etc.; वृत्तिं – the activities; विनिवर्त्य – checking; परमार्थलाभात् – through the realization of the Supreme Reality; संत्यक्तरागः – giving up all attachment; आत्मसुखानुभूत्या – through the enjoyment of the Bliss of Self; निर्विकल्पः-पूर्णात्मना – being established in your infinite nature & free from delusion; ब्रह्मणि – in Brahman; तूष्णीं-समास्स्व – remain quiet.

Thereafter checking the activities of egoism etc., and giving up all attachment through the realization of the Supreme Reality, as well being established in your infinite nature & free from delusion; remain quiet in Brahman.

समूलकृत्तोऽपि महानहं पुनः

व्युल्लेखितः स्याद्यदि चेतसा क्षणम्।

संजीव्य विक्षेपशतं करोति

नभस्वता प्रावृषि वारिदो यथा ॥ ३०९ ॥

यथा नभस्वता प्रावृषि वारिदः महान्-अहं समूलकृत्तः-अपि चेतसा क्षणम्-यदि पुनः व्युल्लेखितः-स्यात् संजीव्य विक्षेपशतं-करोति ।

यथा – like; नभस्वता – ushered into sky by the wind; प्रावृषि – during the rainy season; वारिदः – a cloud; महान्-अहं – this terrible egoism; समूलकृत्तः-अपि – even though completely rooted out; चेतसा – in the mind; क्षणम्-यदि – even for a moment; पुनः-व्युल्लेखितः-स्यात् – if revolved; संजीव्य – returning to life; विक्षेपशतं-करोति – creates hundreds of troubles.

Even though completely rooted out, this terrible egoism, if revolved in the mind even for a moment, returning to life creates hundreds of troubles, like a cloud ushered into sky by the wind during the rainy season.

निगृह्य शत्रोरहमोऽवकाशः

क्वचिन्न देयो विषयानुचिन्तया ।

स एव संजीवनहेतुरस्य

प्रक्षीणजम्बीरतरोरिवाम्बु ॥ ३१० ॥

अहमः-शत्रोः निगृह्य, विषय-अनुचिन्तया क्वचित्-अवकाशः न-देयः, प्रक्षीण-जम्बीर-तरोः अम्बु-इव,

सः-एव अस्य संजीवनहेतु ।

अहमः – egoism; शत्रोः – this enemy; निगृह्य – overpowering; विषय-अनुचिन्तया – by thinking on the sense-objects; न-क्वचित्-अवकाशः – not a moment's respite; देयः – should be given to it; प्रक्षीण-जम्बीर-तरोः – to acitron tree that has almost dead; अम्बु-इव – like water; सः-एव – that is verily; अस्य संजीवनहेतु – the cause of its coming back to life.

Overpowering this enemy, egoism, not a moment's respite should be given to it by thinking on the sense-objects. That is verily the cause of its coming back to life, like water to a citron tree that has almost dead.

देहात्मना संस्थित एव कामी

विलक्षणः कामयिता कथं स्यात् ।

अतोऽर्थसन्धानपरत्वमेव

भेदप्रसक्त्या भवबन्धहेतुः ॥ ३११ ॥

देहात्मना-संस्थित एव-कामी, विलक्षणः कामयिता कथं स्यात्? अतः अर्थसन्धान-परत्वम् एव भेद-प्रसक्त्या भवबन्धहेतुः ।

देहात्मना-संस्थित – who has identified himself with the body; एव-कामी – he alone is greedy after sense-pleasure; विलक्षणः – devoid of the body idea; कामयिता – be greedy; कथं-स्यात् – how can one; अतः – hence; अर्थसन्धान-परत्वम् – the tendency to think of the sense-objects; एव – is verily; भेद-प्रसक्त्या – giving rise to an idea of distinction of duality; भवबन्धहेतुः – the cause of transmigration.

He alone who has identified himself with the body is greedy after sense-pleasure. How cans one, devoid of the body idea, – be greedy (like him)? Hence the tendency to think of the sense-objects is verily the cause of transmigration giving rise to an idea of distinction of duality.

कार्यप्रवर्धनाद्बीजप्रवृद्धिः परिदृश्यते ।

कार्यनाशाद्बीजनाशस्तस्मात्कार्यं निरोधयेत् ॥ ३१२ ॥

कार्यप्रवर्धनात् बीजप्रवृद्धिः परिदृश्यते, कार्यनाशात् बीजनाशः, तस्मात् कार्यं निरोधयेत् ।

कार्यप्रवर्धनात् – from the development of the effects; बीजप्रवृद्धिः – the development of the seed; परिदृश्यते – is clearly observed; कार्यनाशात् – from the destruction of the effects; बीजनाशः – the seed also is seen to be destroyed; तस्मात् – therefore; कार्यं – the effects; निरोधयेत् – one must subdue.

From the development of the effects is clearly observed the development of the seed, so also from the destruction of the effects the seed also is seen to be destroyed; therefore one must subdue the effects.

वासनावृद्धितः कार्यं कार्यवृद्ध्या च वासना ।

वर्धते सर्वथा पुंसः संसारो न निवर्तते ॥ ३१३ ॥

वासनावृद्धितः कार्यं कार्यवृद्ध्या च वासना वर्धते । पुंसः संसारः सर्वथा न निवर्तते ।

वासनावृद्धितः – through the increase of desires; कार्यं – selfish work increases; कार्यवृद्ध्या – when there is increase of selfish work; च – also; वासना – of desire; वर्धते – there is an increase; पुंसः – man's; संसारः – transmigration; सर्वथा-न-निवर्तते – is never at an end.

Through the increase of desires selfish work increases, similarly when there is increase of selfish work there is an increase of desire also; like this man's transmigration is never at an end.

संसारबन्धविच्छित्त्यै तद् द्वयं प्रदहेद्यतिः ।

वासनावृद्धिरेताभ्यां चिन्तया क्रियया बहिः ॥ ३१४ ॥

यतिः संसार-बन्ध-विच्छित्त्यै तद्-द्वयं प्रदहेत्। एताभ्यां चिन्तया बहिः-क्रियया वासनावृद्धिः ।

यतिः – the Monk; संसार-बन्ध-विच्छित्त्यै – for the sake of breaking the chain of transmigration; तद्-द्वयं – those two; प्रदहेत् – must burn to ashes; एताभ्यां – these sense-objects; चिन्तया – thinking of; बहिः-क्रियया – doing selfish work; वासनावृद्धिः – leads to an increase of desires.

Just because thinking of these sense-objects & doing selfish work leads to an increase of desires; the Monk must burn to ashes those two for the sake of breaking the chain of transmigration.

ताभ्यां प्रवर्धमाना सा सूते संसृतिमात्मनः ।

त्रयाणां च क्षयोपायः सर्वावस्थासु सर्वदा ॥ ३१५ ॥

सर्वत्र सर्वतः सर्वब्रह्ममात्रावलोकनैः ।

सद्भाववासनादार्ढ्यात्तत्त्रयं लयमश्नुते ॥ ३१६ ॥

ताभ्यां-प्रवर्धमाना सा आत्मनः संसृति सूते च । त्रयाणां क्षय-उपायः सर्व-अवस्थासु सर्वदा सर्वत्र सर्वतः सर्व-ब्रह्ममात्र-अवलोकनैः सद्-भाव-वासना-दार्ढ्यात् तत् त्रयं लयम्-अश्नुते ।

ताभ्यां-प्रवर्धमाना– augmented by these two; सा– those desires; आत्मनः– one's; संसृति– transmigration; सूते– produce; त्रयाणां– these three; क्षय-उपायः– the way to destroy; सर्व-अवस्थासु– under all circumstances; सर्वदा– always; सर्वत्र– everywhere; सर्वतः-च – and in all respects; सर्व-ब्रह्ममात्र-अवलोकनैः– lies in looking upon everything as Brahman & Brahman alone; सद्-भाव-वासना-दार्ढ्यात्– through the strengthening of looking to be one with Brahman; तत्– those; त्रयं– three; लयम्-अश्नुते– are annihilated.

Augmented by these two, those desires produce one's transmigration. The way to destroy these three however lies in looking upon everything, under all circumstances, always, everywhere, and in all respects, as Brahman & Brahman alone. Through the strengthening of looking to be one with Brahman those three are annihilated.

क्रियानाशे भवेच्चिन्तानाशोऽस्माद्वासनाक्षयः ।

वासनाप्रक्षयो मोक्षः सा जीवन्मुक्तिरिष्यते ॥ ३१७ ॥

क्रियानाशे चिन्तानाशः, अस्मात् वासनाक्षयः भवेत्, वासनाप्रक्षयः मोक्षः, सा जीवन्मुक्तिः इष्यते ।

क्रियानाशे – with the cessation of selfish action; चिन्तानाशः – the brooding on the sense-objects is stopped; अस्मात्-भवेत् – which is followed by; वासनाक्षयः – the destruction of desires; वासनाप्रक्षयः

– the destruction of desires; मोक्षः – is liberation; सा-इष्यते – and this is consideded to be;

जीवन्मुक्तिः– Liberation-in-life.

With the cessation of selfish action the brooding on the sense-objects is stopped, which is followed by the destruction of desires. The destruction of desires is liberation, and this is considered to be Liberation-in-life.

सद्वासनास्फूर्तिविजृम्भणे सति

ह्यसौ विलीनाप्यहमादिवासना ।

अतिप्रकृष्टाप्यरुणप्रभायां

विलीयते साधु यथा तमिस्रा ॥ ३१८ ॥

सद्-वासना-स्फूर्ति-विजृम्भणे-सति-हि असौ-अहम्-आदि-वासना-अपि विलीना यथा तमिस्रा अतिप्रकृष्टा अपि अरुणप्रभायां साधु विलीयते ।

सद्-वासना-स्फूर्ति-विजृम्भणे-सति-हि – only when the desire for realizing Brahman marks its distinct manifestation; असौ-अहम्-आदि-वासना-अपि – these entire egoistic desires; विलीना – readily vanishes; यथा – just as; तमिस्रा – darkness; अतिप्रकृष्टा-अपि – the most intense; अरुणप्रभायां – before the glow of the rising sun; साधु-विलीयते – completely vanishes.

Only when the desire for realizing Brahman marks its distinct manifestation, these entire egoistic desires readily vanishes; just as the most intense darkness completely vanishes before the glow of the rising sun.

तमस्तमःकार्यमनर्थजालं

न दृश्यते सत्युदिते दिनेशे ।

तथाऽद्वयानन्दरसानुभूतौ

न वास्ति बन्धो न च दुःखगन्धः ॥ ३१९ ॥

तमः, तमः-कार्यम्-अनर्थजालं दिनेशे-उदिते-सति न-दृश्यते, तथा अद्वय-आनन्द-रसानुभूतौ न-अस्ति बन्धः, न-वा-च दुःखगन्धः ।

तमः – darkness; च – and; तमः-कार्यम्-अनर्थजालं – the numerous evils that attend on darkness; दिनेशे-उदिते-सति – when the sun rises; न-दृश्यते – are not noticed; तथा – similarly; अद्वय-आनन्द-रसानुभूतौ – on the realization of the Bliss Absolute; न-अस्ति – there is neither; बन्धः – bondage; न-वा – nor; दुःखगन्धः – the least trace of misery.

Darkness and– the numerous evils that attend on it are not noticed when the sun rises. Similarly on the realization of the Bliss Absolute there is neither bondage nor the least trace of misery.

दृश्यं प्रतीतं प्रविलापयन्सन्

सन्मात्रमानन्दघनं विभावयन् ।

समाहितः सन्बहिरन्तरं वा

कालं नयेथाः सति कर्मबन्धे ॥ ३२० ॥*

बहिः-अन्तरं-वा प्रतीतं दृश्यं प्रविलापयन्-सन् आनन्दघनं-सन्मात्रम्-विभावयन् समाहितः-सन् कर्मबन्धे-सति कालं-नयेथाः ।

बहिः-अन्तरं-वा – the external & internal; प्रतीतं-दृश्यं – the universes which are now perceived; प्रविलापयन्-सन् – countering; आनन्दघनं-सन्मात्रम्-विभावयन् – through meditation on the Reality, the Bliss embodided; समाहितः-सन् – watchfully; कर्मबन्धे-सति – if there be any residue of *Prarabdha* work left; कालं-नयेथाः – one should pass one's time.

Countering the external & internal the universes which are now perceived, through meditation on the Reality - the Bliss embodied, one should pass one's time watchfully, if there be any residue of *Prarabdha* work left.

प्रमादो ब्रह्मनिष्ठायां न कर्तव्यः कदाचन ।
प्रमादो मृत्युरित्याह भगवान्ब्रह्मणः सुतः ॥ ३२१ ॥

ब्रह्मनिष्ठायां कदाचन प्रमादः न-कर्तव्यः । प्रमादः-मृत्युः इति-आह भगवान्-ब्रह्मणः-सुतः ।

ब्रह्मनिष्ठायां – one's steadfastness to Brahman; प्रमादः – be careless in; कदाचन-न-कर्तव्यः – one should never; प्रमादः-मृत्युः – inadvertence as death itself; इति-आह – has called; भ गवान्-ब्रह्मणः-सुतः – Brahma's son Bhagavan Sanatkumara.

One should never be careless in one's steadfastness to Brahman. Brahma's son Bhagavan Sanatkumara has called inadvertence as death itself.

न प्रमादादनर्थोऽन्यो ज्ञानिनः स्वस्वरूपतः ।
ततो मोहस्ततोऽहंधीस्ततो बन्धस्ततो व्यथा ॥ ३२२ ॥

ज्ञानिनः स्वस्वरूपतः प्रमादात् न-अन्यः अनर्थः, ततः मोहः ततः अहंधीः ततः बन्धः ततः व्यथा ।

ज्ञानिनः – for the realized person; स्वस्वरूपतः – about his own real nature; प्रमादात् – than carelessness; न-अन्यः-अनर्थः – there is no greater danger; ततः – from this comes; मोहः – delusion; ततः – thence; अहंधीः – egoism; ततः – this is followed by; बन्धः – bondage; ततः – then comes; व्यथा – misery.

For the realized person there is no greater danger than carelessness about his own real nature; from this comes delusion, thence egoism, this is followed by bondage, and then comes misery.

विषयाभिमुखं दृष्ट्वा विद्वांसमपि विस्मृतिः ।
विक्षेपयति धीदोषैर्योषा जारमिव प्रियम् ॥ ३२३ ॥

योषां प्रियम्-जारम् इव विद्वांसम्-अपि विषयाभिमुखं-दृष्ट्वा विस्मृतिः धीदोषैः विक्षेपयति ।

योषां – a woman does; प्रियम्-जारम् – her doting paramour; इव – just as; विद्वांसम्-अपि – even for a wise man; विषयाभिमुखं-दृष्ट्वा – hankering after the sense-objects; विस्मृतिः – oblivision; धीदोषैः – through the evil properties of the intellect; विक्षेपयति – torments him.

Just as a woman does her doting paramour; even for a wise man, hankering after the sense-objects, oblivion torments him through the evil properties of the intellect.

यथापकृष्टं शैवालं क्षणमात्रं न तिष्ठति ।

आवृणोति तथा माया प्राज्ञं वापि पराङ्मुखम्॥ ३२४ ॥

यथा अपकृष्टं शैवालं क्षणमात्रं न-तिष्ठति, तथा माया प्राज्ञं-अपि-पराङ्मुखम्-वा आवृणोति ।

यथा – as; अपकृष्टं – removed; शैवालं – sedge; क्षणमात्रं – for a moment; न-तिष्ठति – does not stay away; तथा –so; माया – nescience; प्राज्ञं-अपि – even a wise man; पराङ्मुखम्-वा – if he remains averse to meditation on the Self; आवृणोति – covers.

As sedge, even if removed, does not stay away for a moment, but covers the water again; so *Maya* or nescience also covers even a wise man if he remains averse to meditation on the Self.

लक्ष्यच्युतं चेद्यदि चित्तमीषद्

बहिर्मुखं सन्निपतेत्ततस्ततः ।

प्रमादतः प्रच्युतकेलिकन्दुकः

सोपानपङ्क्तौ पतितो यथा तथा ॥ ३२५ ॥*

यथा प्रमादतः प्रच्युत-केलि-कन्दुकः सोपानपङ्क्तौ-पतितः ततः-ततः सन्निपतेत् तथा चित्तम् इषद् लक्ष्यच्युतं चेद् यदि बहिर्मुखं ।

यथा-तथा – just as; प्रमादतः – inadvertently; प्रच्युत – then it goes down & down; केलि-कन्दुकः – a play ball; सोपानपङ्क्तौ-पतितः – dropped on the staircase; ततः-ततः – from one step to another; सन्निपतेत् – bounces down; चित्तम् – the mind; इषद्-लक्ष्यच्युतं – ever so slightly stays away from the ideal; यदि – if; चेद्-बहिर्मुखं – becomes outgoing.

If the mind ever so slightly stays away from the ideal and becomes outgoing, then it goes down & down; just as a play ball inadvertently dropped on the staircase bounces down from one step to another.

विषयेष्वाविशच्चेतः संकल्पयति तद्गुणान् ।

सम्यक्संकल्पनात्कामः कामात्पुंसः प्रवर्तनम् ॥ ३२६ ॥

विषयेषु आविशत् चेतः तद्-गुणान् संकल्पयति सम्यक्-संकल्पनात् कामः कामात् पुंसः प्रवर्तनम् ।

विषयेषु – to the sense-objects; आविशत् – that is attached; चेतः – the mind; तद्-गुणान् – on their qualities; संकल्पयति – reflects; सम्यक्-संकल्पनात् – from mature reflection; कामः – arises desire; कामात् – with desire; पुंसः-प्रवर्तनम् – a man sets about having that thing.

The mind that is attached to the sense-objects reflects on their qualities; from mature reflection arises desire, and a man with desire sets about having that thing.

अतः प्रमादान्न परोऽस्ति मृत्युः

विवेकिनो ब्रह्मविदः समाधौ ।

समाहितः सिद्धिमुपैति सम्यक्

समाहितात्मा भव सावधानः ॥ ३२७ ॥

अतः विवेकिनः ब्रह्मविदः प्रमादात् परः न अस्ति मृत्युः।समाधौ समाहितः सम्यक् सिद्धिम् उपैति ।

समाहितात्मा सावधानः भव ।

अतः – hence; विवेकिनः – to the discriminating; ब्रह्मविदः – knower of Brahman; प्रमादात्– than inadvertence with regard to concentration; परः – worse; न-अस्ति – there is no; मृत्युः – death; समाधौ – on Brahman; समाहितः – man who has concentration; सम्यक्-सिद्धिम् – complete success; उपैति – attains; समाहितात्मा – concentrate your mind on Brahman; सावधानः-भव – carefully.

To the discriminating knower of Brahman there is no worse death than inadvertence with regard to concentration; whereas man who has concentration on Brahman attains complete success; hence carefully concentrate your mind on Brahman.

ततः स्वरूपविभ्रंशो विभ्रष्टस्तु पतत्यधः ।

पतितस्य विना नाशं पुनर्नारोह ईक्ष्यते ।

संकल्पं वर्जयेत्तस्मात्सर्वानर्थस्य कारणम् ॥ ३२८ ॥

ततः स्वरूपविभ्रंशो तु विभ्रष्टः अधः पतति ।पतितस्य नाशं विना पुनः आरोहः न ईक्ष्यते ।

तस्मात् सर्वानर्थस्य कारणम् संकल्पं वर्जयेत् ।

ततः – through contemplation on the sense-objects; स्वरूपविभ्रंशो – man deviates from his real nature; विभ्रष्टः-तु – the man who has thus deviated; अधः-पतति – falls; पतितस्य – the fallen man; नाशं-विना – without coming to ruin; पुनः-आरोहः – to rise again; न-ईक्ष्यते – is scarcely seems; तस्मात् – therefore; सर्व-अनर्थस्य-कारणम् – which is the root of all mischief; संकल्पं – reflecting on the sense-objects; वर्जयेत् – one should give up.

Through contemplation on the sense-objects or inadvertence with regard to concentration on Brahman man deviates from his real nature, and the man who has thus deviated, falls; the fallen man is scarcely seems to rise again, without coming to ruin; therefore one should give up reflecting on the sense-objects which is the root of all mischief.

जीवतो यस्य कैवल्यं विदेहे स च केवलः ।

यत्किञ्चितत्पश्यतो भेदं भयं ब्रूते यजुःश्रुतिः ॥ ३२९ ॥*

यस्य जीवतः कैवल्यं सः-च-केवलः विदेहे । यत्-किञ्चित् भेदं-पश्यते भयं ब्रूते यजुः-श्रुतिः ।

यस्य – he who has; जीवतः – while living itself; कैवल्यं – perceived the absolute unity; सः-च-केवलः – retains the perception of the absolute unity; विदेहे – even after the dissolution of the body; यत्-किञ्चित्-भेदं-पश्यते – for one who sees the least bit of distinction; भयं – there is fear; ब्रूते – declares; यजुः-श्रुतिः – the *Yajur-Veda*.

He, who has perceived the absolute unity while living itself, retains the perception of the absolute unity even after the dissolution of the body. There is fear for one who sees the least bit of distinction, declares the *Yajur-Veda*.

यदा कदा वापि विपश्चिदेष

ब्रह्मण्यनन्तेऽप्यणुमात्रभेदम्।

पश्यत्यथामुष्य भयं तदैव

यद्वीक्षितं भिन्नतया प्रमादात्॥ ३३० ॥*

यदा-कदा-अपि-वा एषः-विपश्चित् अनन्ते-ब्रह्मणि अणुमात्र-भेदम्-अपि पश्यति, अथ प्रमादात् भिन्नतया यद्-अमुष्य वीक्षितं तद्-एव भयं (भवति) ।

यदा-कदा-अपि-वा – whenever; एषः-विपश्चित् – the wise man; अनन्ते-ब्रह्मणि – in the infinite Brahman; अणुमात्र-भेदम्-अपि – the least difference; पश्यति – sees; अथ – at once; प्रमादात् – through mistake; – यद्-अमुष्य-भिन्नतया-वीक्षितं – which is seen as different from the infinite Brahman; तद्-एव – that alone; भयं (भवति) – becomes a source of terror to him.

Whenever the wise man sees the least difference in the infinite Brahman, at once that alone, which is seen as different from the infinite Brahman through mistake, becomes a source of terror to him.

श्रुतिस्मृतिन्यायशतैर्निषिद्धे

दृश्येऽत्र यः स्वात्ममतिं करोति।

उपैति दुःखोपरि दुःखजातं

निषिद्धकर्ता स मलिम्लुचो यथा॥ ३३१ ॥

यः श्रुति-स्मृति-न्यायशतैः निषिद्धे अत्र-दृश्ये स्वात्ममतिं करोति, सः-निषिद्धकर्ता मलिम्लुचा-यथा दुःखोपरि-दुःखजातं उपैति ।

यः-सः– he who; श्रुति-स्मृति-न्यायशतैः – by hundreds of Srutis, Smrtis & reasonings; निषिद्धे – that has been denied; अत्र-दृश्ये – with the objective universe; स्वात्ममतिं-करोति – identifies himself; निषिद्धकर्ता – for he does something forbidden; मलिम्लुचा-यथा – like a thief; दुःखोपरि-दुःखजातं – misery after misery; उपैति – experiences.

He who identifies himself with the objective universe that has been denied by hundreds of Srutis, Smrtis & reasonings, experiences misery after misery like a thief, for he does something forbidden.

सत्याभिसंधानरतो विमुक्तो

महत्त्वमात्मीयमुपैति नित्यम्।

मिथ्याभिसन्धानरतस्तु नश्येद्

दृष्टं तदेतद्यदचौरचौरयोः॥ ३३२ ॥

सत्य-अभिसंधानरतः विमुक्तः आत्मीयम् नित्यम् महत्त्वम् उपैति। मिथ्या-अभिसन्धानरतः तु नश्येद् यद्-एतत्-तत् अचौर-चौरयोः दृष्टं।

सत्य-अभिसंधानरतः – he who has devoted himself to meditation on the Reality; विमुक्तः – is free from nescience; आत्मीयम् – of the Atman; नित्यम् – the eternal; महत्त्वम् – glory; उपैति – attains to; मिथ्या-अभिसन्धानरतः-तु – but he who dwells on the unreal (universe); नश्येद् – is destroyed; तत्-यद्-एतत् – that is just like; अचौर-चौरयोः – in the case of one who is not a thief & one who is a thief; दृष्टं – being evidenced.

He who has devoted himself to meditation on the Reality and is free from nescience, attains to the eternal glory of the Atman; but he who dwells on the unreal (universe) is destroyed; that is just like being evidenced in the case of one who is not a thief & one who is a thief.

यतिरसदनुसन्धिं बन्धहेतुं विहाय

स्वयमयमहमस्मीत्यात्मदृष्ट्यैव तिष्ठेत्

सुखयति ननु निष्ठा ब्रह्मणि स्वानुभूत्या

हरति परमविद्याकार्यदुःखं प्रतीतम्॥ ३३३ ॥

यतिः बन्धहेतुं असद्-अनुसन्धिं विहाय 'अयम् स्वयम् अहम् अस्मि' इति आत्मदृष्ट्या-एव तिष्ठेत् ।

स्वानुभूत्या ब्रह्मणि-निष्ठा ननु-सुखयति अविद्याकार्यदुःखं प्रतीतम् परम् हरति ।

यतिः – the Sannayasin/Monk; बन्धहेतुं – which causes bondage; असद्-अनुसन्धिं – dwelling on the unreal; विहाय – should give up; 'अयम्-स्वयम्-अहम्-अस्मि' – "I myself am This"; इति – as; आत्मदृष्ट्या-एव – on the Atman alone; तिष्ठेत् – should always fix his thoughts; स्वानुभूत्या – through the realization of one's identity with Brahman; ब्रह्मणि-निष्ठा – for steadfastness in Brahman; ननु-सुखयति – definitely gives rise to bliss; अविद्याकार्यदुःखं – the misery born of nescience; प्रतीतम् – which one experiences; परम्-हरति – thoroughly removes.

The Sannayasin/Monk should give up dwelling on the unreal, which causes bondage, and should always fix his thoughts on the Atman alone as "I myself am This". For steadfastness in Brahman through the realization of one's identity with It definitely gives rise to bliss and thoroughly removes the misery born of nescience, which one experiences (in the ignorant state).

बाह्यानुसन्धिः परिवर्धयेत्फलं

दुर्वासनामेव ततस्ततोऽधिकाम्।

ज्ञात्वा विवेकैः परिहृत्य बाह्यं

स्वात्मानुसन्धिं विदधीत नित्यम्॥ ३३४ ॥

बाह्यानुसन्धिः फलं-दुर्वासनाम्-एव ततः-ततः-अधिकाम् परिवर्धयेत्। विवेकैः ज्ञात्वा बाह्यं परिहृत्य नित्यम् स्वात्मानुसन्धिं विदधीत ।

बाह्यानुसन्धिः – the dwelling on external objects; फलं-दुर्वासनाम्-एव – its fruits, viz. furthering evil propensities; ततः-ततः-अधिकाम् – which grows worse & worse; परिवर्धयेत् – only intensify; विवेकैः – through discrimination; ज्ञात्वा – knowing this; बाह्यं – external objects; परिहृत्य – one should avoid external objects; नित्यम् – constantly; स्वात्मानुसन्धिं – to meditation in the Atman; विदधीत – apply oneself.

The dwelling on external objects only intensify its fruits, viz. furthering evil propensities, which grows worse & worse; knowing this through discrimination, one should avoid external objects and constantly apply oneself to meditation in the Atman.

बाह्ये निरुद्धे मनसः प्रसन्नता
मनःप्रसादे परमात्मदर्शनम् ।
तस्मिन्सुदृष्टे भवबन्धनाशो
बहिर्निरोधः पदवी विमुक्तेः ॥ ३३५ ॥

बाह्ये-निरुद्धे मनसः-प्रसन्नता, मनः-प्रसादे-परमात्मदर्शनम्, तस्मिन्-सुदृष्टे भव-बन्धनाशः बहिर्निरोधः विमुक्तेः-पदवी ।

बाह्ये-निरुद्धे – when the external world is shut out; मनसः-प्रसन्नता – the mind is cheerful; मनः-प्रसादे-परमात्मदर्शनम् – cheerfulness of the mind brings on the vision of the Paramatman; तस्मिन्-सुदृष्टे – when It is perfectly realized; भव-बन्धनाशः – the chain of birth & death is broken; बहिर्निरोधः – shunning out of external world is; विमुक्तेः-पदवी – the stepping-stone to liberation.

When the external world is shut out, the mind is cheerful, and cheerfulness of the mind brings on the vision of the Paramatman. When It is perfectly realized, he chain of birth & death is broken. Hence shunning out of external world is the stepping-stone to liberation.

कः पण्डितः सन्सदसद्विवेकी
श्रुतिप्रमाणः परमार्थदर्शी ।
जानन्हि कुर्यादसतोऽवलम्बं
स्वपातहेतोः शिशुवन्मुमुक्षुः ॥ ३३६ ॥*

कः पण्डितः सन् सद-असद्-विवेकी, श्रुतिप्रमाणः, परमार्थदर्शी, मुमुक्षुः, जानन्-हि शिशुवत् स्वपातहेतोः-असतः अवलम्बं-कुर्यात् ?

कः –who would be the man; पण्डितः-सन् – being learned; सद-असद्-विवेकी – able to discriminate the real from unreal; श्रुतिप्रमाणः – believing the Vedas as authority; परमार्थदर्शी – having his gaze fixed on the Atman the Supreme Reality; मुमुक्षुः – being a seeker after liberation; जानन्-हि – consciously; शिशुवत् – like a child; स्वपातहेतोः-असतः – the unreal (the universe which will be) the cause of his fall; अवलम्बं-कुर्यात् – will recourse to.

Who would be the man; being learned, able to discriminate the real from unreal, believing the Vedas as authority, having his gaze fixed on the Atman the Supreme Reality, and being a seeker after liberation, will like a child consciously recourse to the unreal (the universe which will be) the cause of his fall?

देहादिसंसक्तिमतो न मुक्तिः

मुक्तस्य देहाद्यभिमत्यभावः ।

सुप्तस्य नो जागरणं न जाग्रतः

स्वप्नस्तयोर्भिन्नगुणाश्रयत्वात् ॥ ३३७ ॥

देहादिसंसक्तिमतः न-मुक्तिः, मुक्तस्य देहादि-अभिमदि-अभावः । सुप्तस्य-जागरणं-नो, न-जाग्रतः-स्वप्नः, तयोः भिन्नगुणाश्रयत्वात् ।

देहादिसंसक्तिमतः – for one who has attachment to the body etc.; न-मुक्तिः – there is no liberation; मुक्तस्य – for the liberated man; देहादि-अभिमदि-अभावः – there is no identification with the body etc.; सुप्तस्य-जागरणं-नो – the sleeping man is not awake; न-जाग्रतः-स्वप्नः – nor the awaking man asleep (or dreams); तयोः – for these two states; भिन्नगुणाश्रयत्वात् – are contradictory in nature.

There is no liberation for one who has attachment to the body etc., and for the liberated man there is no identification with the body etc.. The sleeping man is not awake, nor the awaking man asleep (or dreams), for these two states are contradictory in nature.

अन्तर्बहिः स्वं स्थिरजङ्गमेषु

ज्ञात्वाऽऽत्मनाधारतया विलोक्य ।

त्यक्ताखिलोपाधिरखण्डरूपः

पूर्णात्मना यः स्थित एष मुक्तः ॥ ३३८ ॥*

यः स्थिर-जङ्गमेषु अन्तः-बहिः आत्मना विलोक्य आधारतया स्वं ज्ञात्वा त्यक्ता-अखिल-उपाधिः अखण्डरूपः पूर्णात्मना स्थितः एषः मुक्तः ।

यः – who; स्थिर-जङ्गमेषु – in moving & unmoving objects; अन्तः-बहिः – in & around everywhere; आत्मना – through his mind; विलोक्य – observing; आधारतया – It as their substratum; स्वं – the Self; ज्ञात्वा – knowing; त्यक्ता-अखिल-उपाधिः – giving up all superimpositions; अखण्डरूपः – the undivided; पूर्णात्मना – the complete Self; स्थितः – remains as; एषः – he; मुक्तः – is free.

He is free who, knowing through his mind the Self in & around everywhere in moving & unmoving objects and observing It as their substratum, giving up all superimpositions and remains as the undivided & the complete Self.

सर्वात्मता बन्धविमुक्तिहेतुः

सर्वात्मभावान्न परोऽस्ति कश्चित् ।

दृश्याग्रहे सत्युपपद्यतेऽसौ

सर्वात्मभावोऽस्य सदात्मनिष्ठया ॥ ३३९ ॥*

सर्वात्मभावात् बन्धविमुक्तिहेतुः सर्वात्मता कश्चित्-परः-न-अस्ति । अस्य सदा-आत्मनिष्ठया दृश्य-अग्रहे-सति असौ-सर्वात्मभावः उपपद्यते ।

सर्वात्मभावात्‌ – identifying the universe with the Self; बन्धविमुक्तिहेतुः – is the means of getting rid of bondage; सर्वात्मता – to realize whole universe as the Self; कश्चित्‌-परः-न-अस्ति – there is nothing higher than; अस्य – सदा-आत्मनिष्ठया – through steadfastness in the eternal Atman; दृश्य-अग्रहे-सति – by excluding the objective world; असौ-सर्वात्मभावः – this state; उपपद्यते – one realizes;

To realize whole universe as the Self is the means of getting rid of bondage. There is nothing higher than identifying the universe with the Self. One realizes this state by excluding the objective world through steadfastness in the eternal Atman.

दृश्यस्याग्रहणं कथं नु घटते देहात्मना तिष्ठतो

बाह्यार्थानुभवप्रसक्तमनसस्तत्तत्क्रियां कुर्वतः ।

संन्यस्ताखिलधर्मकर्मविषयैर्नित्यात्मनिष्ठापरैः

तत्त्वज्ञैः करणीयमात्मनि सदानन्देच्छुभिर्यत्नतः ॥ ३४० ॥

देहात्मना-तिष्ठतः बाह्य-अर्थ-अनुभव-प्रसक्त-मनसः तत्‌-तत्‌-क्रियाः-कुर्वतः दृश्यस्य-अग्रहणं कथं-नु-घटते ? संन्यस्त-अखिल-धर्म-कर्म-विषयैः नित्य-आत्म-निष्ठा-परैः तत्त्वज्ञैः आत्मनि-सदानन्द-इच्छुभिः यत्नतः-करणीयम्‌ ।

देहात्मना-तिष्ठतः – for one who lives identified with the body; बाह्य-अर्थ-अनुभव-प्रसक्त-मनसः – whose mind is attached to the perception of external objects; तत्‌-तत्‌-क्रियाः-कुर्वतः – who performs various acts for that end; दृश्यस्य-अग्रहणं – the exclusion of the objective world; कथं-नु-घटते – how is possible; संन्यस्त-अखिल-धर्म-कर्म-विषयैः –who have renounced all kind of duties, actions & objects; नित्य-आत्म-निष्ठा-परैः – who are passionately devoted to the eternal Atman; तत्त्वज्ञैः – by sages; आत्मनि-सदानन्द-इच्छुभिः – who wish to possess an undying bliss; यत्नतः-करणीयम्‌ – this exclusion should be carefully practiced.

How is the exclusion of the objective world possible for one who lives identified with the body, whose mind is attached to the perception of external objects, who performs various acts for that end? This exclusion should be carefully practiced by sages, who have renounced all kind of duties, actions & objects; who are passionately devoted to the eternal Atman, who wish to possess an undying bliss.

सर्वात्मसिद्धये भिक्षोः कृतश्रवणकर्मणः ।

समाधिं विदधात्येषा शान्तो दान्त इति श्रुतिः ॥ ३४१ ॥

कृतश्रवणकर्मणः भिक्षोः शान्तः-दान्तः-इति एषा-श्रुतिः सर्वात्मसिद्धये समाधिं-विदधाति ।

कृतश्रवणकर्मणः – who has gone through the prescribed rituals of hearing the truth from the lips of the preceptor/Guru भिक्षोः – to the Monk/Sannyasin; शान्तः-दान्तः – “Calm, Self-controlled”; इति-एषा-श्रुतिः – the Upanishadic passage like; सर्वात्मसिद्धये – for realization of the identity of the universe with the Self; समाधिं-विदधाति – prescribes deep meditation.

To the Monk/Sannyasin who has gone through the prescribed rituals of hearing the truth from the lips of the preceptor/Guru, the Upanishadic passage like “Calm, Self-controlled”, prescribes deep meditation for realization of the identity of the universe with the Self.

आरूढशक्तेरहमो विनाशः

कर्तुन्न शक्य सहसापि पण्डितैः ।

ये निर्विकल्पाख्यसमाधिनिश्चलाः

तानन्तराऽनन्तभवा हि वासनाः ॥ ३४२ ॥

ये-निर्विकल्पाख्य-समाधि-निश्चलाः तान्-अन्तरा, पण्डितैः-अपि आरूढशक्तेः-अहमः सहसा

विनाशः-कर्तुं-न-शक्यः, अनन्तभवाः हि वासनाः ।

ये-निर्विकल्पाख्य-समाधि-निश्चलाः – who are perfectly calm through realization of the Self;

तान्-अन्तरा – barring those; पण्डितैः-अपि – even wise men; आरूढशक्तेः – after it has once become strong; अहमः – egoism; सहसा – suddenly; विनाशः-कर्तुं-न-शक्यः – cannot destroy;

अनन्तभवाः – the effect of innumerable births; हि – verily; वासनाः – desires are;

Even wise men cannot suddenly destroy egoism after it has once become strong, barring those who are perfectly calm through realization of the Self. Desires are verily the effect of innumerable births.

अहंबुद्ध्यैव मोहिन्या योजयित्वाऽऽवृतेर्बलात् ।

विक्षेपशक्तिः पुरुषं विक्षेपयति तद्गुणैः ॥ ३४३ ॥

विक्षेपशक्तिः आवृतेः-बलात् मोहिन्या-अहंबुद्ध्या-एव-योजयित्वा पुरुषं तत्-गुणैः विक्षेपयति ।

विक्षेपशक्तिः – the projecting power; आवृतेः-बलात् – through the aid of the veiling power;

मोहिन्या-पुरुषं-अहंबुद्ध्या-एव-योजयित्वा – deluding a man with the siren of an egoistic idea; तत्-गुणैः – through the attributes of that; विक्षेपयति – distracts him.

The projecting power, through the aid of the veiling power, deluding a man with the siren of an egoistic idea, distracts him through the attributes of that.

विक्षेपशक्तिविजयो विषमो विधातुं

निःशेषमावरणशक्तिनिवृत्त्यभावे ।

दृग्दृश्ययोः स्फुटपयोजलवद्विभागे

नश्येत्तदावरणमात्मनि च स्वभावात् ।

निःसंशयेन भवति प्रतिबन्धशून्यो

विक्षेपणं नहिं तदा यदि चेन्मृषार्थे ॥ ३४४ ॥*

निःशेषम् आवरण-शक्ति-निवृत्ति-अभावे विक्षेपशक्तिविजयः विधातुं विषमः । दृग्-दृश्ययोः

स्फुट-पयः-जलवत्-विभागे आत्मनि तद् आवरणम् स्वभावात् च नश्येत् । यदि-चेत् मृषार्थे विक्षेपणं नहिं तदा

निःसंशयेन प्रतिबन्धशून्यः भवति ।

निःशेषम्-आवरण-शक्ति-निवृत्ति-अभावे – unless the veiling power is perfectly rooted out; विक्षेपशक्तिविजयः-विधातुं – to conquer the projecting power; – विषमः – it is extremely difficult; दृग्-दृश्ययोः – when subject is clearly distinguished from the objects; स्फुट-पयः-जलवत्-विभागे – like milk from water; आत्मनि – over the Atman; तद् – that; आवरणम् – covering; स्वभावात् – naturally; च – but; नश्येत् – vanishes; यदि-चेत् – if thus; मृषार्थे – due to unreal sense-objects; विक्षेपणं – oscillation of the mind; नहिं – there remains no; तदा – then; निःसंशयेन – (the victory) is undoubtedly; प्रतिबन्धशून्यः-भवति – free from obstacles.

It is extremely difficult to conquer the projecting power unless the veiling power is perfectly rooted out, but that covering over the Atman naturally vanishes when subject is clearly distinguished from the objects, like milk from water; if thus there remains no oscillation of the mind due to unreal sense-objects, then (the victory) is undoubtedly free from obstacles.

सम्यग्विवेकः स्फुटबोधजन्यो
विभज्य दृग्दृश्यपदार्थतत्त्वम्।
छिनत्ति मायाकृतमोहबन्धं
यस्माद्विमुक्तस्य पुनर्न संसृतिः॥ ३४५॥

स्फुटबोध-जन्यः सम्यग्-विवेकः दृग्-दृश्यपदार्थ-तत्त्वम् विभज्य मायाकृत-मोहबन्धं छिनत्ति यस्माद् विमुक्तस्य पुनः न संसृतिः।

स्फुटबोध-जन्यः – brought on by direct realization; सम्यग्-विवेकः – perfect discrimination; दृग्-दृश्यपदार्थ-तत्त्वम् – the true nature of the subject from that of object; विभज्य – distinguishing; मायाकृत-मोहबन्धं – the bond of delusion created by illusion; छिनत्ति – breaks; यस्माद् – therefore; विमुक्तस्य – for one who has been freed like this; पुनः-न-संसृतिः – there is no more transmigration.

Perfect discrimination brought on by direct realization distinguishing the true nature of the subject from that of object, breaks the bond of delusion created by illusion, therefore there is no more transmigration for one who has been freed like this.

परावरैकत्वविवेकवन्हिः
दहत्यविद्यागहनं ह्यशेषम्।
किं स्यात्पुनः संसरणस्य बीजं
अद्वैतभावं समुपेयुषोऽस्य॥ ३४६॥

पर-अवर-एकत्व-विवेक-वन्हिः हि गहनं अविद्या अशेषम् दहति। अद्वैतभावं समुपेयुषं अस्य पुनः संसरणस्य-बीजं किं-स्यात्?

पर-अवर-एकत्व-विवेक-वन्हिः – the fire of knowledge of identity of Self with Brahman; हि – verily; गहनं – the impenetrable; अविद्या – forest of nescience; अशेषम् – entirely; दहति – consumes; अद्वैतभावं –state of the Oneness; समुपेयुषं-अस्य – for one who has realized such; –

पुनः-संसरणस्य-बीजं – seed left for future transmigration; किं-स्यात् – how can there be any.

The fire of knowledge of identity of Self with Brahman verily consumes the impenetrable forest of nescience entirely; so how can there be any seed left for future transmigration for one who has realized such state of the Oneness?

आवरणस्य निवृत्तिर्भवति हि सम्यक्पदार्थदर्शनतः ।

मिथ्याज्ञानविनाशस्तद्विक्षेपजनितदुःखनिवृत्तिः ॥ ३४७ ॥

सम्यक्-पदार्थ-दर्शनतः हि आवरणस्य निवृत्तिः-भवति मिथ्याज्ञानविनाशः तद्-विक्षेपजनित-दुःखनिवृत्तिः ।

सम्यक्-पदार्थ-दर्शनतः – when the Reality is fully realized; हि – only; आवरणस्य – the veil that hides Truth; निवृत्तिः-भवति – vanishes; मिथ्याज्ञानविनाशः – the destruction of false knowledge; तद्-विक्षेपजनित-दुःखनिवृत्तिः – the cessation of misery brought about by its distracting influence.

The veil that hides the Truth vanishes only when the Reality is fully realized. (Thence follow) the destruction of false knowledge and the cessation of misery brought about by its distracting influence.

एतत्त्रितयं दृष्टं सम्यग्रज्जुस्वरूपविज्ञानात् ।

तस्माद्वस्तुसतत्त्वं ज्ञातव्यं बन्धमुक्तये विदुषा ॥ ३४८ ॥

सम्यक्-रज्जुस्वरूपविज्ञानात् एतत्-त्रितयं दृष्टं तस्मात् विदुषाबन्धमुक्तये वस्तुसतत्त्वं ज्ञातव्यं ।

सम्यक्-रज्जुस्वरूपविज्ञानात् – when the real nature of the rope is fully known; एतत्-त्रितयं – these three; दृष्टं – are observed; तस्मात् – therefore; विदुषा – the wise man; बन्धमुक्तये – for the breaking of his bonds; वस्तुसतत्त्वं – the real nature of things; ज्ञातव्यं – should know.

(In case you see a rope and think it is a snake,) when the real nature of the rope is fully known, these three viz. (vanishing of the veil that hides the Truth, the destruction of false knowledge and the cessation of misery brought about by its distracting influence) are observed. Therefore the wise man should know the real nature of things for the breaking of his bonds.

अयोऽग्नियोगादिव सत्समन्वयान्

मात्रादिरूपेण विजृम्भते धीः ।

तत्कार्यमेतद्द्वितयं यतो मृषा

दृष्टं भ्रमस्वप्नमनोरथेषु ॥ ३४९ ॥

ततो विकाराः प्रकृतेरहंमुखा

देहावसाना विषयाश्च सर्वे ।

क्षणेऽन्यथाभावितया ह्यमीषा-

मसत्त्वमात्मा तु कदापि नान्यथा ॥ ३५० ॥

अग्नियोगात् अयः-इव सत्-समन्वयान् धीः मात्रादि-रूपेण विजृम्भते । यतः तत्कार्यम् एतद् द्वितयं भ्रम-स्वप्न-मनोरथेषु मृषा दृष्टं, ततः अहंमुखा देहावसाना च-विषयाः सर्वे-प्रकृतेः-विकाराः, क्षणे अन्यथा-भावितया हि अमीषाम् असत्त्वम् आत्मा-त-कदा-अपि न-अन्यथा ।

अग्नियोगात् – manifesting as sparks through contact with fire; अयः-इव – like iron; सत्-समन्वयात् – through the inherence of Brahman; धीः – the intellect; मात्रादि-रूपेण – manifests itself as knower & known; विजृम्भते – manifests itself; यतः – as; तत्कार्यम् – the effects of the intellect; एतद् – these; द्वितयं – two; भ्रम-स्वप्न-मनोरथेषु – in the case of delusion, dream & fancy; मृषा – to be unreal; दृष्टं – are observed; ततः – similarly; अहंमुखा – from egoism; देहावसाना-च-विषयाः – down to the body & all sense-objects; सर्वे-प्रकृतेः-विकाराः – the modifications of the nature/Prakrti; क्षणे – every moment; अन्यथा-भावितया – due to their being subject to change; हि – are also; अमीषाम् – all these; असत्त्वम् – unreal; आत्मा-तु-कदा-अपि-न-अन्यथा – but the Atman never changes.

Like iron manifesting as sparks through contact with fire, the intellect manifests itself as knower & known through the inherence of Brahman. As these two, the effects of the intellect are observed to be unreal in the case of delusion, dream & fancy, similarly, the modifications of the nature/Prakrti, from egoism down to the body & all sense-objects are also unreal, due to their being subject to change every moment; but the Atman never changes.

नित्याद्वयाखण्डचिदेकरूपो
बुद्ध्यादिसाक्षी सदसद्विलक्षणः ।
अहंपदप्रत्ययलक्षितार्थः
प्रत्यक् सदानन्दघनः परात्मा ॥ ३५१ ॥

पर-आत्मा नित्य-अद्वय-अखण्ड-चित्-एकरूपः बुद्धि-आदि-साक्षी सद्-असद्-विलक्षणः
अहं-पद-प्रत्यय-लक्षितार्थः प्रत्यक् सत्-आनन्दघनः ।

पर-आत्मा – the Supreme Self (is ever of the nature of); नित्य – eternal; अद्वय – one without second; अखण्ड-चित्-एकरूपः – individual knowledge; बुद्धि-आदि-साक्षी – the witness of the intellect & the rest; सद्-असद्-विलक्षणः – distinct from the gross & subtle; अहं-पद-प्रत्यय-लक्षितार्थः – the implied meaning of the term & idea "I"; प्रत्यक् – the embodiment of inward; सत्-आनन्दघनः – eternal bliss.

The Supreme Self (is ever of the nature of) eternal, individual knowledge, one without second, the witness of the intellect & the rest, distinct from the gross & subtle, the implied meaning of the term & idea "I", the embodiment of inward, eternal bliss.

इत्थं विपश्चित्सदसद्विभज्य
निश्चित्य तत्त्वं निजबोधदृष्ट्या ।
ज्ञात्वा स्वमात्मानमखण्डबोधं
तेभ्यो विमुक्तः स्वयमेव शाम्यति ॥ ३५२ ॥

इत्थं विपश्चित् सद्-असद्-विभज्यं निजबोधदृष्ट्या तत्त्व-निश्चित्य स्वम् आत्मानम् अखण्डबोधं ज्ञात्वा
तेभ्यः विमुक्तः स्वयम् एव शाम्यति ।

विपश्चित् – the wise man; इत्थं-सद्-असद्-विभज्यं – discriminating thus the real & unreal;

निजबोधदृष्ट्या – through his illuminative insight; तत्त्व-निश्चित्य – ascertaining the Truth;

स्वम्-आत्मानम्-अखण्डबोधं-ज्ञात्वा – realizing his own Self which is Knowledge Absolute;

तेभ्यः-विमुक्तः – getting rid of the obstructions; स्वयम्-एव-शाम्यति – directly attains Peace.

The wise man discriminating thus the real & unreal, ascertaining the Truth through his illuminative insight, realizing his own Self which is Knowledge Absolute, and getting rid of the obstructions directly attains Peace.

अज्ञानहृदयग्रन्थेर्निःशेषविलयस्तदा ।

समाधिनाऽविकल्पेन यदाऽद्वैतात्मदर्शनम् ॥ ३५३ ॥

यदा अविकल्पेन-समाधिना अद्वैत-आत्मदर्शनम् तदा अज्ञान-हृदय-ग्रन्थेः निःशेषविलयः ।

यदा – when; अविकल्पेन-समाधिना – by means of the one-pointed meditation; अद्वैत-आत्मदर्शनम् – the Atman, the One without second, is realized; तदा – then; अज्ञान-हृदय-ग्रन्थेः – the heart's knot of ignorance; निःशेषविलयः – is totally destroyed.

When the Atman, the One without second, is realized by means of the one-pointed meditation, then the heart's knot of ignorance is totally destroyed.

त्वमहमिदमितीयं कल्पना बुद्धिदोषात्

प्रभवति परमात्मन्यद्वये निर्विशेषे ।

प्रविलसति समाधावस्य सर्वो विकल्पो

विलयनमुपगच्छेद्वस्तुतत्त्वावधृत्या ॥ ३५४ ॥

त्वम्, अहम्, इदम् इति-इयं-कल्पना बुद्धिदोषात् प्रभवति । निर्विशेषे अद्वये परमात्मनि प्रविलसति समाधौ ।

वस्तु-तत्त्वावधृत्या अस्य सर्वः विकल्पः विलयनम् उपगच्छेत् ।

त्वम् – you; अहम् – I; इदम् – this; इति-इयं-कल्पना – such imaginations as; बुद्धिदोषात् – through the defects of the intellect; प्रभवति – takes place; निर्विशेषे – the Absolute; अद्वये – One without second; परमात्मनि – the Paramatman; प्रविलसति – manifests Itself; समाधौ – in deep meditation; वस्तु-तत्त्वावधृत्या – through the realization of the truth; अस्य-सर्वः-विकल्पः-विलयनम्-उपगच्छेत् – all such imaginations are dissolved for the aspirant.

Such imaginations as "you", "I" or "this" takes place through the defects of the intellect. But when the Paramatman, the Absolute, One without second, manifests Itself in deep meditation all such imaginations are dissolved for the aspirant, through the realization of the truth.

शान्तो दान्तः परमुपरतः क्षान्तियुक्तः समाधिं

कुर्वन्नित्यं कलयति यतिः स्वस्य सर्वात्मभावम् ।

तेनाविद्यातिमिरजनितान्साधु दग्ध्वा विकल्पान्

ब्रह्माकृत्या निवसति सुखं निष्क्रियो निर्विकल्पः ॥ ३५५ ॥*

शान्तः दान्तः परम् उपरतः क्षान्तियुक्तः यतिः समाधिं कुर्वन् स्वस्य सर्वात्मभावम् नित्यं कलयति ।

तेन अविद्या-तिमिर-जनितान् विकल्पान् साधु दग्ध्वा ब्रह्माकृत्या निष्क्रियः निर्विकल्पः सुखं निवसति ।

शान्तः – calm; दान्तः – self controlled; परम्-उपरतः – perfectly retired from the sense-world; क्षान्तियुक्तः – forbearing; यतिः – the Monk/Sannyasin; समाधिं-कुर्वन् – devoting himself to the practice of meditation; स्वस्य-सर्वात्मभावम् – his own self being the Self of the whole universe; नित्यं – always; कलयति – reflects on; तेन – by it; अविद्या-तिमिर-जनितान् – which are due to the gloom of ignorance; विकल्पान् – imaginations; साधु – completely; दग्ध्वा – destroying; ब्रह्माकृत्या – as Brahman; निष्क्रियः-निर्विकल्पः – free from action & oscillations of the mind; सुखं-निवसति – lives blissfully.

The Monk/Sannyasin, calm, self controlled, perfectly retired from the sense-world, forbearing, devoting himself to the practice of meditation, always reflects on his own self being the Self of the whole universe; and destroying completely by it the imaginations which are due to the gloom of ignorance, lives blissfully as Brahman free from action & oscillations of the mind.

समाहिता ये प्रविलाप्य बाह्यं

श्रोत्रादि चेतः स्वमहं चिदात्मनि ।

त एव मुक्ता भवपाशबन्धैः

नान्ये तु पारोक्ष्यकथाभिधायिनः ॥ ३५६ ॥

ते-ये-एव श्रोत्रादि बाह्यं चेतः स्वमं अहं चिदात्मनि प्रविलाप्य समाहिता, भवपाशबन्धैः-मुक्ता, पारोक्ष्य-कथाभिधायिनः अन्ये-तु-न ।

ते-एव – those alone; ये – who; श्रोत्रादि – the sense-organs; बाह्यं – the objective world; चेतः – the mind; स्वमं-अहं – the one's own very ego; चिदात्मनि – in the Atman – the knowledge Absolute; प्रविलाप्य – have dissolved; समाहिता – mearging in deep meditation; भवपाशबन्धैः-मुक्ता – are free from the bondage of transmigration; पारोक्ष्य-कथाभिधायिनः – who but dabble in second hand talk; अन्ये-तु-न – and none else.

Those alone are free from the bondage of transmigration who, merging in deep meditation, have dissolved the objective world, the sense-organs, the mind, nay, the one's own very ego in the Atman – the knowledge Absolute and none else who but dabble in second-hand talk.

उपाधिभेदात्स्वयमेव भिद्यते

चोपाध्यपोहे स्वयमेव केवलः ।

तस्मादुपाधेर्विलयाय विद्वान्

वसेत्सदाऽकल्पसमाधिनिष्ठया ॥ ३५७ ॥

उपाधिभेदात् स्वयम्-एव भिद्यते च उपाधि-अपोहे स्वयम्-एव केवलः ।

तस्मात् विद्वान् उपाधेः-विलयाय अकल्प-समाधिनिष्ठया सदा वसेत् ।

उपाधिभेदात् – through the diversity of supervening conditions (*Upadhis*); स्वयम्-एव – a man himself; भिद्यते – is apt to think as full of diversity; च – but; उपाधि-अपोहे – with the removal of (these *Upadhis*); स्वयम्-एव – he is again his own Self; केवलः – the immutable;

तस्मात् – therefore; विद्वान् – the wise man; उपाधेः-विलयाय – for the dissolution of the *Upadhis*; अकल्प-समाधिनिष्ठया – to the practice of deep meditation freed from the imaginations; सदा – ever; वसेत् – should devote himself.

Through the diversity of supervening conditions (*Upadhis*), a man is apt to think himself as full of diversity, but with the removal of (these *Upadhis*) he is again his own Self, the immutable. Therefore the wise man should ever devote himself to the practice of deep meditation freed from the imaginations for the dissolution of the *Upadhis.*

सति सक्तो नरो याति सद्भावं ह्येकनिष्ठया ।

कीटको भ्रमरं ध्यायन् भ्रमरत्वाय कल्पते ॥ ३५८ ॥

सति-सक्तः नरः एकनिष्ठया सद्भावं-हि-याति । (यथा) कीटकः भ्रमरं ध्यायन् भ्रमरत्वाय कल्पते ।

सति-सक्तः – who is attached to the Real; नरः –the man; एकनिष्ठया – through his one-pointed devotion; सद्भावं-हि-याति – becomes Real; (यथा – just as;) कीटकः – the cockroach; भ्रमरं – the *Bhramara*; ध्यायन् – thinking intently on; भ्रमरत्वाय-कल्पते – is transformed into a *Bhramara*.

The man who is attached to the Real becomes Real, through his one-pointed devotion. Just as the cockroach thinking intently on the *Bhramara* is transformed into a *Bhramara*.

क्रियान्तरासक्तिमपास्य कीटको

ध्यायन्नलित्वं ह्यलिभावमृच्छति ।

तथैव योगी परमात्मतत्त्वं

ध्यात्वा समायाति तदेकनिष्ठया ॥ ३५९ ॥

कीटकः क्रियान्तर-आसक्तिम् अपास्य अलित्वं ध्यायन् अलिभावम् हि ऋच्छति तथा एव योगी एकनिष्ठया परमात्मतत्त्वं ध्यात्वा तद्-समायाति ।

कीटकः – the cockroach; क्रियान्तर-आसक्तिम् – the attachment to all other actions; अपास्य – giving up; अलित्वं – on the *Bhramara*; ध्यायन् – thinks intently; अलिभावम्-हि – veriely in to that ऋच्छति – becomes transformed in to that *Bhramara*; तथा-एव – exactly in the same manner; योगी – the the yogin/Self-controlled one; एकनिष्ठया – through one pointed devotion to That; परमात्मतत्त्वं – on the truth of the Paramatman; ध्यात्वा – meditating; तद्-समायाति – attains It.

Just as the cockroach, giving up the attachment to all other actions, thinks intently on the *Bhramara* and becomes transformed in to that *Bhramara;* exactly in the same manner the the yogin/Self-controlled one, meditating on the truth of the Paramatman attains It, through one pointed devotion to That.

अतीव सूक्ष्मं परमात्मतत्त्वं

न स्थूलदृष्ट्या प्रतिपत्तुमर्हति ।

समाधिनात्यन्तसुसूक्ष्मवृत्या

ज्ञातव्यमार्यैरतिशुद्धबुद्धिभिः ॥ ३६० ॥

परमात्मतत्त्वं अतीव सूक्ष्मं स्थूलदृष्ट्या प्रतिपत्तुम् न अर्हति। अतिशुद्धबुद्धिभिः अत्यन्तसुसूक्ष्मवृत्या समाधिना आर्यैः ज्ञातव्यम्।

परमात्मतत्त्वं – the truth of the Paramatman; अतीव – extremely; सूक्ष्मं – subtle; स्थूलदृष्ट्या – by gross outgoing tendency of the mind; प्रतिपत्तुम्-न-अर्हति – can not be reached; अतिशुद्धबुद्धिभिः – with perfectly pure minds; अत्यन्तसुसूक्ष्मवृत्या – brought on by an extra-ordinary fineness of the mental state; समाधिना – by means of deep meditation; आर्यैः – to noble souls; ज्ञातव्यम् – it is only accessible to.

The truth of the Paramatman is extremely subtle, and cannot be reached by gross outgoing tendency of the mind. It is only accessible to noble souls with perfectly pure minds, by means of deep meditation brought on by an extra-ordinary fineness of the mental state.

यथा सुवर्णं पुटपाकशोधितं
त्यक्त्वा मलं स्वात्मगुणं समृच्छति।
तथा मनः सत्त्वरजस्तमोमलं
ध्यानेन सन्त्यज्य समेति तत्त्वम्॥ ३६१ ॥

यथा पुटपाकशोधितं सुवर्णं मलं त्यक्त्वा स्वात्मगुणं समृच्छति तथा ध्यानेन मनः सत्त्व-रजः-तमः-मलं सन्त्यज्य तत्त्वम् सम्-एति।

यथा – as; पुटपाकशोधितं – purified by thorough heating on the fire; सुवर्णं – gold; मलं – its impurities; त्यक्त्वा – gives up; स्वात्मगुणं – its own luster; समृच्छति – attains to; तथा – so; ध्यानेन – through meditation; मनः – the mind; सत्त्व-रजः-तमः-मलं – its impurities of *Sttwa, Rajas & Tamas*; सन्त्यज्य – gives up; तत्त्वम् – the reality of Brahman; सम्-एति – attains to;

As gold purified by thorough heating on the fire gives up its impurities and attains to its own luster, so the mind, through meditation, gives up its impurities of *Sttwa, Rajas & Tamas,* and attains to the reality of Brahman.

निरन्तराभ्यासवशात्तदित्थं
पक्वं मनो ब्रह्मणि लीयते यदा।
तदा समाधिः सविकल्पवर्जितः
स्वतोऽद्वयानन्दरसानुभावकः॥ ३६२ ॥

इत्थं निरन्तर-अभ्यास-वशात् पक्वं मनः यदा ब्रह्मणि लीयते तदा सविकल्पवर्जितः समाधिः स्वतः अद्वय-आनन्द-रस-अनुभावकः।

इत्थं – thus; निरन्तर-अभ्यास-वशात् – by constant practice; पक्वं – purified; मनः – the mind; यदा – when; ब्रह्मणि – in Brahman; लीयते – is merged; तदा – then; सविकल्पवर्जितः – getting freed from the imaginations; समाधिः – deep meditation; स्वतः-अद्वय-आनन्द-रस-अनुभावकः – leads directly to the realizationof the Bliss of Brahman, one without a second.

When the mind, thus purified by constant practice, is merged in Brahman, then deep meditation getting freed from the imaginations leads directly to the realization of the Bliss of Brahman, one without a second.

समाधिनाऽनेन समस्तवासना-

ग्रन्थेर्विनाशोऽखिलकर्मनाशः ।

अन्तर्बहिः सर्वत एव सर्वदा

स्वरूपविस्फूर्तिरयत्नतः स्यात्॥ ३६३ ॥

अनेन समाधिना समस्त-वासना-ग्रन्थेः विनाशः अखिलकर्मनाशः अन्तः बहिः सर्वतः एव सर्वदा

स्वरूप-विस्फूर्तिः अयत्नतः स्यात् ।

अनेन – by this; समाधिना – deep meditation; समस्त-वासना-ग्रन्थेः – all desires which are like knots; विनाशः – are destroyed; अखिलकर्मनाशः – all work is at end; अन्तः-बहिः – inside & out; सर्वतः-एव-सर्वदा – everywhere and always; अयत्नतः-स्वरूप-विस्फूर्तिः – the spontaneous manifestation of one's real nature; स्यात् – there takes place.

By this deep meditation are destroyed all desires which are like knots, all work is at end, inside & out there takes place everywhere and always the spontaneous manifestation of one's real nature.

श्रुतेः शतगुणं विद्यान्मननं मननादपि ।

निदिध्यासं लक्षगुणमनन्तं निर्विकल्पकम्॥ ३६४ ॥

श्रुतेः मननं शतगुणं मननात्-अपि निदिध्यासं लक्षगुणम् निर्विकल्पकम् अनन्तं विद्यात्।

श्रुतेः – to hearing; मननं – reflection; शतगुणं – a hundred times superior; मननात्-अपि – even to reflection; निदिध्यासं – meditation; लक्षगुणम् – a hundred thousand times superior; निर्विकल्पकम् – the practice of deep meditation freed from the imaginations; अनन्तं – is infinite in its results; विद्यात् – should be considered.

Reflection should be considered a hundred times superior to hearing, and meditation– a hundred thousand times superior even to reflection, but the practice of deep meditation freed from the imaginations is infinite in its results.

निर्विकल्पकसमाधिना स्फुटं

ब्रह्मतत्त्वमवगम्यते ध्रुवम्।

नान्यथा चलतया मनोगतेः

प्रत्ययान्तरविमिश्रितं भवेत्॥ ३६५ ॥

निर्विकल्पक-समाधिना ब्रह्मतत्त्वम् स्फुटं ध्रुवम् अवगम्यते न अन्यथा । चलतया मनोगतेः

प्रत्ययान्तर-विमिश्रितं भवेत्।

निर्विकल्पक-समाधिना – by the practice of deep meditation freed from the imaginations; ब्रह्मतत्त्वम् – the truth of Brahman; स्फुटं – clearly; ध्रुवम् – definitely; अवगम्यते – realized; न-अन्यथा – not otherwise; चलतया-मनोगतेः – the mind being unstable by nature; प्रत्ययान्तर-विमिश्रितं-भवेत् – it is apt to be mixed up with other perceptions.

By the practice of deep meditation freed from the imaginations the truth of Brahman is clearly & definitely realized, but not otherwise; for the mind being unstable by nature it is apt to be mixed up with other perceptions.

अतः समाधत्स्व यतेन्द्रियः सन्

निरन्तरं शान्तमनाः प्रतीचि ।

विध्वंसय ध्वान्तमनाद्यविद्यया

कृतं सदेकत्वविलोकनेन ॥ ३६६ ॥

अतः यतेन्द्रियः-सन् शान्तमनाः प्रतीचि निरन्तरं समाधत्स्व सत्-एकत्व-विलोकनेन अनादि-अविद्यया-कृतं ध्वान्तम् विध्वंसय ।

अतः – hence; यतेन्द्रियः-सन् – the senses controlled; शान्तमनाः – with the mind calm; निरन्तरं – always; प्रतीचि-समाधत्स्व – drown the mind in the Supreme Self that is within; सत्-एकत्व-विलोकनेन – through the realization of thy identity with that Reality; अनादि – which is without beginning; अविद्यया-कृतं – created by nescience; ध्वान्तम् – the darkness; विध्वंसय – destroy.

Hence, with the mind calm and the senses controlled, always drown the mind in the Supreme Self that is within, and through the realization of thy identity with that Reality destroy the darkness created by nescience, which is without beginning.

योगस्य प्रथमद्वारं वाङ्निरोधोऽपरिग्रहः ।

निराशा च निरीहा च नित्यमेकान्तशीलता ॥ ३६७ ॥

योगस्य प्रथम् द्वारं वाङ्निरोधः अपरिग्रहः च निराशा निरीहा च नित्यम्-एकान्तशीलता ।

योगस्य – to Yoga (union of the human soul with the Supreme Spirit); प्रथम् – the primary; द्वारं – steps; वाङ्निरोधः – control of speech; अपरिग्रहः – non acceptance of gifts; च निराशा – entertaining no expections; निरीहा – freedom from selfish-activities; च नित्यम्-एकान्तशीलता – always living in a retired place.

The primary steps to Yoga (union of the human soul with the Supreme Spirit) are control of speech, non acceptance of gifts, entertaining no expectations, freedom from selfish-activities and always living in a retired place.

एकान्तस्थितिरिन्द्रियोपरमणे हेतुर्दमश्चेतसः

संरोधे करणं शमेन विलयं यायादहंवासना ।

तेनानन्दरसानुभूतिरचला ब्राह्मी सदा योगिनः

तस्माच्चित्तनिरोध एव सततं कार्यः प्रयत्नो मुनेः ॥ ३६८ ॥

एकान्तस्थितिः इन्द्रिय-उपरमणे हेतुः दमः चेतसः-संरोधे करणं शमेन अहंवासना विलयं-यायात् ।

तेन योगिनः सदा अचला ब्राह्मी आनन्दरसानुभतिः ।तस्मात् मुनेः चित्तनिरोधे सततं एव प्रयत्नः कार्यः ।

एकान्तस्थितिः – living in a retired place; इन्द्रिय-उपरमणे – to control the sense-organs; हेतुः – serves; दमः – control of the external-sense-organs; चेतसः-संरोधे – to control the mind; करणं – helps; शमेन – through the control of the mind; अहंवासना – egoism; विलयं-यायात् – is destroyed;

तेन – this again gives; योगिनः – the yogin/Self-controlled one; सदा-अचला – an unbroken; ब्राह्मी – of Brahman; आनन्दरस – the Bliss; अनुभतिः – realization of; तस्मात् – therefore; मुनेः – the man of reflection; चित्तनिरोधे – control the mind; सततं-एव-प्रयत्नः-कार्यः – should always strive to.

Living in a retired place serves to control the sense-organs, control of the external-sense-organs helps to control the mind, through the control of the mind egoism is destroyed; this again gives the yogin/Self-controlled one an unbroken realization of the Bliss of Brahman. Therefore the man of reflection should always strive to control the mind.

वाचं नियच्छात्मनि तं नियच्छ

बुद्धौ धियं यच्छ च बुद्धिसाक्षिणि ।

तं चापि पूर्णात्मनि निर्विकल्पे

विलाप्य शान्तिं परमां भजस्व ॥ ३६९ ॥

वाचं आत्मनि नियच्छ तं बुद्धौ नियच्छ च धियं बुद्धिसाक्षिणि यच्छ तं-च-अपि निर्विकल्पे पूर्णात्मनि विलाप्य परमां शान्तिं भजस्व ।

वाचं – speech; आत्मनि – in the mind; नियच्छ – restrain; तं – that restrained mind; बुद्धौ – in the intellect; नियच्छ – hold back; च – and धियं – the calm intellect बुद्धिसाक्षिणि – in the witness of the intellect; यच्छ – again release; तं-अपि – that also; निर्विकल्पे – in the infinite; पूर्णात्मनि – Absolute Self; च-विलाप्य – and merging; परमां – supreme; शान्तिं – Peace; भजस्व – attain to.

Restrain speech in the mind, and hold back that restrained mind in the intellect, this calm intellect again release in the witness of the intellect, and merging that (witness of the intellect) also in the infinite Absolute Self, attain to supreme Peace.

देहप्राणेन्द्रियमनोबुद्ध्यादिभिरुपाधिभिः ।

यैर्यैर्वृत्तेःसमायोगस्तत्तद्भावोऽस्य योगिनः ॥ ३७० ॥

देह-प्राण-इन्द्रिय-मनः-बुद्धि-आदिभिः यैः यैः उपाधिभिः वृत्तेः समायोगः तत्-तत्-भावः अस्य योगिनः ।

देह – the body; प्राण – vital forces; इन्द्रिय – organs; मनः – mind; बुद्धि – intellect; आदिभिः – and the rest; यैः-यैः-उपाधिभिः – with whatever of these supervening adjuncts; वृत्तेः-समायोगः – the mind is associated; तत्-तत्-भावः – is transformed, as it were, into that; अस्य – this; योगिनः – the yogin/Self-controlled one.

The body, vital forces, organs, mind, intellect and the rest - with whatever of these supervening adjuncts the mind is associated, the yogin/Self-controlled one is transformed, as it were, into that.

तन्निवृत्त्या मुनेः सम्यक् सर्वोपरमणं सुखम् ।

संदृश्यते सदानन्दरसानुभवविप्लवः ॥ ३७१ ॥

तत्-निवृत्त्या मुनेः सम्यक्-सर्व-उपरमणं सुखम्-संदृश्यते सदा-आनन्द-रस-अनुभव-विप्लवः ।

तत्-निवृत्त्या – when that(the mind getting associated with supervening adjuncts) is stopped;

मुनेः – the man of reflection; सम्यक्-सर्व-उपरमणं – detached from everything; सुखम्-संदृश्यते – is found to be easily; सदा-आनन्द-रस-अनुभव-विप्लवः – to get the experience of an abundance of everlasting Bliss.

When that (the mind getting associated with supervening adjuncts) is stopped, the man of reflection is found to be easily detached from everything, and to get the experience of an abundance of everlasting Bliss.

अन्तस्त्यागो बहिस्त्यागो विरक्तस्यैव युज्यते ।

त्यजत्यन्तर्बहिःसङ्गं विरक्तस्तु मुमुक्षया ॥ ३७२ ॥

अनतः-त्यागः बहिः-त्यागः विरक्तस्य-एव युज्यते । विरक्तः तु मुमुक्षया अन्तः-बहिः-सङ्गं त्यजति ।

अन्तः-त्यागः-बहिः-त्यागः – this renunciation of internal desires as well as external sense-objects; विरक्तस्य-एव – it is the man of dispassion; युज्यते – who is fit for; विरक्तः – dispassionate man; तु – for; मुमुक्षया – out of desire to be free; अन्तः-बहिः-सङ्गं – both internal & external attachment; त्यजति – relinquishes.

It is the man of dispassion who is fit for this renunciation of internal desires as well as external sense-objects; for dispassionate man, out of desire to be free, relinquishes both internal & external attachment.

बहिस्तु विषयैः सङ्गं तथान्तरहमादिभिः ।

विरक्त एव शक्नोति त्यक्तुं ब्रह्मणि निष्ठितः ॥ ३७३ ॥

विरक्तः तु ब्रह्मणि निष्ठितः एव बहिः विषयैः तथा अन्तः अहमादिभिः सङ्गं त्यक्तुं शक्नोति ।

विरक्तः-तु – it is only the dispassionate man; ब्रह्मणि – in Brahman; निष्ठितः-एव – who being thoroughly grounded; बहिः – the external; विषयैः – sense-objects; तथा – and; अन्तः – the internal; अहमादिभिः – egoism etc.; सङ्गं –attachment to; त्यक्तुं – give up; शक्नोति – can;

It is only the dispassionate man, who being thoroughly grounded in Brahman, can give up attachment to: the external sense-objects and the internal egoism etc.

वैराग्यबोधौ पुरुषस्य पक्षिवत्

पक्षौ विजानीहि विचक्षण त्वम् ।

विमुक्तिसौधाग्रलताधिरोहणं

ताभ्यां विना नान्यतरेण सिध्यति ॥ ३७४ ॥

विचक्षण वैराग्य-बोधौ पुरुषस्य पक्षिवत्-पक्षौ त्वम् विजानीहि ।

विमुक्ति-सौधाग्र-लता-अधिरोहणं ताभ्यां विना अन्यतरेण न सिध्यति ।

विचक्षण – O wise one; वैराग्य-बोधौ – dispassion and spiritual awareness; पुरुषस्य –in case of an aspirant; पक्षिवत्-पक्षौ – to be like the two wings of a bird; त्वम् – you विजानीहि – should know; विमुक्ति-सौधाग्र-लता-अधिरोहणं – the creeper of liberation that grows, as it were, on the top of an edifice; ताभ्यां-विना – unless both are there; अन्यतरेण – with the help of either one; न-सिध्यति – none can reach.

You should know dispassion and spiritual awareness to be like the two wings of a bird in case of an aspirant, O wise one unless both are there; none can with the help of either one, reach the creeper of liberation that grows, as it were, on the top of an edifice.

अत्यन्तवैराग्यवतः समाधिः

समाहितस्यैव दृढप्रबोधः ।

प्रबुद्धतत्त्वस्य हि बन्धमुक्तिः

मुक्तात्मनो नित्यसुखानुभूतिः ॥ ३७५ ॥*

अत्यन्तवैराग्यवतः-समाधिः समाहितस्य-एव दृढप्रबोधः प्रबुद्ध-तत्त्वस्य-हि बन्धमुक्तिः

मुक्तात्मनः नित्यसुखानुभूतिः ।

अत्यन्तवैराग्यवतः-समाधिः – the extremely dispassionate man enters into deep meditation;

समाहितस्य – one who enters into deep-meditation can get; दृढप्रबोधः – steady realization;

प्रबुद्ध-तत्त्वस्य-हि – only the man who has realized the Truth can be; बन्धमुक्तिः – free from

bondage; मुक्तात्मनः-एव – belongs to the free soul and no one else; नित्यसुखानुभूतिः – experience of eternal Bliss.

The extremely dispassionate man enters into deep meditation, and one who enters into deep-meditation can get steady realization; only the man who has realized the Truth can be free from bondage, and experience of eternal Bliss belongs to the free soul and no one else.

वैराग्यान्न परं सुखस्य जनकं पश्यामि वश्यात्मनः

तच्चेच्छुद्धतरात्मबोधसहितं स्वाराज्यसाम्राज्यधुक् ।

एतद्द्वारमजस्रमुक्तियुवतेर्यस्मात्त्वमस्मात्परं

सर्वत्रास्पृहया सदात्मनि सदा प्रज्ञां कुरु श्रेयसे ॥ ३७६ ॥

वश्यात्मनः वैराग्यात्-परं सुखस्य जनकं न-पश्यामि, चेत् तत् शुद्धतर-आत्मबोधसहितं-स्वाराज्य-साम्राज्यधुक्

यस्मात् एतद् अजस्र-मुक्तियुवते द्वारम् त्वम् अस्मात्-परं सर्वत्र अस्पृहया सदात्मनि श्रेयसे सदा प्रज्ञां-कुरु ।

वश्यात्मनः – for the man of self-control; वैराग्यात्-परं – any better than dispassion;

सुखस्य – of happiness; जनकं – instrument; न-पश्यामि – I do not find; तत् – if that is;

शुद्धतर-आत्मबोधसहितं – coupled with a highly pure realization of the Self; स्वाराज्य-साम्राज्यधुक् –

the suzerainty of absolute Independence; चेत् – it conduces to; यस्मात्-एतद् – since this is;

अजस्र-मुक्तियुवते – to the damsel of everlasting liberation; द्वारम् – the gateway; त्वम् – you;

अस्मात्-परं – hereafter; सर्वत्र-अस्पृहया – be dispassionate both internally & externally; श्रेयसे –

for your welfare; सदात्मनि – on the eternal Self; सदा-प्रज्ञां-कुरु – always fix your mind.

For the man of self-control I do not find any better instrument of happiness than dispassion, and if that is coupled with a highly pure realization of the Self, it conduces to the suzerainty of absolute Independence; and since this is the gateway to the damsel of everlasting liberation, you for your welfare, hereafter, be dispassionate both internally & externally, and always fix your mind on the eternal Self.

आशां छिन्द्धि विषोपमेषु विषयेष्वेषैव मृत्योः कृति-

स्त्यक्त्वा जातिकुलाश्रमेष्वभिमतिं मुञ्चातिदूरात्क्रियाः ।

देहादावसति त्यजात्मधिषणां प्रज्ञां कुरुष्वात्मनि

त्वं द्रष्टास्यमनोऽसि निर्द्वयपरं ब्रह्मासि यद्वस्तुतः ॥ ३७७ ॥

विष-उपमेषु-विषयेषु आशां-छिन्द्धि एषा-एव मृत्योः-कृतिः । जाति-कुल-आश्रमेषु अभिमतिं-त्यक्त्वा क्रियाः अति-दूरात्-मुञ्च । असति-देहादौ आत्मधिषणां-त्यज । आत्मनि प्रज्ञां-कुरुष्व यद् द्रष्टा असि अमनः असि वस्तुतः निर्द्वयपरं-ब्रह्म त्वं-असि ।

विष-उपमेषु-विषयेषु – for the sense-objects, which are like poison; आशां-छिन्द्धि – sever your craving; एषा-एव – for it is the very; मृत्योः-कृतिः – image of death; जाति-कुल-आश्रमेषु – of caste, family & order of life; अभिमतिं-त्यक्त्वा – giving up your pride; क्रियाः-अति-दूरात्-मुञ्च – fling actions to a distance; असति-देहादौ – with such unreal things as the body; आत्मधिषणां-त्यज – give up your identification; आत्मनि – on the Atman; प्रज्ञां-कुरुष्व – fix your mind; यद् – for द्रष्टा – really the witness; असि – you are; अमनः – unshackled by the mind; असि – you are; वस्तुतः – in fact; निर्द्वय-परं-ब्रह्म – the Supreme Brahman one without a second; त्वं-असि – you are.

Sever your craving for the sense-objects, which are like poison, for it is the very image of death, and giving up your pride of caste, family & order of life, fling actions to a distance. Give up your identification with such unreal things as the body, and fix your mind on the Atman. For you are unshackled by the mind, you are really the witness, in fact you are the Supreme Brahman one without a second.

लक्ष्ये ब्रह्मणि मानसं दृढतरं संस्थाप्य बाह्येन्द्रियं

स्वस्थाने विनिवेश्य निश्चलतनुश्चोपेक्ष्य देहस्थितिम् ।

ब्रह्मात्मैक्यमुपेत्य तन्मयतया चाखण्डवृत्त्याऽनिशं

ब्रह्मानन्दरसं पिबात्मनि मुदा शून्यैः किमन्यैर्भृशम् ॥ ३७८ ॥

मानसं लक्ष्ये ब्रह्मणि दृढतरं संस्थाप्य बाह्येन्द्रियं स्वस्थाने विनिवेश्य च निश्चलतनुः देहस्थितिम् उपेक्ष्य ब्रह्म-आत्म-ऐक्यं-उपेत्य तन्मयतया अखण्डवृत्त्या च अनिशं ब्रह्मानन्दरसं आत्मनि मुदा पिब अन्यैः शून्यैः भृशम किम् ?

मानसं – the mind; लक्ष्ये-ब्रह्मणि – on the Ideal, Brahman; दृढतरं – firmly; संस्थाप्य – fixing; बाह्येन्द्रियं – the external organs; स्वस्थाने – in their respective centers; विनिवेश्य – restraining; च – and; निश्चलतनुः-देहस्थितिम्-उपेक्ष्य – with the body held steady & taking no thought of its maintenance; ब्रह्म-आत्म-ऐक्यं – identity with Brahman; उपेत्य – attaining; तन्मयतया – being one with It; अखण्डवृत्त्या – without a break; अनिशं-च – always;

आत्मनि-मुदा-ब्रह्मानन्दरसं-पिब – drink joyfully the Bliss of Brahman in your own Self; अन्यैः-किम् – what is the use of other things; शून्यैः-भृशम – which are entirely hollw.

Fixing the mind firmly on the Ideal-Brahman, and restraining the external organs in their respective centers; with the body held steady & taking no thought of its maintenance; attaining identity with Brahman and being one with It - always drink joyfully the Bliss of Brahman in your own Self, without a break. What is the use of other things which are entirely hollow?

अनात्मचिन्तनं त्यक्त्वा कश्मलं दुःखकारणम् ।

चिन्तयात्मानमानन्दरूपं यन्मुक्तिकारणम् ॥ ३७९ ॥

दुःखकारणम् कश्मलं अनात्मचिन्तनं त्यक्त्वा यद् मुक्तिकारणम् आनन्दरूपं आत्मानम् चिन्तय ।

दुःखकारणम् – productive of misery; कश्मलं – which is evil; अनात्मचिन्तनं – the thoughts of the non-Self; त्यक्त्वा – giving up; यद्-मुक्तिकारणम् – which conduces to liberation; आनन्दरूपं – the Bliss Absolute; आत्मानम् – the self; चिन्तय – think of.

Giving up the thoughts of the non-Self which is evil & productive of misery, think of the self, the Bliss Absolute, which conduces to liberation.

एष स्वयंज्योतिरशेषसाक्षी

विज्ञानकोशो विलसत्यजस्रम् ।

लक्ष्यं विधायैनमसद्विलक्षण-

मखण्डवृत्त्याऽऽत्मतयाऽनुभावय ॥ ३८० ॥

एष स्वयंज्योतिः अशेषसाक्षीः विज्ञानकोशो अजस्रम् विलसति ।असत्-विलक्षणम् एनम् लक्ष्यं विधाय अखण्डवृत्त्या आत्मतया अनुभावय ।

एष – here; स्वयंज्योतिः – the Self-effulgent; अशेषसाक्षीः – Witness of everything; विज्ञानकोशो – the Atman which has intellect for Its seat; अजस्रम् – eternally; विलसति – shines; असत्-विलक्षणम् – which is distinct from the unreal; एनम्-लक्ष्यं-विधाय – making this Atman the goal; अखण्डवृत्त्या – (always) excluding all other thoughts; आत्मतया – as your own Self; अनुभावय – experience/meditate on It.

Here shines eternally the Atman the Self-effulgent Witness of everything, which has intellect for Its seat. Making this Atman which is distinct from the unreal, the goal experience/meditate on It as your own Self, (always) excluding all other thoughts.

एतमच्छीन्नया वृत्त्या प्रत्ययान्तरशून्यया ।

उल्लेखयन्विजानीयात्स्वस्वरूपतया स्फुटम् ॥ ३८१ ॥

एतम् अच्छीन्नया प्रत्ययान्तरशून्यया-वृत्त्या उल्लेखयन् स्वस्वरूपतया स्फुटम् विजानीयात् ।

एतम् – on this Atman; अच्छीन्नया – continuously; प्रत्ययान्तरशून्यया-वृत्त्या – without any foreign thought intervening; उल्लेखयन् – reflecting; स्वस्वरूपतया – It to be one’s real self; स्फुटम् – distinctly; विजानीयात् – one must realize.

Reflecting on this Atman continuously and without any foreign thought intervening, one must distinctly realize It to be one’s real self.

अत्रात्मत्वं दृढीकुर्वन्नहमादिषु संत्यजन्।

उदासीनतया तेषु तिष्ठेत्स्फुटघटादिवत्॥ ३८२॥

अत्र आत्मत्वं दृढीकुर्वन् अहमादिषु संत्यजन् स्फुटघटादिवत् तेषु उदासीनतया तिष्ठेत्।

अत्र – in this world; आत्मत्वं – one's identification with the Atman; दृढीकुर्वन् – strengthening; अहमादिषु – that with egoism & the rest; संत्यजन् – giving up; स्फुटघटादिवत् – as if they were trifling things, like a cracked jar or the like; तेषु – for them; उदासीनतया – without any concern; तिष्ठेत् – one must live.

Strengthening one's identification with the Atman, and giving up that with egoism& the rest, one must live in this world without any concern for them, as if they were trifling things, like a cracked jar or the like.

विशुद्धमन्तःकरणं स्वरूपे

निवेश्य साक्षिण्यवबोधमात्रे।

शनैः शनैर्निश्चलतामुपानयन्

पूर्णं स्वमेवानुविलोकयेत्ततः॥ ३८३॥

विशुद्धम् अन्तःकरणं साक्षिणि-अवबोधमात्रे-स्वरूपे निवेश्य शनैः-शनैः निश्चलताम्-उपानयन्

ततः-एव पूर्णं-स्वम् अनु-विलोकयेत्।

विशुद्धम् – the purified; अन्तःकरणं – mind; साक्षिणि-अवबोधमात्रे-स्वरूपे – in the Self, the Witness, the Knowledge Absolute; निवेश्य – fixing; शनैः-शनैः – slowly; निश्चलताम्-उपानयन् – making it still; ततः-एव – then only; पूर्णं-स्वम् – one's own infinite Self; अनु-विलोकयेत् – one must realize.

One must realize one's own infinite Self, by fixing the purified mind in the Self, the Witness, the Knowledge Absolute, first, and then only slowly making it still.

देहेन्द्रियप्राणमनोऽहमादिभिः

स्वाज्ञानक्लृप्तैरखिलैरुपाधिभिः।

विमुक्तमात्मानमखण्डरूपं

पूर्णं महाकाशमिवावलोकयेत्॥ ३८४॥

देह-इन्द्रिय-प्राण-मनः-अहम्-आदिभिः स्व-अज्ञान-क्लृप्तैः अखिलैः उपाधिभिः विमुक्तम् अखण्डरूपं पूर्णं

महाकाशम् इव आत्मानम् अवलोकयेत्।

देह-इन्द्रिय-प्राण-मनः-अहम्-आदिभिः – such as the body, organs, vital-forces, mind, & egoism; स्व-अज्ञान-क्लृप्तैः – which are creation of one's own ignorance; अखिलैः – all; उपाधिभिः – limiting adjuncts; विमुक्तम् – which is free from; अखण्डरूपं – the Indivisible; पूर्णं – Infinite; महाकाशम्-इव – like the sky; आत्मानम् – the Atman; अवलोकयेत् – one should behold.

One should behold the Atman - which is free from all limiting adjuncts such as the body, organs, vital-forces, mind, & egoism, which are creation of one's own ignorance - as the Indivisible & Infinite like the sky.

घटकलशकुसूलसूचिमुख्यैः

गगनमुपाधिशतैर्विमुक्तमेकम्।

भवति न विविधं तथैव शुद्धं

परमहमादिविमुक्तमेकमेव ॥ ३८५ ॥

गगनम् घट-कलश-कुसूल-सूचि-मुख्यैः उपाधिशतैः विमुक्तम् एकम् विविधं न भवति तथा एव

अहम्-आदि-विमुक्तम् शुद्धं परम् एकम् एव ।

गगनम् – the sky; घट-कलश-कुसूल-सूचि-मुख्यैः – such as a jar, a pitcher, a receptacle for grains or a needle; उपाधिशतैः – hundreds of limiting adjuncts; विमुक्तम् – divested of; एकम्-एव – is only one; विविधं-न-भवति – & not diverse; तथा – exactly in a similar way;

अहम्-आदि-विमुक्तम् – when divested of egoism etc.; शुद्धं – the pure; परम् – Brahman/Atman;

एकम्-एव – is verily one.

The sky, divested of hundreds of limiting adjuncts such as a jar, a pitcher, a receptacle for grains or a needle, is only one & not diverse; exactly in a similar way the pure Brahman/Atman, when divested of egoism etc., is verily one.

ब्रह्मादिस्तम्बपर्यन्ता मृषामात्रा उपाधयः ।

ततः पूर्णं स्वमात्मानं पश्येदेकात्मना स्थितम्॥ ३८६ ॥

ब्रह्म-आदि-स्तम्ब-पर्यन्ता उपाधयः मृषामात्राः ततः स्वम्-आत्मानं एक-आत्मना स्थितम् पूर्णं पश्येत्।

ब्रह्म-आदि-स्तम्ब-पर्यन्ता – from Brahma down to a clump of grass; उपाधयः – the limited adjuncts; मृषामात्राः – are wholly unreal; ततः – therefore; स्वम्-पूर्णं-आत्मानं – one's own Infinite Self;

एक-आत्मना-स्थितम् – by being one with the Atman; पश्येत् – one should realize.

The limited adjuncts from Brahma down to a clump of grass are wholly unreal; therefore by being one with the Atman one should realize one's own Infinite Self.

यत्र भ्रान्त्या कल्पितं तद्विवेके

तत्तन्मात्रं नैव तस्माद्विभिन्नम्।

भ्रान्तेर्नाशे भाति दृष्टाहितत्त्वं

रज्जुस्तद्वद्विश्वमात्मस्वरूपम्॥ ३८७ ॥

यत्र भ्रान्त्या-कल्पितं तत् तद्-विवेके तत्-मात्रं तस्मात्-विभिन्नम्-न-एव, भ्रान्तेः-नाशे दृष्ट-अहितत्त्वं

रज्जुः-भाति, तद्वत् विश्वम् आत्मस्वरूपम् ।

यत्र – in which; भ्रान्त्या-कल्पितं – something is imagined to exist through error; तत् – that; तद्-विवेके – when rightly discriminated about it; तत्-मात्रं – that thing itself; तस्मात्-विभिन्नम्-न-एव – and not distinct from it; भ्रान्तेः-नाशे – when the error is gone; दृष्ट-अहितत्त्वं – the reality about the snake falsely perceived; रज्जुः-भाति – becomes the rope; तद्वत् – similarly; विश्वम् – the universe; आत्मस्वरूपम् – is in reality the Atman.

That in which something is imagined to exist through error, is, when rightly discriminated about it, that thing itself, and not distinct from it. When the error is gone the reality about the snake falsely perceived becomes the rope; similarly the universe is in reality the Atman.

स्वयं ब्रह्मा स्वयं विष्णुः स्वयमिन्द्रः स्वयं शिवः ।

स्वयं विश्वमिदं सर्वं स्वस्मादन्यन्न किञ्चन ॥ ३८८ ॥

स्वयं ब्रह्मा स्वयं विष्णुः स्वयं इन्द्रः स्वयं शिवः, स्वयं इदं सर्वं विश्वं, स्वस्मात् अन्यत् न किञ्चन ।

स्वयं – the Self is; ब्रह्मा – Brahma; स्वयं – the Self is; विष्णुः – Vishnu; स्वयं – the Self is; इन्द्रः – Indra; स्वयं – the Self is; शिवः – Shiva; स्वयं – the Self is; इदं – this; सर्वं – entire; विश्वं – universe; स्वस्मात्-अन्यत् – except the Self; न-किञ्चन – nothing exists.

The Self is Brahma, the Self is Vishnu, the Self is Indra, the Self is Shiva, the Self is this entire universe; nothing exists except the Self.

अन्तः स्वयं चापि बहिः स्वयं च

स्वयं पुरस्तात् स्वयमेव पश्चात् ।

स्वयं ह्यावाच्यां स्वयमप्युदीच्यां

तथोपरिष्टात्स्वयमप्यधस्तात् ॥ ३८९ ॥*

अन्तः स्वयं च बहिः आपि स्वयं च, स्वयं पुरस्तात् स्वयम् एव पश्चात्, स्वयं हि अवाच्यां स्वयम् अपि उदीच्यां तथा स्वयम् अपि उपरिष्टात् अधस्तात् ।

अन्तः – within; स्वयं – the self is; च – and; बहिः – without; आपि – also; स्वयं – the self is; च – as well as; स्वयं – the self is; पुरस्तात् – before; स्वयं – the self is; एव – too; पश्चात् – behind; स्वयं – the self is; अवाच्यां – in the south; स्वयम् – the self is; अपि – as well; उदीच्यां – in the north; तथा – so also; स्वयम्-हि – the self Itself is; अपि – moreover; उपरिष्टात् – above; अधस्तात् – bellow.

The self is within moreover the self is without; the self is before as well as the self is behind; the self is in the south as well the self is in the north too; so also the self Itself is above and below also.

तरङ्गफेनभ्रमबुद्बुदादि

सर्वं स्वरूपेण जलं यथा तथा ।

चिदेव देहाद्यहमन्तमेतत्

सर्वं चिदेवैकरसं विशुद्धम् ॥ ३९० ॥

यथा तरङ्ग-फेन-भ्रम-बुद्बुदादि सर्वं स्वरूपेण जलं तथा देह-आदि-अहम्-अन्तं चित् एव एतत् सर्वं विशुद्धम् एकरसं चित् एव ।

यथा – as; तरङ्ग-फेन-भ्रम-बुद्बुद्-आदि – the wave, the foam, the whirlpool, the bubble, etc. are; सर्वं – all; स्वरूपेण – in essence; जलं – but water; तथा – similarly; देह-आदि-अहम्-अन्तं – from the body up to egoism; चित् – the Knowledge Absolute/*Cit;* एव – Itself; एतत् – is all this; सर्वं –

everything; विशुद्धम् – pure; एकरसं – homogeneous; चित् – the Knowledge Absolute/*Cit*; एव – is verily.

As the wave, the foam, the whirlpool, the bubble, etc. are all in essence but water, similarly the Knowledge Absolute/*Cit* Itself is all this, from the body up to egoism. Everything is verily the Knowledge Absolute/*Cit* pure & homogeneous.

सदेवेदं सर्वं जगदवगतं वाङ्मनसयोः

सतोऽन्यन्नास्त्येव प्रकृतिपरसीम्नि स्थितवतः।

पृथक् किं मृत्स्नायाः कलशघटकुम्भाद्यवगतं

वदत्येष भ्रान्तस्त्वमहमिति मायामदिरया ॥ ३९१ ॥

वाङ्-मनसयोः अवगतं इदं-सर्व-जगत् सत्-एव, प्रकृति-परसीम्नि स्थितवतः सतः अन्यत् न अस्ति एव।

कलश-घट-कुम्भादि अवगतं मृत्स्नायाः किं पृथक् ? एषः माया-मदिरया भ्रान्तः, 'त्वम्,अहम्' इति वदति।

वाङ्-मनसयोः – through speech & mind; अवगतं – known; इदं-सर्व-जगत् – this entire universe; सत्-एव–is Brahman Itself; प्रकृति-परसीम्नि-स्थितवतः – that which exists beyond utmost range of nature; सतः-अन्यत्-न-अस्ति-एव – there is nothing besides Brahman; मृत्स्नायाः-कलश-घट-कुम्भादि – the pitcher, jug, jar etc. which are made from the clay; किं-पृथक्-अवगतं – are known to be distinct from it; एषः-भ्रान्तः – it is the deluded man who; माया-मदिरया – as an effect of the wine of Maya; 'त्वम्-अहम्' – 'you' & 'I' इति-वदति – who talks of;

This entire universe known through speech & mind is Brahman Itself; there is nothing besides Brahman which exists beyond utmost range of nature. Are the pitcher, jug, jar etc. which are made from the clay known to be distinct from it? It is the deluded man who talks of 'you' & 'I' as an effect of the wine of Maya.

क्रियासमभिहारेण यत्र नान्यदिति श्रुतिः।

ब्रवीति द्वैतराहित्यं मिथ्याध्यासनिवृत्तये ॥ ३९२ ॥

श्रुतिः क्रिया-समभिहारेण 'यत्र अन्यत् न' इति ब्रवीति, मिथ्या-अध्यास-निवृत्तये द्वैतराहित्यं।

श्रुतिः – the Vedas; क्रिया-समभिहारेण – by an accumulation of verbs; 'यत्र अन्यत् न' – 'where one sees nothing else,' इति – in the passage; ब्रवीति – declares; मिथ्या-अध्यास-निवृत्तये – in order to remove the false superimposition; द्वैतराहित्यं – the absence of dulity.

The Vedas in the passage, 'where one sees nothing else,' etc., declares by an accumulation of verbs the absence of duality, in order to remove the false superimposition.

आकाशवन्निर्मलनिर्विकल्पं

निःसीमनिःस्पन्दननिर्विकारम्।

अन्तर्बहिःशून्यमनन्यमद्वयं

स्वयं परं ब्रह्म किमस्ति बोध्यम्॥ ३९३ ॥

आकाशवत् निर्मल-निर्विकल्पं निःसीम निःस्पन्दन निर्विकारम् अन्तर्बहिः शून्यम् अनन्यम् अद्वयं परं ब्रह्म स्वयं, किम् बोध्यम् अस्ति।

आकाशवत् – is like the sky; निर्मल – pure; निर्विकल्पं – absolute; निःसीम – infinite; निःस्पन्दन – motionless; निर्विकारम् – changeless; अन्तर्बहिः-शून्यम् – devoid of interior or exterior; अनन्यम् – the one existence; अद्वयं – without a second; परं – the Supreme; ब्रह्म – Brahman; स्वयं – is one's own self; किम्-अस्ति – is there any other; बोध्यम् – object of knowledge.

The Supreme Brahman is like the sky, pure, absolute, infinite, motionless, and changeless, devoid of interior or exterior, the one existence, without a second, and is one's own self. Is there any other object of knowledge?

वक्तव्यं किमु विद्यतेऽत्र बहुधा ब्रह्मैव जीवः स्वयं
ब्रह्मैतज्जगदाततं नु सकलं ब्रह्माद्वितीयं श्रुतिः ।
ब्रह्मैवाहमिति प्रबुद्धमतयः संत्यक्तबाह्याः स्फुटं
ब्रह्मीभूय वसन्ति सन्ततचिदानन्दात्मनैतद्ध्रुवम्॥ ३९४ ॥**

जीवः स्वयं ब्रह्म एव । अत्र बहुधा किमु वक्तव्यं विद्यते? एतत् आततं सकलं जगत् नु ब्रह्म । श्रुतिः अद्वितीयं ब्रह्म । 'अहम् ब्रह्म एव' इति प्रबुद्धमतयः संत्यक्तबाह्याः स्फुटं ब्रह्मीभूय सन्ततचिदानन्दात्मना वसन्ति एतद् ध्रुवम् ।

जीवः – this Soul; स्वयं-एव – is Itself; ब्रह्म – Brahman; अत्र – than this; बहुधा – more; किमु – what; वक्तव्यं-विद्यते – shall I speak; एतत्-आततं-जगत् – this whole extended universe; सकलं-नु-ब्रह्म – everything in reality is Brahman only; श्रुतिः – scriptures/the Vedas inculcates; अद्वितीयं – without a second; ब्रह्म – the Brahman; 'अहम्-ब्रह्म-एव' – 'I am the Brahman' इति-प्रबुद्धमतयः – he who realizes like; संत्यक्तबाह्याः – giving up his connection with the objective world; ब्रह्मीभूय – being & becoming Brahman; सन्तत-चित्-आनन्द-आत्मना – enjoying eternal Knowledge & Bliss; स्फुटं-वसन्ति – lives palpably; एतद्-ध्रुवम् – this is certain beyond any doubt.

What more shall I speak than this – that this Soul is Brahman Itself. This whole extended universe everything in reality is Brahman only. Scriptures/the Vedas inculcates the Brahman without a second. He who realizes like 'I am Brahman', giving up his connection with the objective world, lives palpably enjoying eternal Knowledge & Bliss. This is certain beyond any doubt.

जहि मलमयकोशेऽहंधियोत्थापिताशां
प्रसभमनिलकल्पे लिङ्गदेहेऽपि पश्चात्।
निगमगदितकीर्तिं नित्यमानन्दमूर्तिं
स्वयमिति परिचीय ब्रह्मरूपेण तिष्ठ ॥ ३९५ ॥

मलमयकोशे अहंधिया उत्थापिताशां जहि पश्चात् अनिलकल्पे लिङ्गदेहे अपि प्रसभम्, निगम-गदित-कीर्तिं नित्यम्-आनन्दमूर्तिं स्वयम् इति परिचीय ब्रह्मरूपेण तिष्ठ ।

मलमयकोशे – in this filthy gross body; अहंधिया – by egoism; उत्थापिताशां – the hopes raised; जहि – destroy; पश्चात् – then; अनिलकल्पे-लिङ्गदेहे – with air-like subtle-body; अपि – even; प्रसभम् – do the same forcibly; निगम-गदित-कीर्तिं – whose glories proclaims the scriptures/the Vedas;

नित्यम्-आनन्दमूर्तिं – the embodiment of eternal Bliss; स्वयम् – yourself; इति – as; परिचीय – realizing; ब्रह्मरूपेण – as Brahman; तिष्ठ – live.

Destroy the hopes raised by egoism in this filthy gross body, then even with air-like subtle-body do the same forcibly, and realizing yourself as the embodiment of eternal Bliss - whose glories proclaims the scriptures/the Vedas - live as Brahman.

शवाकारं यावद्भजति मनुजस्तावदशुचिः

परेभ्यः स्यात्क्लेशो जननमरणव्याधिनिलयः ।

यदात्मानं शुद्धं कलयति शिवाकारमचलम्

तदा तेभ्यो मुक्तो भवति हि तदाह श्रुतिरपि ॥ ३९६ ॥

यावद् मनुजः शवाकारं भजति तावद् अशुचिः जनन-मरण-व्याधि-निलयः परेभ्यः क्लेशः स्यात् ।

यदा अत्मानं शिवाकारम् अचलम् शुद्धं कलयति तदा हि तेभ्यः मुक्तः भवति । श्रुतिः अपि तद् आह ।

यावद्-तावद् – so long as; मनुजः – man; शवाकारं – for this corpus like body; भजति – has any regard; अशुचिः – he is impure; जनन-मरण-व्याधि-निलयः – as also from birth, death, and disease; परेभ्यः – from his enemies; क्लेशः-स्यात् – suffers; यदा-तदा – but when; शिवाकारम्-अचलम् – as the essence of Good & immovable; शुद्धं – as pure; आत्मानं – himself; कलयति –he think of; तेभ्यः – from them; मुक्तः – free; भवति-हि – he assuredly becomes; श्रुतिः – the Vedas/Srutis; अपि – also; तद्-आह – says that.

So long as man has any regard for this corpus like body, he is impure, and suffers from his enemies as also from birth, death, and disease; but when he think of himself as pure, as the essence of Good & immovable, he assuredly becomes free from them; the Vedas/Srutis also says that.

स्वात्मन्यारोपिताशेषाभासवस्तुनिरासतः ।

स्वयमेव परं ब्रह्म पूर्णमद्वयमक्रियम् ॥ ३९७ ॥

स्वात्मनि आरोपित-अशेष-आभास-वस्तु-निरासतः पूर्णम् अद्वयम् अक्रियम् परं ब्रह्म स्वयम् एव ।

स्वात्मनि – on the soul; आरोपित – superimposed; अशेष – of all; आभास-वस्तु – apparent existence; निरासतः – by the elimination; पूर्णम् – Infinite; अद्वयम्-अक्रियम् – the One without second & beyond action; परं – the supreme; ब्रह्म – Brahman; स्वयम्-एव – remains as Itself.

By the elimination of all apparent existence superimposed on the soul, the supreme Brahman, Infinite, the One without second & beyond action, remains as Itself.

समाहितायां सति चित्तवृत्तौ

परात्मनि ब्रह्मणि निर्विकल्पे ।

न दृश्यते कश्चिदयं विकल्पः

प्रजल्पमात्रः परिशिष्यते यतः ॥ ३९८ ॥

चित्तवृत्तौ निर्विकल्पे परात्मनि सति ब्रह्मणि समाहितायां अयं विकल्पः कश्चित् न दृश्यते ।

यतः प्रजल्पमात्रः परिशिष्यते ।

चित्तवृत्तौ – the mind functions; निर्विकल्पे – the Absolute; परात्मनि – in the Supreme-Self; सति – when; ब्रह्मणि – the Brahman; समाहितायां – are merged; न-अयं – none of this; विकल्पः – phenomenal world; कश्चित्-दृश्यते – is seen; यतः – whence; प्रजल्पमात्रः – mere talk; परिशिष्यते – it reduces to.

When the mind functions are merged in the Supreme-Self, the Brahman, the Absolute, none of this phenomenal world is seen, whence it reduces to mere talk.

असत्कल्पो विकल्पोऽयं विश्वमित्येकवस्तुनि ।

निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ ३९९ ॥

एक-वस्तुनि 'विश्वम्'-इति-अयं-विकल्पः असत्कल्पः । निर्विकारे निराकारे निर्विशेषे एकवस्तुनि भिदा कुतः?

एक-वस्तुनि – in the One Entity (Brahman); 'विश्वम्'-इति-अयं-विकल्पः – the concept of the universe; असत्कल्पः – is mere phantom; निर्विकारे-निराकारे-निर्विशेषे – in that which is changeless, formless & Absolute; भिदा-कुतः – whence can there be any diversity.

In the One Entity (Brahman) the concept of the universe is mere phantom. Whence can there be any diversity in that which is changeless, formless & Absolute?

द्रष्टृदर्शनदृश्यादिभावशून्यैकवस्तुनि ।

निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ ४०० ॥

द्रष्टृ-दर्शन-दृश्यादि-भाव-शून्य-एक-वस्तुनि निर्विकारे-निराकारे-निर्विशेषे भिदा-कुतः?

द्रष्टृ-दर्शन-दृश्यादि-भाव-शून्य-एक-वस्तुनि – in One Entity devoid of the concepts of seer, seeing & seen; निर्विकारे-निराकारे-निर्विशेषे – which is changeless, formless, & Absolute; भिदा-कुतः – whence can there be any diversity.

In One Entity devoid of the concepts of seer, seeing & seen, which is changeless, formless, & Absolute; whence can there be any diversity.

कल्पार्णव इवात्यन्तपरिपूर्णैकवस्तुनि ।

निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ ४०१ ॥

कल्पार्णव-इव अत्यन्त-परिपूर्णैकवस्तुनि निर्विकारे-निराकारे-निर्विशेषे भिदा-कुतः ?

कल्पार्णव-इव – motionless like the ocean after the dissolution of the universe; अत्यन्त-परिपूर्णः – which is perfectly all-pervading; एकवस्तुनि – in the one entity; निर्विकारे-निराकारे-निर्विशेषे – which is changeless, formless, & Absolute; भिदा-कुतः – whence can there be any diversity.

In the one entity which is changeless, formless, & Absolute, and which is perfectly all-pervading and motionless like the ocean after the dissolution of the universe, whence can there be any diversity?

तेजसीव तमो यत्र प्रलीनं भ्रान्तिकारणम् ।

अद्वितीये परे तत्त्वे निर्विशेषे भिदा कुतः ॥ ४०२ ॥

तेजसि-तमः-इव भ्रान्तिकारणम् प्रलीनं यत्र अद्वितीय-निर्विशेष-परे-तत्त्वे भिदा-कुतः ?

तेजसि-तमः-इव – like darkness in light; भ्रान्तिकारणम् – the root of delusion; प्रलीनं – is dissolved; यत्र – where; अद्वितीये-निर्विशेष-परे-तत्त्वे – in the Supreme Reality, the One without a second, the Absolute; भिदा-कुतः – whence can there be any diversity.

Where the root of delusion is dissolved like darkness in light - like darkness in light - in the Supreme Reality, the One without a second, and the Absolute – whence can there be any diversity?

एकात्मके परे तत्त्वे भेदवार्ता कथं वसेत्।

सुषुप्तौ सुखमात्रायां भेदः केनावलोकितः ॥ ४०३ ॥

एक-आत्मके परे तत्त्वे भेदवार्ता कथं वसेत् ? सुखमात्रायां सुषुप्तौ भेदः केन अवलोकितः ?

एक-आत्मके – which is one & homogeneous; परे तत्त्वे – the Supreme Reality; भेदवार्ता – the talk of diversity; कथं – how can; वसेत् – apply to; सुखमात्रायां – in the unmixed bliss; सुषुप्तौ – of the state of profound sleep; भेदः – diversity; केन – who has; अवलोकितः – ever observed.

How can the talk of diversity apply to the Supreme Reality which is one & homogeneous? Who has ever observed diversity in the unmixed bliss of the state of profound sleep?

न ह्यस्ति विश्वं परतत्त्वबोधात्

सदात्मनि ब्रह्मणि निर्विकल्पे।

कालत्रये नाप्यहिरीक्षितो गुणे

न ह्यम्बुबिन्दुर्मृगतृष्णिकायाम् ॥ ४०४ ॥*

परतत्त्वबोधात् सदात्मनि-निर्विकल्पे-ब्रह्मणि विश्वं न हि अस्ति । गुणे ईक्षितः अहिः कालत्रये अपि न मृगतृष्णिकायाम् अम्बुबिन्दुः हि न।

परतत्त्वबोधात् – in that realization of the highest Truth; सदात्मनि-निर्विकल्पे-ब्रह्मणि – in the Absolute Brahman, the essence of Existence; विश्वं – the universe; न-हि-अस्ति – does not exist; गुणे – in the rope; ईक्षितः-अहिः – is the snake ever existed; कालत्रये-अपि-न – in none of the three states of time; मृगतृष्णिकायाम् – in the mirage; अम्बुबिन्दुः – a drop of water; हि-न – nor.

In that realization of the highest Truth, the universe does not exist in the Absolute Brahman, the essence of Existence. In none of the three states of time is the snake ever existed in the rope, nor a drop of water in the mirage.

मायामात्रमिदं द्वैतमद्वैतं परमार्थतः।

इति ब्रूते श्रुतिः साक्षात्सुषुप्तावनुभूयते ॥ ४०५ ॥*

इदं द्वैतम् मायामात्रम् अद्वैतं परमार्थतः इति ब्रूते श्रुतिः। सुषुप्तौ साक्षात् अनुभूयते।

इदं – this; द्वैतम् – dualistic universe; मायामात्रम् – is but a delusion; अद्वैतं-परमार्थतः – Non-duality alone is the Absolute Truth; इति – that; ब्रूते – declare; श्रुतिः – the Srutis/Vedas or Upnishadas; सुषुप्तौ – in the state of deep-sleep; साक्षात् – directly; अनुभूयते – it is experienced.

The Srutis/Vedas or Upnishadas declare that, this dualistic universe is but a delusion, Non-duality alone is the Absolute Truth; it is directly experienced in the state of deep-sleep.

अनन्यत्वमधिष्ठानादारोप्यस्य निरीक्षितम्।

पण्डितै रज्जुसर्पादौ विकल्पो भ्रान्तिजीवनः॥ ४०६॥

पण्डितैः रज्जु-सर्पादौ आरोप्यस्य अधिष्ठानात्-अनन्यत्वम् निरीक्षितम्, विकल्पः भ्रान्ति-जीवनः।

पण्डितैः – by the wise; रज्जु-सर्पादौ – as in the case of snake appearing on the rope; आरोप्यस्य – that which is superimposed on something else; अधिष्ठानात्-अनन्यत्वम् – to identical its substratum; निरीक्षितम् – is observed; विकल्पः – the apparent superimposition; भ्रान्ति-जीवनः – exists only due to delusion.

That which is superimposed on something else as in the case of snake appearing on the rope, is observed by the wise to identical its substratum; the apparent superimposition exists only due to delusion.

चित्तमूलो विकल्पोऽयं चित्ताभावे न कश्चन।

अतश्चित्तं समाधेहि प्रत्यग्रूपे परात्मनि॥ ४०७॥

अयं विकल्पः चित्तमूलः चित्ताभावे-न-कश्चन। अतः प्रत्यक्-रूपे परात्मनि चित्तं समाधेहि।

अयं – this; विकल्पः – apparent universe; चित्तमूलः – has its root in the mind; चित्ताभावे-न-कश्चन – never persists after the mind is annihilated; अतः – therefore; प्रत्यक्-रूपे – which is your inmost Essence; परात्मनि-समाधेहि – dissolve by concentrating it on the supreme-Self; चित्तं – the mind.

This apparent universe has its root in the mind, and never persists after the mind is annihilated; therefore dissolve the mind by concentrating it on the supreme-Self which is your inmost Essence.

किमपि सततबोधं केवलानन्दरूपं

निरुपममतिवेलं नित्यमुक्तं निरीहम्।

निरवधिगगनाभं निष्कलं निर्विकल्पं

हृदि कलयति विद्वान् ब्रह्म पूर्णं समाधौ॥ ४०८॥

किम्-अपि सततबोधं केवल-आनन्दरूपं निरुपमम् अतिवेलं नित्यमुक्तं निरीहम् निरवधि-गगनाभं निष्कलं निर्विकल्पं पूर्णं-ब्रह्म, विद्वान् समाधौ हृदि-कलयति।

किम्-अपि – which is something of nature of; सततबोधं – eternal Knowledge; केवल-आनन्दरूपं – absolute Bliss; निरुपमम् – which has no exemplar; अतिवेलं – which transcends all limitations; नित्यमुक्तं – is ever free; निरीहम् – without activity; निरवधि-गगनाभं – which is like limitless sky; निष्कलं – indivisible; निर्विकल्पं – absolute; पूर्णं-ब्रह्म – the Infinite Brahman; विद्वान् – the wise man; समाधौ – during deep-meditation; हृदि-कलयति – realizes in his heart.

The wise man realizes in his heart, during deep-meditation, the Infinite Brahman, which is something of nature of eternal Knowledge & absolute Bliss, which has no exemplar, which transcends all limitations, is ever free & without activity, and which is like limitless sky, indivisible, & absolute.

प्रकृतिविकृतिशून्यं भावनातीतभावं
समरसमसमानं मानसम्बन्धदूरम्।
निगमवचनसिद्धं नित्यमस्मत्प्रसिद्धं
हृदि कलयति विद्वान् ब्रह्म पूर्णं समाधौ ॥ ४०९ ॥

प्रकृति-विकृतिशून्यं भावना-अतीत-भावं समरसम् असमानं मान-सम्बन्धदूरम् निगम-वचन-सिद्धं नित्यम् अस्मत्-प्रसिद्धं पूर्णं-ब्रह्म, विद्वान् समाधौ हृदि-कलयति।

प्रकृति-विकृतिशून्यं – which is devoid of the ideas of cause & effect; भावना-अतीत-भावं – which is the Reality beyond all imaginations; समरसम् – homogeneous; असमानं – matchless; मान-सम्बन्धदूरम् – beyond the range of proofs; निगम-वचन-सिद्धं – established by the pronouncements of the Vedas; नित्यम्-अस्मत्-प्रसिद्धं – ever familiar to us as the sense of the ego; पूर्णं-ब्रह्म – the Infinite Brahman; विद्वान् – the wise man; समाधौ – during deep-meditation; हृदि-कलयति – realizes in his heart.

The wise man realizes in his heart, during deep-meditation, the Infinite Brahman, which is devoid of the ideas of cause & effect, which is the Reality beyond all imaginations, homogeneous, matchless, beyond the range of proofs, established by the pronouncements of the Vedas, and ever familiar to us as the sense of the ego.

अजरममरमस्ताभाववस्तुस्वरूपं
स्तिमितसलिलराशिप्रख्यमाख्याविहीनम्।
शमितगुणविकारं शाश्वतं शान्तमेकं
हृदि कलयति विद्वान् ब्रह्म पूर्णं समाधौ ॥ ४१० ॥

अजरम् अमरम् अस्त-अभाव-वस्तु-स्वरूपं स्तिमित-सलिल-राशि-प्रख्यम् आख्या-विहीनम् शमित-गुणविकारं शाश्वतं शान्तमं एकं पूर्णं-ब्रह्म, विद्वान् समाधौ हृदि-कलयति।

अजरम्-अमरम् – which is undecaying & immortal; अस्त-अभाव-वस्तु-स्वरूपं – the positive Entity which precludes all negations; स्तिमित-सलिल-राशि-प्रख्यम्-आख्या-विहीनम् – which resembles the placid ocean, & is without a name; शमित-गुणविकारं – in which there are neither merits nor demerits; शाश्वतं-शान्तमं-एकं – which is eternal, pacified, & One; पूर्णं-ब्रह्म – the Infinite Brahman; विद्वान् – the wise man; समाधौ – during deep-meditation; हृदि-कलयति – realizes in his heart.

The wise man realizes in his heart, during deep-meditation, the Infinite Brahman, which is undecaying & immortal, the positive Entity which precludes all negations, which resembles the placid ocean, & is without a name, in which there are neither merits nor demerits, and which is eternal, pacified, & One

समाहितान्तःकरणः स्वरूपे

विलोकयात्मानमखण्डवैभवम्।

विच्छिन्द्धि बन्धं भवगन्धगन्धितं

यत्नेन पुंस्त्वं सफलीकुरुष्व ॥४११॥

समाहित-अन्तःकरणः स्वरूप अखण्डवैभवम् आत्मानम् विलोकय, भव-गन्ध-गन्धितं बन्धं विच्छिन्द्धि,

यत्नेन पुंस्त्वं सफलीकुरुष्व ।

समाहित-अन्तःकरणः – with the mind restrained in deep-meditation; स्वरूपे – in yourself; अखण्डवैभवम् – of infinite glory; आत्मानम् – the Atman; विलोकय – beholding; भव-गन्ध-गन्धितं – strengthened by the impressions of previous births; बन्धं – your bondage; विच्छिन्द्धि – cut off; यत्नेन – carefully; पुंस्त्वं-सफलीकुरुष्व – attain the consummation of your birth as human being.

With the mind restrained in deep-meditation, beholding in yourself the Atman of infinite glory, cut off your bondage strengthened by the impressions of previous births, and carefully attain the consummation of your birth as human being.

सर्वोपाधिविनिर्मुक्तं सच्चिदानन्दमद्वयम्।

भावयात्मानमात्मस्थं न भूयः कल्पसेऽध्वने ॥ ४१२ ॥

सर्व-उपाधि-विनिर्मुक्तं सच्चिदानन्दम् अद्वयम् आत्मानम् आत्मस्थं भावय, भूयः अध्वने न कल्पसे ।

सर्व-उपाधि-विनिर्मुक्तं – which is devoid of all limiting adjuncts; सच्चिदानन्दम् – the Existence-Knowledge-Bliss Absolute; अद्वयम् – the one without second; आत्मानम् – the Atman; आत्मस्थं – which resides in you; भावय – meditate on; भूयः-अध्वने-न-कल्पसे – never, you will come again under the sway of births and deaths.

Meditate on the Atman, which resides in you, which is devoid of all limiting adjuncts, the Existence-Knowledge-Bliss Absolute, the one without second; and never, you will come again under the sway of births and deaths.

छायेव पुंसः परिदृश्यमान-

माभासरूपेण फलानुभूत्या ।

शरीरमाराच्छववन्निरस्तं

पुनर्न संधत्त इदं महात्मा ॥ ४१३ ॥

पुंसः छाया इव फलानुभूत्या आभासरूपेण परिदृश्यमान शववत् आरात् निरस्तं इदं शरीरम् महात्मा पुनः संधत्ते न ।

पुंसः – of a man; छाया – the shadow; इव – like; फलानुभूत्या – owing to the experience of the effects of past deeds; आभासरूपेण – as an appearance; परिदृश्यमान – though it is visible; शववत् – like a corpas; आरात् – to a distance; निरस्तं – has once been cast off; *इदं* – this; शरीरम् – the body; महात्मा – the sage; पुनः – after; संधत्ते – attaches himself to it; न – never *more*;

After this body has once been cast off to a distance like a corpse, the sage never *more* attaches himself to it, though it is visible as an appearance, like the shadow of a man, owing to the experience of the effects of past deeds.

सततविमलबोधानन्दरूपं समेत्य

त्यज जडमलरूपोपाधिमेतं सुदूरे ।

अथ पुनरपि नैष स्मर्यतां वान्तवस्तु

स्मरणविषयभूतं कल्पते कुत्सनाय ॥ ४१४ ॥

सतत-विमल-बोध-आनन्दरूपं समेत्य एतं जड-मल-रूप-उपाधिं सुदूर-त्यज । अथ एषः स्मर्यतां पुनःअपि न, वान्तवस्तु स्मरणविषयभूतं कुत्सनाय-कल्पते ।

सतत-विमल-बोध-आनन्दरूपं – the eternal, pure Knowledge & Bliss; समेत्य – realizing the Atman; एतं – this; जड-मल-रूप-उपाधिं – limitations of a body, which is inert & filthy by nature; सुदूर-त्यज – throw away; अथ – for; एषः-स्मर्यतां-अपि-न – remember it no more; पुनः – then; वान्तवस्तु – something that has been omitted; स्मरणविषयभूतं-कुत्सनाय-कल्पते – excites but disgust when called to memory.

Realizing the Atman, the eternal, pure Knowledge & Bliss, throw away this limitations of a body, which is inert & filthy by nature; then remember it no more, for something that has been omitted excites but disgust when called to memory.

समूलमेतत्परिदाह्य वन्हौ

सदात्मनि ब्रह्मणि निर्विकल्पे ।

ततः स्वयं नित्यविशुद्धबोधा-

नन्दात्मना तिष्ठति विद्वरिष्ठः ॥ ४१५ ॥ *विद्वदरिष्ठः*

एतत् समूलं, निर्विकल्पे सदात्मनि ब्रह्मणि वन्हौ परिदाह्य ततः विद्वरिष्ठः स्वयं नित्य-विशुद्ध-बोध-आनन्द-आत्मना तिष्ठति ।

एतत् – all this; समूल – with its very root; निर्विकल्पे-सदात्मनि-ब्रह्मणि – of Brahman, the Eternal & Absolute Self; वन्हौ – in the fire; परिदाह्य – burning; ततः – thereafter; विद्वरिष्ठः – the truly wise man; स्वयं – himself; नित्य-विशुद्ध-बोध-आनन्द-आत्मना – as the Atman, the eternal, pure Knowledge & Bliss; तिष्ठति – remains.

Burning all this, with its very root, in the fire of Brahman, the Eternal & Absolute Self, the truly wise man thereafter remains himself as the Atman, the eternal, pure Knowledge & Bliss.

प्रारब्धसूत्रग्रथितं शरीरं

प्रयातु वा तिष्ठतु गोरिव स्रक् ।

न तत्पुनः पश्यति तत्त्ववेत्ता-

ऽऽनन्दात्मनि ब्रह्मणि लीनवृत्तिः ॥ ४१६ ॥

प्रारब्धसूत्रग्रथितं शरीरं प्रयातु वा तिष्ठतु गोः स्रक् इव, तत्त्ववेत्ता तत् पुनः न पश्यति, आनन्द-आत्मनि ब्रह्मणि लीनवृत्तिः ।

प्रारब्ध-सूत्रग्रथितं – spun by the threads of the resultant of past work that has led to the present birth; शरीरं – this body; प्रयातु – falls; वा – or; तिष्ठतु – remains; गोः-स्रक्-इव – like the garland on a cow; तत्त्ववेत्ता – the knower of Truth; तत्-पुनः-न-पश्यति – does no more care whether; आनन्द-आत्मनि – the essence of Bliss; ब्रह्मणि – the Brahman; लीनवृत्तिः – for his mind functions are at rest in.

The knower of Truth does no more care whether this body, spun by the threads of the resultant of past work that has led to the present birth, falls or remains like the garland on a cow; for his mind functions are at rest in the Brahman, the essence of Bliss.

अखण्डानन्दमात्मानं विज्ञाय स्वस्वरूपतः ।

किमिच्छन् कस्य वा हेतोर्देहं पुष्णाति तत्त्ववित् ॥ ४१७ ॥

अखण्ड-आनन्दम् आत्मानं स्व-स्वरूपतः विज्ञाय किम् इच्छन् वा कस्य हेतोः तत्त्ववित् देहं पुष्णाति ?

अखण्ड-आनन्दम् – the infinite Bliss; आत्मानं – the Atman; स्व-स्वरूपतः – as his very Self; विज्ञाय – realizing; किम्-इच्छन् – with what object; वा – or; कस्य-हेतोः – for whom; तत्त्ववित् – the knower of Truth; देहं – the body; पुष्णाति – should cherish.

Realizing the Atman the infinite Bliss, as his very Self, with what object, or for whom, should the knower of Truth cherish the body.

संसिद्धस्य फलं त्वेतज्जीवन्मुक्तस्य योगिनः ।

बहिरन्तः सदानन्दरसास्वादनमात्मनि ॥ ४१८ ॥

संसिद्धस्य जीवन्मुक्तस्य योगिनः सदा आत्मनि अन्तः बहिः आनन्द-रस-आस्वादनम् एतत् तु फलं ।

संसिद्धस्य-जीवन्मुक्तस्य-योगिनः – the yogin/Self-controlled one who has attained perfection & is liberated in life; आत्मनि – in his mind; अन्तः बहिः – internally as well as externally; सदा-आनन्द-रस-आस्वादनम् – he enjoys eternal Bliss; एतत्-तु-फलं – gets this result.

The yogin/Self-controlled one, who has attained perfection & is, liberated in life gets this result - he enjoys eternal Bliss in his mind, internally as well as externally.

वैराग्यस्य फलं बोधो बोधस्योपरतिः फलम् ।

स्वानन्दानुभवाच्छान्तिरेषैवोपरतेः फलम् ॥ ४१९ ॥

वैराग्यस्य फलं बोधः, बोधस्य फलम् उपरतिः, स्व-आनन्द-अनुभवात् शान्तिः एषः एव उपरतेः फलम ।

वैराग्यस्य – of dispassion; फलं – the result; बोधः – is knowledge; बोधस्य – of knowledge; फलम् – (the result)-that; उपरतिः – is withdrawal from sense-pleasure; स्व-आनन्द-अनुभवात्-शान्तिः – the experience of the Bliss of the Self, whence follows peace; एषः-एव-उपरतेः-फलम – (the result of withdrawal from sense-pleasure)-which leads to.

The result of dispassion is knowledge, that is withdrawal from sense-pleasure, which leads to the experience of the Bliss of the Self, whence follows peace.

यद्युत्तरोत्तराभावः पूर्वपूर्वन्तु निष्फलम् ।

निवृत्तिः परमा तृप्तिरानन्दोऽनुपमः स्वतः ॥ ४२० ॥

यदि उत्तर-उत्तर-अभावः पूर्व-पूर्वं तु निष्फलम् ।निवृत्तिः परमा तृप्तिः अनुपमः आनन्दः स्वतः ।

यदि – if there is; उत्तर-उत्तर-अभावः – an absence of the succeeding stages; पूर्व-पूर्व – the prceding ones; तु-निष्फलम् – are futile; निवृत्तिः – the cessation of the objective world; परमा – extreme; तृप्तिः – satisfaction; अनुपमः – matchless; आनन्दः – bliss; स्वतः – itself (follow as a matter of course).

If there is an absence of the succeeding stages, the preceding ones are futile; (but when the series is perfect) the cessation of the objective world, extreme satisfaction, and matchless bliss itself (follow as a matter of course).

दृष्टदुःखेष्वनुद्वेगो विद्यायाः प्रस्तुतं फलम्।

यत्कृतं भ्रान्तिवेलायां नाना कर्म जुगुप्सितम्।

पश्चान्नरो विवेकेन तत्कथं कर्तुमर्हति ॥ ४२१ ॥

दृष्टदुःखेषु अनुद्वेगः विद्यायाः प्रस्तुतं फलम्। भ्रान्ति-वेलायां यत् नाना जुगुप्सितम् कर्म कृतं, तत् पश्चात् विवेकेन नरः कथं कर्तुम् अर्हति ?

दृष्टदुःखेषु – by earthly troubles; अनुद्वेगः – being unruffled; विद्यायाः – by knowledge; प्रस्तुतं-फलम् – is the result presented; भ्रान्ति-वेलायां – during the state of delusion; यत् which; नाना – various; जुगुप्सितम् – loathsome; कर्म – deeds; कृतं – did; नरः – a man; पश्चात् – afterwards; विवेकेन – with discrimination; तत्-कथं-कर्तुम्-अर्हति – how can commit the same.

Being unruffled by earthly troubles is the result presented by knowledge; afterwards with discrimination how can a man commit, the same various loathsome deeds which he did during the state of delusion?

विद्याफलं स्यादसतो निवृत्तिः

प्रवृत्तिरज्ञानफलं तदीक्षितम्।

तज्ज्ञाज्ञयोर्यन्मृगतृष्णिकादौ

नोचेद्विदां दृष्टफलं किमस्मात्॥ ४२२ ॥

असतः निवृत्तिः विद्या फलं स्यात् प्रवृत्तिः अज्ञान फलं, यत् मृगतृष्णिकादौ तज्ज्ञ अज्ञयोः तत् ईक्षितम्। चेत् नो विदां अस्मात् दृष्टफलं किम ?

असतः – from unreal things; निवृत्तिः – the turning away; विद्या – of knowledge; फलं – the result; स्यात् – should be; प्रवृत्तिः – attachment to these; अज्ञान – of ignorance; फलं – is the result; यत् – which; मृगतृष्णिकादौ – a mirage & things of that sort; तज्ज्ञ – who knows; अज्ञयोः – one who does not know; ईक्षितम – is observed; तत्-चेत्-नो – otherwise; विदां– do the knower of Brahman obtain; अस्मात् – of knowledge; किम-दृष्टफलं – what other tangible result.

The result of knowledge should be the turning away from unreal things, whereas attachment to these is the result of ignorance; which is observed in case of one who knows a mirage & things of that sort & one who does not know; otherwise what other tangible result of knowledge do the knower of Brahman obtain?

अज्ञानहृदयग्रन्थेर्विनाशो यद्यशेषतः।

अनिच्छोर्विषयः किं नु प्रवृत्तेः कारणं स्वतः॥ ४२३ ॥

यदि अज्ञान-हृदयग्रन्थेः विनाशः अशेषतः, अनिच्छोः विषयः स्वतः प्रवृत्तेः कारणं किं नु ?

यदि – if; अज्ञान-हृदयग्रन्थेः – the heart's knot of ignorance; विनाशः-अशेषतः – is totally destroyed; स्वतः-अनिच्छोः – a man who is averse to sense-pleasure; विषयः-प्रवृत्तेः – for inducing to selfish actions; कारणं-किं-नु – what natural cause can there be.

If the heart's knot of ignorance is totally destroyed, what natural cause can there be for inducing such man who is averse to sense-pleasure, to selfish actions ?

वासनानुदयो भोग्ये वैराग्यस्य तदावधिः ।

अहंभावोदयाभावो बोधस्य परमावधिः ।

लीनवृत्तैरनुत्पत्तिर्मर्यादोपरतेस्तु सा ॥ ४२४ ॥

भोग्ये वासन-अनुदयः तदा वैरागस्य अवधिः, अहंभाव-उदय-अभावः बोधस्य परम-अवधिः,

लीनवृत्तैः अनुत्पत्तिः सा तु उपरतेः मर्यादा ।

भोग्ये-वासन-अनुदयः – when the sense-objects excite no-more desire; तदा – there is; वैरागस्य – of dispassion; अवधिः – the culmination; अहंभाव-उदय-अभावः – the absence of any impulsion of the egoistic idea; बोधस्य-परम-अवधिः – the extreme perfection of knowledge is; लीनवृत्तैः – the mind-functions that have been merged; अनुत्पत्तिः – appear no more; सा-तु – is reached when; उपरतेः – of self-withdrawal; मर्यादा – the limit.

When the sense-objects excite no-more desire, there is the culmination of dispassion. The extreme perfection of knowledge is the absence of any impulsion of the egoistic idea. And the limit of self-withdrawal is reached when the mind-functions that have been merged, appear no more.

ब्रह्माकारतया सदा स्थिततया निर्मुक्तबाह्यार्थधी-

रन्यावेदितभोग्यभोगकलनो निद्रालुवद्बालवत् ।

स्वप्नालोकितलोकवज्जगदिदं पश्यन्क्वचिल्लब्धधी-

रास्ते कश्चिदनन्तपुण्यफलभुग्धन्यः स मान्यो भुवि ॥ ४२५ ॥

ब्रह्माकारतया सदा स्थिततया निर्मुक्तबाह्यार्थधीः अन्यावेदित भोग्यभोगकलनः निद्रालुवत् बालवत् स्वप्नालोकितलोकवत् इदं जगत् पश्यन् क्वचित लब्धधीः, अनन्तपुण्यफलभुक् कश्चित् आस्तेः सः भुवि धन्यः मान्यः ।

ब्रह्माकारतया – merged in Brahman; सदा – always; स्थिततया – on account of his remaining; निर्मुक्तबाह्यार्थधीः – freed from all sense of reality of the external sense-objects; अन्यावेदित – as are offered by others; भोग्यभोगकलनः – only seeming to enjoy such sense-objects; निद्रालुवत् – like a sleepy one; बालवत् – like a child; स्वप्नालोकितलोकवत् – as one seen in dreams; इदं – this; जगत् – world; पश्यन् – beholding; क्वचित – at chance moments; लब्धधीः – having cognition of it; अनन्तपुण्यफलभुक् – the enjoyer of the fruits of endless merits; कश्चित्-आस्तेः – rare indeed is such a man;

सः-भुवि-धन्यः-मान्यः – he alone is blessed and esteemed on earth.

Freed from all sense of reality of the external sense-objects on account of his always remaining merged in Brahman; only seeming to enjoy such sense-objects as are offered by others, like a sleepy one, or like a child; beholding this world as one seen in dreams, and having cognition of it at chance moments - rare indeed is such a man, the enjoyer of the fruits of endless merits, and he alone is blessed and esteemed on earth.

स्थितप्रज्ञो यतिरयं यः सदानन्दमश्नुते ।

ब्रह्मण्येव विलीनात्मा निर्विकारो विनिष्क्रियः ॥ ४२६ ॥

यः ब्रह्मणि एव विलीन-आत्मा निर्विकारः विनिष्क्रियः सदा आनन्दम् अश्नुते अयं यतिः स्थितप्रज्ञः ।

यः – who; ब्रह्मणि – in Brahman; एव – alone; विलीन-आत्मा – having his soul wholly merged;

निर्विकारः – changeless; विनिष्क्रियः – free from activity; सदा – eternal; आनन्दम् – bliss; अश्नुते –

enjoys; अयं – this; यतिः – monk; स्थितप्रज्ञः – of a steady illumination.

This monk of a steady illumination, who having his soul wholly merged in Brahman alone, enjoys eternal bliss, is changeless & free from activity.

ब्रह्मात्मनोः शोधितयोरेकभावावगाहिनी ।

निर्विकल्पा च चिन्मात्रा वृत्तिः प्रज्ञेति कथ्यते ।

सुस्थिताऽसौ भवेद्यस्य स्थितप्रज्ञः स उच्यते ॥ ४२७ ॥

शोधितयोः-ब्रह्म-आत्मनोः एक-भाव-अवगाहिनी निर्विकल्पा च चिन्मात्रा-वृत्तिः प्रज्ञा इति कथ्यते ।

असौ सुस्थिता यस्य-भवेत्-सः स्थितप्रज्ञः उच्यते ।

शोधितयोः-ब्रह्म-आत्मनोः – that kind of mental function which cognizes only the identity of the Self

& Brahman; एक-भाव-अवगाहिनी – which is free from duality; निर्विकल्पा – purified of all adjuncts;

च –and; चिन्मात्रा-वृत्तिः – which concerns itself only with Pure Intelligence; प्रज्ञा – illumination;

इति-कथ्यते – is called; असौ – this; सुस्थिता – perfectly steady; यस्य-भवेत्-सः – he who has;

स्थितप्रज्ञः – a man of steady illumination; उच्यते – is called.

That kind of mental function which cognizes only the identity of the Self & Brahman, purified of all adjuncts, which is free from duality, & which concerns itself only with Pure is called Intelligence, illumination; and he who has this perfectly steady is called a man of steady illumination.

यस्य स्थिता भवेत्प्रज्ञा यस्यानन्दो निरन्तरः ।

प्रपञ्चो विस्मृतप्रायः स जीवन्मुक्त इष्यते ॥ ४२८ ॥

यस्य प्रज्ञा स्थिता भवेत्, यस्य आनन्दः निरन्तरः, प्रपञ्चः विस्मृतप्रायः सः जीवन्मुक्तः इष्यते ।

यस्य – whose; प्रज्ञा – illumination; स्थिता-भवेत् – is steady; यस्य – who has; आनन्दः – bliss;

निरन्तरः – is constant; प्रपञ्चः – the phenomenal universe; विस्मृतप्रायः – almost forgotten; सः –

he; जीवन्मुक्तः – a man liberated in this very life; इष्यते – is accepted as.

He whose illumination is steady, bliss is constant and who has almost forgotten the phenomenal universe is accepted as a man liberated in this very life.

लीनधीरपि जागर्ति जाग्रद्धर्मविवर्जितः ।

बोधो निर्वासनो यस्य स जीवन्मुक्त इष्यते ॥ ४२९ ॥

यः लीनधीः अपि जागर्ति जाग्रद्-धर्म-विवर्जितः, यस्य निर्वासनः बोधः सः जीवन्मुक्त इष्यते ।

यः – who; लीनधीः – having his mind merged in Brahman; अपि – even; जागर्ति – is nevertheless quite alert; जाग्रद्-धर्म-विवर्जितः – but at the same time is free from the characteristics of the waking state; यस्य – whose; निर्वासनः – is free from desires; बोधः – knowledge; सः – he; जीवन्मुक्तः – a man liberated in this very life; इष्यते – is accepted as.

He who even having his mind merged in Brahman is nevertheless quite alert, but at the same time is free from the characteristics of the waking state, and whose knowledge is free from desires, is accepted as a man liberated in this very life.

शान्तसंसारकलनः कलावानपि निष्कलः ।

यस्य चित्तं विनिश्चिन्तं स जीवन्मुक्त इष्यते ॥ ४३० ॥

शान्त-संसार-कलनः कलावान् अपि निष्कलः यस्य चित्तं विनिश्चिन्तं सः जीवन्मुक्तः इष्यते ।

शान्त-संसार-कलनः – cares about the phenomenal state have been appeased; कलावान् – possessed of a body consisting of organs; अपि – though; निष्कलः – freed from the identification with his body & organs, as a result of his realization; यस्य – whose; चित्तं – mind; विनिश्चिन्तं – is free from anxiety; सः – he; जीवन्मुक्तः – a man liberated in this very life; इष्यते – is accepted as.

He whose cares about the phenomenal state have been appeased, who, though possessed of a body consisting of organs, is yet freed from the identification with his body & organs, as a result of his realization, and whose mind is free from anxiety, is accepted as a man liberated in this very life.

वर्तमानेऽपि देहेऽस्मिञ्छायावदनुवर्तिनि ।

अहन्ताममताऽभावो जीवन्मुक्तस्य लक्षणम् ॥ ४३१ ॥

छायावत् अनुवर्तिनि अस्मिन् देहे वर्तमाने अपि अहन्ता-ममता-अभावः जीवन्मुक्तस्य लक्षणम् ।

छायावत् – as a shadow; अनुवर्तिनि – which follows; अस्मिन् – in this; देहे – body; वर्तमाने – existing; अपि – even; अहन्ता-ममता-अभावः – the absence of the ideas of "I" & "mine"; जीवन्मुक्तस्य – of one liberated-in-very-life; लक्षणम् – is a characteristic.

The absence of the ideas of "I" & "mine" even in this existing body which follows as a shadow, is a characteristic of one liberated-in-very-life.

अतीताननुसन्धानं भविष्यदविचारणम् ।

औदासीन्यमपि प्राप्तं जीवन्मुक्तस्य लक्षणम् ॥ ४३२ ॥

अतीत-अननुसन्धानं भविष्यद्-अविचारणम् प्राप्तं-अपि-औदासीन्यम् जीवन्मुक्तस्य लक्षणम् ।

अतीत-अननुसन्धानं – not dwelling on enjoyments of the past; भविष्यद्-अविचारणम् – taking no thought of the feature; प्राप्तं-अपि-औदासीन्यम् – looking up with indifference even upon the present; जीवन्मुक्तस्य – of one liberated-in-very-life; लक्षणम् – are characteristics.

Not dwelling on enjoyments of the past, taking no thought of the feature, and looking up with indifference even upon the present, are characteristics of one liberated-in-very-life.

गुणदोषविशिष्टेऽस्मिन्स्वभावेन विलक्षणे ।

सर्वत्र समदर्शित्वं जीवन्मुक्तस्य लक्षणम् ॥ ४३३ ॥

अस्मिन् गुण-दोष-विशिष्टे स्वभावेन विलक्षणे सर्वत्र समदर्शित्वं जीवन्मुक्तस्य लक्षणम् ।

अस्मिन् – in this world; गुण-दोष-विशिष्टे – full of elements possessing merits & demerits; स्वभावेन-विलक्षणे – distinct by nature from one another; सर्वत्र-समदर्शित्वं – looking everywhere with an eye of equality; जीवन्मुक्तस्य – of one liberated-in-very-life; लक्षणम् – is a characteristic.

Looking everywhere with an eye of equality in this world, full of elements possessing merits & demerits, and distinct by nature from one another is a characteristic of one liberated-in-very-life.

इष्टानिष्टार्थसम्प्राप्तौ समदर्शितयाऽऽत्मनि ।

उभयत्राविकारित्वं जीवन्मुक्तस्य लक्षणम् ॥ ४३४ ॥

इष्ट-अनिष्ट-अर्थ-सम्प्राप्तौ समदर्शितया उभयत्र आत्मनि अविकारित्वं जीवन्मुक्तस्य लक्षणम् ।

इष्ट-अनिष्ट-अर्थ-सम्प्राप्तौ – when things pleasant or painful present themselves; समदर्शितया – through the sameness of attitude; उभयत्र – in both cases; आत्मनि – in mind; अविकारित्वं – to remain unruffled; जीवन्मुक्तस्य – of one liberated-in-very-life; लक्षणम् – is a characteristic.

When things pleasant or painful present themselves, to remain unruffled in mind in both cases, through the sameness of attitude is a characteristic of one liberated-in-very-life.

ब्रह्मानन्दरसास्वादासक्तचित्ततया यतेः ।

अन्तर्बहिरविज्ञानं जीवन्मुक्तस्य लक्षणम् ॥ ४३५ ॥

ब्रह्मानन्द-रसास्वाद-आसक्त-चित्ततया यतेः अन्तः-बहिः अविज्ञानं जीवन्मुक्तस्य लक्षणम ।

ब्रह्मानन्द-रसास्वाद-आसक्त-चित्ततया – owing to his mind being engrossed in testing the bliss of Brahman; यतेः – in case of a monk; अन्तः-बहिः – of interior or exterior; अविज्ञानं – the absence of all ideas; जीवन्मुक्तस्य – of one liberated-in-very-life; लक्षणम् – is a characteristic.

The absence of all ideas of interior or exterior, in case of a monk, owing to his mind being engrossed in testing the bliss of Brahman is a characteristic of one liberated-in-very-life.

देहेन्द्रियादौ कर्तव्ये ममाहंभाववर्जितः ।

औदासीन्येन यस्तिष्ठेत्स जीवन्मुक्तलक्षणः ॥ ४३६ ॥

यः देह-इन्द्रिय-आदौ कर्तव्ये मम-अहं-भाव-वर्जितः औदासीन्येन तिष्ठेत् सः जीवन्मुक्तलक्षणः ।

यः – who; देह-इन्द्रिय-आदौ-कर्तव्ये – with regard to the body, organs, etc. as well as to his duties; मम-अहं-भाव-वर्जितः – devoid of all ideas of "I" & "mine"; औदासीन्येन – unconcerned; तिष्ठेत् – lives; सः – he; जीवन्मुक्तलक्षणः – is known as a man liberated-in-very-life.

He who lives devoid of all ideas of "I" & "mine" with regard to the body, organs, etc. as well as to his duties, is known as a man liberated-in-very-life.

विज्ञात आत्मनो यस्य ब्रह्मभावः श्रुतेर्बलात्।

भवबन्धविनिर्मुक्तः स जीवन्मुक्तलक्षणः॥ ४३७॥

श्रुतेः बलात् आत्मनः ब्रह्मभावः यस्य विज्ञातः भव-बन्ध-विनिर्मुक्तः सः जीवन्मुक्तलक्षणः ।

श्रुतेः – the scriptures/Vedas; बलात् – aided by; आत्मनः – his; ब्रह्मभावः – Brahmanhood; यस्य – who has; विज्ञातः – realized; भव-बन्ध-विनिर्मुक्तः – is free from the bondage of transmigration; सः – he; जीवन्मुक्तलक्षणः – is known as a man liberated-in-very-life.

He who has realized his Brahman-hood aided by the scriptures/Vedas, and is free from the bondage of transmigration, is known as a man liberated-in-very-life.

देहेन्द्रियेष्वहंभाव इदंभावस्तदन्यके।

यस्य नो भवतः क्वापि स जीवन्मुक्त इष्यते॥ ४३८॥

देह-इन्द्रियेषु अहंभावः तद्-अन्यके इदंभावः क्व-अपि न-भवतः यस्य सः जीवन्मुक्त इष्यते।

देह-इन्द्रियेषु – with regard to the body, organs etc.; अहंभावः – the idea of "I"; तद्-अन्यके – in respect of things other than these; इदंभावः – that of "it"; क्व-अपि-न-भवतः – never has; यस्य – who has; सः – he; जीवन्मुक्त – one liberated-in-very-life; इष्यते – is accepted as.

He who never has the idea of "I" with regard to the body, organs etc., nor that of "it" in respect of things other than these, is accepted as one liberated-in-very-life.

न प्रत्यग्ब्रह्मणोर्भेदं कदापि ब्रह्मसर्गयोः।

प्रज्ञया यो विजानाति स जीवन्मुक्तलक्षणः॥ ४३९॥

प्रत्यग्-ब्रह्मणोः ब्रह्म-सर्गयोः भेदं प्रज्ञया कदा अपि न विजानाति यः स जीवन्मुक्तलक्षणः ।

प्रत्यग्-ब्रह्मणोः – the soul & Brahman; ब्रह्म-सर्गयोः – the universe & Brahman; प्रज्ञया – through his illumination; भेदं-कदा-अपि-न-विजानाति – never differentiates; यः – who; सः – he; जीवन्मुक्त – one liberated-in-very-life.

He, who through his illumination never differentiates, the soul & Brahman, nor the universe & Brahman, is known as a man liberated-in-very-life.

साधुभिः पूज्यमानेऽस्मिन्पीड्यमानेऽपि दुर्जनैः।

समभावो भवेद्यस्य स जीवन्मुक्तलक्षणः॥ ४४०॥

अस्मिन् साधुभिः पूज्यमाने दुर्जनैःपीड्यमाने अपि समभावः भवेत् यस्य सः जीवन्मुक्तलक्षणः ।

अस्मिन् – his body; साधुभिः – by the good; पूज्यमाने – worshiped; दुर्जनैः – by the wicked; पीड्यमाने – tormented; अपि – even; समभावः-भवेत् – feels just the same; यस्य – who; सः – he; जीवन्मुक्तलक्षणः – is known as a man liberated-in-very-life.

He who feels just the same when his body is either worshiped by the good or even tormented by the wicked, is known as a man liberated-in-very-life.

यत्र प्रविष्टा विषयाः परेरिता

नदीप्रवाहा इव वारिराशौ ।

लिनन्ति सन्मात्रतया न विक्रियां

उत्पादयन्त्येष यतिर्विमुक्तः ॥ ४४१ ॥

वारिराशौ नदीप्रवाहा इव पर-इरिता विषयाः यत्र प्रविष्टा सत्-मात्रतया लिनन्ति विक्रियां न

उत्पादयन्ति एषः यतिः विमुक्तः ।

वारिराशौ – in the sea; नदीप्रवाहा – flowing rivers; इव – like; पर-इरिता – directed by others; विषयाः – the sense-objects; यत्र – in whom; प्रविष्टा-लिनन्ति – are engulfed; सत्-मात्रतया – owing to his identity with the Existance Absolute; विक्रियां – change; न – no; उत्पादयन्ति – produce; यतिः – the monk; एषः-विमुक्तः – is indeed liberated.

The monk in whom the sense-objects directed by others are engulfed like flowing rivers in the sea and produce no change, owing to his identity with the Existence Absolute, is indeed liberated.

विज्ञातब्रह्मतत्त्वस्य यथापूर्वं न संसृतिः ।

अस्ति चेन्न स विज्ञातब्रह्मभावो बहिर्मुखः ॥ ४४२ ॥

विज्ञात-ब्रह्मतत्त्वस्य यथापूर्वं संसृतिः न, अस्ति चेत् सः न विज्ञातब्रह्मभावः, बहिर्मुखः ।

विज्ञात-ब्रह्मतत्त्वस्य – for one who has realized the Truth of Brahman; यथापूर्वं – as before; संसृतिः – attachment to the sense-objects; न – there is no more; अस्ति-चेत् – if there is; सः-न-विज्ञातब्रह्मभावः – that man has not realized his identity with Brahman; बहिर्मुखः – but one whose senses are outgoing in their tendency.

For one who has realized the Truth of Brahman, there is no more attachment to the sense-objects as before; if there is, – that man has not realized his identity with Brahman, but one whose senses are outgoing in their tendency.

प्राचीनवासनावेगादसौ संसरतीति चेत्

न सदेकत्वविज्ञानान्मन्दी भवति वासना ॥ ४४३ ॥

प्राचीन-वासना-वेगात् असौ संसरति इति-चेत्, न, सद्-एकत्व-विज्ञानात् वासना मन्दी भवति ।

प्राचीन-वासना-वेगात् – through the momentum of his old desires; असौ – he; संसरति –is still attached to the sense-objects; इति-चेत् – if it be argued that; न – the reply is – no; सद्-एकत्व-विज्ञानात् – through the realization of one's identity with Brahman; वासना – desires; मन्दी – weakened; भवति – get.

If it be argued that he is still attached to the sense-objects through the momentum of his old desires; the reply is – no for desires get weakened through the realization of one's identity with Brahman.

अत्यन्तकामुकस्यापि वृत्तिः कुण्ठति मातरि ।

तथैव ब्रह्मणि ज्ञाते पूर्णानन्दे मनीषिणः ॥ ४४४ ॥

अत्यन्त-कामुकस्य-अपि वृत्तिः मातरि कुण्ठति, तथा एव पूर्ण-आनन्दे ब्रह्मणि-ज्ञाते मनीषिणः ।

अत्यन्त-कामुकस्य-अपि – of even a confirmed libertine; वृत्तिः – the propensities; मातरि-कुण्ठति – are checked in the presence of his mother; तथा-एव – just so; पूर्ण-आनन्दे-ब्रह्मणि-ज्ञाते – when Brahman, the Bliss Absolute, has been realized; मनीषिणः – the man of realization has no longer any worldly tendency.

The propensities of even a confirmed libertine are checked in the presence of his mother; just so, when Brahman, the Bliss Absolute,has been realized, the man of realization has no longer any worldly tendency.

निदिध्यासनशीलस्य बाह्यप्रत्यय ईक्ष्यते ।

ब्रवीति श्रुतिरेतस्य प्रारब्धं फलदर्शनात् ॥ ४४५ ॥

निदिध्यासन-शीलस्य बाह्यप्रत्यय ईक्ष्यते । एतस्य प्रारब्धं श्रुतिः ब्रवीति फलदर्शनात् ।

निदिध्यासन-शीलस्य – one who is constantly practicing meditation; बाह्यप्रत्यय – external perceptions; ईक्ष्यते – is observed to have; एतस्य – his; प्रारब्धं – the resultant of past work that has led to the present birth; श्रुतिः – the sruits/Vedas; ब्रवीति – mention it as; फलदर्शनात् – we can infer this from results actually seen.

One who is constantly practicing meditation is more the point observed to have external perceptions, but the sruits/Vedas mention it as the resultant of his past work that has led to the present birth, besides we can infer this from the results actually seen.

सुखाद्यनुभवो यावत्तावत्प्रारब्धमिष्य ते ।

फलोदयः क्रियापूर्वो निष्क्रियो न हि कुत्रचित् ॥ ४४६ ॥

यावत् सुख-आदि-अनुभवः तावत् प्रारब्धम् इष्यते । फल-उदयः क्रियापूर्वः निष्क्रियः न-हि-कुत्रचित् ।

यावत्-तावत् – so long as; सुख-आदि-अनुभवः – there is perception of happiness and the like; प्रारब्धम् – the resultant of past work that has led to the present birth; इष्यते – is acknowledged to persist; फल-उदयः – every result; क्रियापूर्वः – is preceded by an action; निष्क्रियः – to accrue independently of action; न-हि-कुत्रचित – nowhere it is seen.

The resultant of past work that has led to the present birth is acknowledged to persist so long as there is perception of happiness and the like. Every result is preceded by an action nowhere it is seen to accrue independently of action.

अहं ब्रह्मेति विज्ञानात्कल्पकोटिशतार्जितम् ।

सञ्चितं विलयं याति प्रबोधात्स्वप्नकर्मवत् ॥ ४४७ ॥

प्रबोधात् स्वप्नकर्मवत् कल्प-कोटि-शत-अर्जितम् सञ्चितं ‘अहं ब्रह्मेति’ विज्ञानात् विलयं-याति ।

प्रबोधात् – on awakening; स्वप्नकर्मवत् – like the actions of dream state; कल्प-कोटि-शत-अर्जितम् – of a hundred crore of cycles; सञ्चितं – all accumulated actions; ‘अहं ब्रह्मेति’ – one’s identity with Brahman; विज्ञानात् – through the realization of; विलयं-याति – come to nought.

Through the realization of one’s identity with Brahman, all accumulated actions of a hundred crore of cycles come to nought, like the actions of dream state on awakening.

यत्कृतं स्वप्नवेलायां पुण्यं वा पापमुल्बणम्।

सुप्तोत्थितस्य किन्तत्स्यात्स्वर्गाय नरकाय वा ॥ ४४८ ॥

स्वप्नवेलायां यत् पुण्यं वा उल्बणम्-पापम् कृतं, तत् सुप्त-उत्थितस्य स्वर्गाय वा नरकाय स्यात् किं ?

स्वप्नवेलायां – in the dream-state; पुण्यं – the good actions; वा – or; उल्बणम्-पापम् – dreadful sins;

कृतम् – a man fancies himself doing; यत्-तत् – that; सुप्त-उत्थितस्य – him after he has awakened from sleep; स्वर्गाय-वा-नरकाय – to heaven or hell; स्यात्-किं – can lead?

Can the good actions or dreadful sins that a man fancies himself doing in the dream-state, lead him to heaven or hell after he has awakened from sleep?

स्वमसङ्गमुदासीनं परिज्ञाय नभो यथा ।

न श्लिष्यति च यत्किञ्चित्कदाचिद्भाविकर्मभिः ॥ ४४९ ॥

नभः यथा स्वम् असङ्गम उदासीनं परिज्ञाय कदाचित् भावि-कर्मभिः यत् त्किञ्चित् च न श्लिष्यति ।

नभः-यथा-असङ्गम-उदासीनं – which is unattached & indifferent like the sky; स्वम् – the Atman;

परिज्ञाय – realizing; न-च-कदाचित् – is never; भावि-कर्मभिः – by actions yet to be done;

यत्-त्किञ्चित् – in the least; श्लिष्यति – touched.

Realizing the Atman, which is unattached & indifferent like the sky, the aspirant is never touched in the least by actions yet to be done.

न नभो घटयोगेन सुरागन्धेन लिप्यते ।

तथात्मोपाधियोगेन तद्धर्मैर्नैव लिप्यते ॥ ४५० ॥

नभः घटयोगेन सुरागन्धेन न लिप्यते तथा आत्मा उपाधियोगेन तद्धर्मैः न एव लिप्यते ।

नभः – the sky; घटयोगेन – merely through its connection with the jar; सुरागन्धेन – by the smell of liquer; न – is not; लिप्यते – affected; तथा – similarly; आत्मा – the Atman; उपाधियोगेन – through Its connection with limitations; तद्धर्मैः – by the properties thereof; न-एव-लिप्यते – is not affected.

The sky is not affected by the smell of liquor merely through its connection with the jar; similarly the Atman is not, through Its connection with limitations, affected by the properties thereof.

शिष्य उवाच ।

ज्ञानोदयात्पुरारब्धं कर्मज्ञानान्न नश्यति ।

अदत्वा स्वफलं लक्ष्यमुद्दिश्योत्सृष्टबाणवत्॥ ४५१ ॥

शिष्य-उवाच लक्ष्यम्-उद्दिश्य उत्सृष्ट-बाणवत् ज्ञान-उदयात्-पुरा आरब्धं-कर्म स्वफलं-अदत्वा ज्ञानात् न-नश्यति ।

शिष्य-उवाच – the apostale raises an objection: but revered sir; लक्ष्यम्-उद्दिश्य – at an object;

उत्सृष्ट-बाणवत् – like the arrow shot; ज्ञान-उदयात्-पुरा – prior to the drawing of knowledge;

आरब्धं-कर्म – the work which has fashioned this body; स्वफलं-अदत्वा – without yielding its fruits; ज्ञानात् – by that knowledge; न-नश्यति – is not destroyed.

The apostale raises an objection:
But revered sir, the work which has fashioned this body prior to the drawing of knowledge, is not destroyed by that knowledge without yielding its fruits, like the arrow shot at an object.

व्याघ्रबुद्ध्या विनिर्मुक्तो बाणः पश्चात्तु गोमतौ ।

न तिष्ठति छिनत्येव लक्ष्यं वेगेन निर्भरम्॥ ४५२ ॥

व्याघ्रबुद्ध्या विनिर्मुक्तः बाणः पश्चात् तु गोमतौ न तिष्ठति, निर्भरम् वेगेन लक्ष्यं छिनत्ति एव ।

व्याघ्रबुद्ध्या – with erroneous idea that it is a tiger; विनिर्मुक्तः – which is shot at an object; बाणः – the arrow; पश्चात् – afterword; तु – but; गोमतौ – when that object is correctly perceived to be a cow; न – does not; तिष्ठति – check itself; निर्भरम्-वेगेन – with full force; लक्ष्यं – the object; छिनत्ति – pierces; एव – without fail.

The arrow which is shot at an object with erroneous idea that it is a tiger, does not, afterword, when that object is correctly perceived to be a cow, check itself, but pierces the object with full force without fail.

श्रीगुरुरुवाच ।

प्रारब्धं बलवत्तरं खलु विदां भोगेन तस्य क्षयः

सम्यग्ज्ञानहुताशनेन विलयः प्राक्संचितागामिनाम् ।

ब्रह्मात्मैक्यमवेक्ष्य तन्मयतया ये सर्वदा संस्थिताः

तेषां तत्त्रितयं नहि क्वचिदपि ब्रह्मैव ते निर्गुणम्॥ ४५३ ॥

श्रीगुरुरुवाच – the Sage comes-out with clarification

विदां – for the man of realization; प्रारब्धं – the resultant of past work that has led to the present birth; बलवत्तरं – very strong; खलु – is certainly; तस्य-क्षयः – it is spent; भोगेनहि – only by the actual experience of its fruits; प्राक्-संचित्-आगामिनाम् – the actions previously accumulated & those yet to come; सम्यग्-ज्ञान-हुताशनेन – by the fire of perfect knowledge; विलयः – are destroyed; ब्रह्म-आत्म-ऐक्यम्-अवेक्ष्य – realizing their identity with Brahman; तन्मयतया – absorbed in that idea; ये – who; सर्वदा – are always; संस्थिताः – living; तेषां – those; तत्-त्रितयं-क्वचित्-अपि-न – but none of the three at all affects; ते – they are; निर्गुणम् – the transcendent; ब्रह्म – Brahman; एव – verily.

True! The resultant of past work that has led to the present birth is certainly very strong even for the man of realization, and it is spent only by the actual experience of its fruits; while the actions previously accumulated & those yet to come are destroyed by the fire of perfect knowledge; but none of the three at all affects those, who, realizing their identity with Brahman, are always living absorbed in that idea; they are verily the transcendent Brahman.

उपाधितादात्म्यविहीनकेवल-

ब्रह्मात्मनैवात्मनि तिष्ठतो मुनेः ।

प्रारब्धसद्भावकथा न युक्ता

स्वप्नार्थसंबन्धकथेव जाग्रतः ॥ ४५४ ॥

मुनेः उपाधि-तादात्म्य-विहीन-केवल-ब्रह्म-आत्मना-एव-आत्मनि तिष्ठतः, जाग्रतः स्वप्न-अर्थ-संबन्ध-कथा-इव प्रारब्ध-सद्-भाव-कथा न युक्ता ।

मुनेः – for the sage; उपाधि-तादात्म्य-विहीन – devoid of identification with the limiting adjuncts; केवल – the one without second; ब्रह्म-आत्मना-एव – as Brahman only; आत्मनि – in his own Self; तिष्ठतः – who lives; जाग्रतः – who has awakened from sleep; स्वप्न-अर्थ-संबन्ध – having any connection with the objects seen in the dream-state; कथा-इव – like the question of a man; प्रारब्ध – the resultant of past work that has led to the present birth; सद्-भाव-कथा – the question of the existence of; न-युक्ता – is meaningless.

For the sage who lives in his own Self as Brahman only, the one without second, devoid of identification with the limiting adjuncts, – the question of the existence of the resultant of past work that has led to the present birth, is meaningless, like the question of a man who has awakened from sleep, having any connection with the objects seen in the dream-state.

न हि प्रबुद्धः प्रतिभासदेहे
देहोपयोगिन्यपि च प्रपञ्चे ।
करोत्यहन्तां ममतानिदन्तां
किन्तु स्वयं तिष्ठति जागरेण ॥ ४५५ ॥

प्रबुद्धः – the man who has awakned from sleep; प्रतिभासदेहे-देह-उपयोगिनि-प्रपञ्चे-च – with regard to his dream-body and the dream-objects that ministered to that body; अहन्तां-ममतां-इदन्तां-अपि – any idea of “I” or “mine” or even “it”; न-करोति – never has; किन्तु – but; स्वयं – as his own Self; जागरेण-हि – quite awake; तिष्ठति – lives.

The man who has awakened from sleep never has any idea of “I” or “mine” or even “it” with regard to his dream-body and the dream-objects that ministered to that body, but lives quite awake, as his own Self.

न तस्य मिथ्यार्थसमर्थनेच्छा
न संग्रहस्तज्जगतोऽपि दृष्टः ।
तत्रानुवृत्तिर्यदि चेन्मृषार्थे
न निद्रया मुक्त इतीष्यते ध्रुवम् ॥ ४५६ ॥

तस्य मिथ्या-अर्थ-समर्थन-इच्छा न, तत्-जगतः संग्रहः अपि न दृष्टः ।
यदि चेत् तत्र मृषा-अर्थे अनुवृत्तिः निद्रया न मुक्तः इति ध्रुवम् इष्यते ।

तस्य – the awakened one; मिथ्या-अर्थ-समर्थन – to substantiate the unreal objects; इच्छा – desire; न – has no; तत्-जगतः – that dream world; संग्रहः – to maintain; अपि न दृष्टः – nor is he seen; यदि-चेत् – if he still; तत्र – to those; मृषा-अर्थे – unreal objects; अनुवृत्तिः – clings; निद्रया – from sleep; न – not yet; मुक्तः – free; इति-ध्रुवम्-इष्यते – he is emphatically declared to be.

The awakened one has no desire to substantiate the unreal objects, nor is he seen to maintain that dream world; if he still clings to those unreal objects, he is emphatically declared to be not yet free from sleep.

तद्वत्परे ब्रह्मणि वर्तमानः

सदात्मना तिष्ठति नान्यदीक्षते ।

स्मृतिर्यथा स्वप्नविलोकितार्थे

तथा विदः प्राशनमोचनादौ ॥ ४५७ ॥

तत्-वत् परे ब्रह्मणि वर्तमानः सत्-आत्मना तिष्ठति न अन्यत् इक्षते । यथा स्वप्न-विलोकित-अर्थे स्मृतिः

तथा विदः प्र-अशन-मोचन-आदौ ।

तत्-वत् – similarly; परे-ब्रह्मणि – in Supreme-Brahman; वर्तमानः – he who is absorbed; सत्-आत्मना – identified with that eternal Reality; तिष्ठति – lives; न – nothing; अन्यत् – else; इक्षते – beholds; यथा – as one has; स्वप्न-विलोकित-अर्थे-स्मृतिः – a memory of the objects seen in a dream; तथा – so; विदः – the man of realization; प्र-अशन-मोचन-आदौ – has a memory of the everyday action such as eating-freeing and alike.

Similarly, he who is absorbed in Supreme-Brahman lives identified with that eternal Reality and beholds nothing else. As one has a memory of the objects seen in a dream, so the man of realization has a memory of the everyday action such as eating-freeing and alike.

कर्मणा निर्मितो देहः प्रारब्धं तस्य कल्प्यताम् ।

नानादेरात्मनो युक्तं नैवात्मा कर्मनिर्मितः ॥ ४५८ ॥

देहः कर्मणा निर्मितः तस्य प्रारब्धं कल्प्यताम् । अनादेः आत्मनः न युक्तं । आत्मा कर्मनिर्मितः न एव ।

देहः – the body; कर्मणा – by the resultant of past work; निर्मितः – has been fashioned; तस्य – with reference to it; प्रारब्धं – the resultant of past work that has led to the present birth; कल्प्यताम् – so one may imagine; अनादेः – to the beginningless; आत्मनः – Atman/Self; न-युक्तं – but it is not reasonable; आत्मा – the Atman/Self; कर्मनिर्मितः-न-एव – is never outcome of work.

The body has been fashioned by the resultant of past work, so one may imagine the resultant of past work that has led to the present birth, with reference to it; but it is not reasonable to attribute the same to the beginning-less Atman/Self, for the Atman/Self is never outcome of work.

अजो नित्यः शाश्वत इति ब्रूते श्रुतिरमोघवाक् ।

तदात्मना तिष्ठतोऽस्य कुतः प्रारब्धकल्पना ॥ ४५९ ॥

अमोघवाक् श्रुतिः 'अजो-नित्यः-शाश्वत'-इति ब्रूते । तत्-आत्मना-तिष्ठतः अस्य प्रारब्ध-कल्पना कुतः ?

अमोघवाक् – whose words are infalliable; श्रुतिः – the Srutis/Vedas; 'अजो-नित्यः-शाश्वत'-इति –the Atman/Self to be "birthless, eternal & undecaying"; ब्रूते – declar; तत्-आत्मना-तिष्ठतः – who lives identified with That; अस्य – to the man; प्रारब्ध-कल्पना – the resultant of past work that has led to the present birth be attributed; कुतः – how can?

The Srutis/Vedas, whose words are infallible, declare the Atman/Self to be "birth-less, eternal & undecaying"; so to the man who lives identified with That, how can the resultant of past work that has led to the present birth be attributed?

प्रारब्धं सिध्यति तदा यदा देहात्मना स्थितिः ।

देहात्मभावो नैवेष्टः प्रारब्धं त्यज्यतामतः ॥ ४६० ॥

यदा देहात्मना स्थितिः तदा प्रारब्धं सिध्यति, देहात्मभावः इष्टः न एव, अतः प्रारब्धं त्यज्यताम् ।

यदा-तदा – so long as; देहात्मना-स्थितिः – one lives identified with the body; प्रारब्धं – the idea of resultant of past work that has led to the present birth; सिध्यति – can be maintained; देहात्मभावः-एव – but to lives identified with the body itself; इष्टः-न – is not desirable; अतः – therefore; प्रारब्धं – the resultant of past work that has led to the present birth; त्यज्यताम् – give up.

So long as one lives identified with the body the resultant of past work that has led to the present birth can be maintained, but to lives identified with the body itself is not desirable, therefore give up the idea of resultant of past work that has led to the present birth.

शरीरस्यापि प्रारब्धकल्पना भ्रान्तिरेव हि ।

अध्यस्तस्य कुतः सत्त्वमसत्यस्य कुतो जनिः ।

अजातस्य कुतो नाशः प्रारब्धमसतः कुतः ॥ ४६१ ॥

शरीरस्य प्रारब्धकल्पना अपि भ्रान्तिः एव हि । अध्यस्तस्य सत्त्वम् कुतः? असत्यस्य जनिः कुतः? अजातस्य नाशः कुतः? असतः प्रारब्धम् कुतः?

शरीरस्य – of the body; प्रारब्ध – the idea of resultant of past work that has led to the present birth; कल्पना – the attributing; अपि – even; भ्रान्तिः-एव-हि – is certainly an error; अध्यस्तस्य – of something that is superimposed; सत्त्वम्-कुतः – how can have any existace; असत्यस्य – of that which is unreal; जनिः – have a birth; कुतः – how can; अजातस्य – of that which has not born at all; नाशः – die; कुतः – how can; असतः – something that is unreal; प्रारब्धम् – the idea of resultant of past work that has led to the present birth; कुतः – how can.

The attributing of the idea of resultant of past work that has led to the present birth to the body even is certainly an error. How can something that is superimposed have any existence? How can that is unreal have a birth? How can that which has not born at all die? & How can the idea of resultant of past work that has led to the present birth exists for something that is unreal?

ज्ञानेनाज्ञानकार्यस्य समूलस्य लयो यदि ।

तिष्ठत्ययं कथं देह इति शङ्कावतो जडान् ॥ ४६२ ॥

समाधातुं बाह्यदृष्ट्या प्रारब्धं वदति श्रुतिः ।

न तु देहादिसत्यत्वबोधनाय विपश्चिताम् ॥ ४६३ ॥

"यदि ज्ञानेन अज्ञानकार्यस्य समूलस्य लयः अयं देहः कथं तिष्ठति?" इति शङ्कावतः जडान् समाधातुं 'बाह्यदृष्ट्या प्रारब्धं', श्रुतिः वदति, तु विपश्चिताम् देहादि-सत्यत्व-बोधनाय न ।

"यदि – if; ज्ञानेन – by knowledge; अज्ञानकार्यस्य – the effects of ignorance; समूलस्य – with their roots; लयः – are destroyed; अयं – then; देहः – the body; कथं – how; तिष्ठति – does live;" इति –

शङ्कावतः – who entertain a doubt like this; जडान् – those fools; समाधातुं – it is to convience; 'बाह्यदृष्ट्या – from relative standpoint; प्रारब्धं – the idea of resultant of past work that has led to the present birth', श्रुतिः – that the Srutis/Vedas; वदति – hypothesise, न – not; तु – but; विपश्चिताम् – of the man of realization; देहादि – the body etc.; सत्यत्व – the reality of; बोधनाय – for proving.

"If the effects of ignorance are destroyed with their roots, then how does the body live?"- it is to convince those fools who entertain a doubt like this, that the Srutis/Vedas, from relative standpoint, hypothesise the idea of resultant of past work that has led to the present birth, but not for proving the reality of the body etc. of the man of realization.

परिपूर्णमनाद्यन्तमप्रमेयमविक्रियम् ।

एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥ ४६४ ॥

परिपूर्णम् न-आदि-अन्तम् अप्रमेयम् अविक्रियम् एकम् एव अद्वयं ब्रह्म इह नाना किञ्चन न अस्ति ।

परिपूर्णम् – infinite; न-आदि-अन्तम् –without beginning or end; अप्रमेयम् – transcendent; अविक्रियम् – changeless; एकम्-एव-अद्वयं-ब्रह्म –only Brahman, the one without second; नाना – duality; किञ्चन – whatsoever; न – no; इह-अस्ति – there is.

There is only Brahman the one without second, infinite, without beginning or end, transcendent, changeless, there is no duality whatsoever in It.

सद्घनं चिद्घनं नित्यमानन्दघनमक्रियम् ।

एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥ ४६५ ॥

सद्-धनं चिद्-धनं नित्यम् आनन्द-घनम् अक्रियम् एकम् एव अद्वयं ब्रह्म, इह नाना किञ्चन न अस्ति ।

प्रत्यगेकरसं पूर्णमनन्तं सर्वतोमुखम् ।

सद्-धनं-चिद्-धनं-नित्यम्-आनन्द-घनम् – the Essence of Existence, Knowledge, & Eternal Bliss; अक्रियम् – devoid of activity; एकम्-एव-अद्वयं-ब्रह्म – only Brahman, the one without second; नाना – duality; किञ्चन – whatsoever; न – no; इह-अस्ति – there is.

There is only Brahman, the one without second, the Essence of Existence, Knowledge, & Eternal Bliss, devoid of activity, there is no duality whatsoever in It.

प्रत्यगेकरसं पूर्णमनन्तं सर्वतोमुखम्

एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥ ४६६ ॥

प्रत्यक् एकरसं पूर्णम् अनन्तं सर्वतोमुखम् एकम्-एव-अद्वयं-ब्रह्म, इह नाना किञ्चन न अस्ति ।

प्रत्यक् – which is within all; एकरसं – homogeneous; पूर्णम् – infinite; अनन्तं – endless; सर्वतोमुखम् – all-pervading; एकम्-एव-अद्वयं-ब्रह्म – only Brahman, the one without second; नाना – duality; किञ्चन – whatsoever; न – no; इह-अस्ति – there is.

There is only Brahman, the one without second, which is within all, homogeneous, infinite, endless, & all-pervading; there is no duality whatsoever in It.

अहेयमनुपादेयमनादेयमनाश्रयम् ।

एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥ ४६७ ॥

अहेयम् अनुपादेयम् अनादेयम् अनाश्रयम् एकम्-एव-अद्वयं-ब्रह्म, इह नाना किञ्चन न अस्ति।

अहेयम्-अनुपादेयम्-अनादेयम् – which is neither to be shunned nor taken up nor accepted; अनाश्रयम् – which is without any support; एकम्-एव-अद्वयं-ब्रह्म – only Brahman, the one without second; नाना – duality; किञ्चन – whatsoever; न – no; इह-अस्ति – there is.

There is only Brahman, the one without second, which is neither to be shunned nor taken up nor accepted, and which is without any support; there is no duality whatsoever in It.

निर्गुणं निष्कलं सूक्ष्मं निर्विकल्पं निरञ्जनम्।

एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥ ४६८ ॥

निर्गुणं, निष्कलं, सूक्ष्मं, निर्विकल्पं, निरञ्जनम्, एकम्-एव-अद्वयं-ब्रह्म, इह नाना किञ्चन न अस्ति।

निर्गुणं – beyond attributes; निष्कलं – without parts; सूक्ष्मं – subtle; निर्विकल्पं – absolute; निरञ्जनम् – taintless; एकम्-एव-अद्वयं-ब्रह्म – only Brahman, the one without second; नाना – duality; किञ्चन – whatsoever; न – no; इह-अस्ति – there is.

There is only Brahman, the one without second, beyond attributes, without parts, subtle, absolute, & taintless; there is no duality whatsoever in It.

अनिरूप्य स्वरूपं यन्मनोवाचामगोचरम्।

एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥ ४६९ ॥

अनिरूप्य-स्वरूपं, यत् मनोवाचाम् अगोचरम् एकम्-एव-अद्वयं-ब्रह्म, इह नाना किञ्चन न अस्ति।

अनिरूप्य-स्वरूपं – whose real nature is incomprehensible; यत्-मनोवाचाम्-अगोचरम् – which is beyond the range of mind & speech; एकम्-एव-अद्वयं-ब्रह्म – only Brahman, the one without second; नाना – duality; किञ्चन – whatsoever; न – no; इह-अस्ति – there is.

There is only Brahman, the one without second, whose real nature is incomprehensible, and which is beyond the range of mind & speech; there is no duality whatsoever in It.

सत्समृद्धं स्वतःसिद्धं शुद्धं बुद्धमनीदृशम्।

एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥ ४७० ॥

सत्, समृद्धं, स्वतःसिद्धं, शुद्धं, बुद्धम्, अनीदृशम् एकम्-एव-अद्वयं-ब्रह्म, इह नाना किञ्चन न अस्ति।

सत् – the Reality; समृद्धं – effulgent; स्वतःसिद्धं – self-existent; शुद्धं – pure; बुद्धम् – intelligent; अनीदृशम् – unlike anything finite; एकम्-एव-अद्वयं-ब्रह्म – only Brahman, the one without second; नाना – duality; किञ्चन – whatsoever; न – no; इह-अस्ति – there is.

There is only Brahman, the one without second, the Reality, effulgent, self-existent, pure intelligent, & unlike anything finite; there is no duality whatsoever in It.

निरस्तरागा विनिरस्तभोगाः

शान्ताः सुदान्ता यतयो महान्तः।

विज्ञाय तत्त्वं परमेतदन्ते

प्राप्ताः परां निर्वृतिमात्मयोगात् ॥ ४७१ ॥

निरस्तरागाः-विनिरस्तभोगाः शान्ताः-सुदान्ता महान्तः-यतयः एतद् परं तत्त्वं विज्ञाय अन्ते आत्मयोगात् परां निर्वृतिम् प्राप्ताः ।

निरस्तरागाः-विनिरस्तभोगाः – who have got rid of all attachment & discarded all sense-enjoyments; शान्ताः-सुदान्ता – who are serene & perfectly restrained; महान्तः-यतयः – high-souled monks; एतद् – this; परं – Supreme; तत्त्वं – Truth; विज्ञाय – realizing; अन्ते – at the end; आत्मयोगात् – through their Self-realization; परां – the Supreme; निर्वृतिम् – Bliss; प्राप्ताः – attain.

High-souled monks who have got rid of all attachment & discarded all sense-enjoyments, and who are serene & perfectly restrained, realizing Supreme Truth, at the end attain the Supreme Bliss through their Self-realization.

भवानपीदं परतत्त्वमात्मनः

स्वरूपमानन्दघनं विचार्य ।

विधूय मोहं स्वमनःप्रकल्पितं

मुक्तः कृतार्थो भवतु प्रबुद्धः ॥ ४७२ ॥

भवान् अपि आत्मनः इदं आनन्दघनं स्वरूपम् परतत्त्वम् विचार्य स्वमनःप्रकल्पितं मोहं विधूय प्रबुद्धः मुक्तः कृतार्थः भवतु ।

भवान् – you; अपि – too; इदं – this; आनन्दघनं – which is Bliss undiluted; आत्मनः-स्वरूपम् – the real nature of the Self; परतत्त्वम् – Supreme Truth; विचार्य – discriminate; स्वमनः – your own mind; प्रकल्पितं – created by; मोहं – your delusion; विधूय – shaking off; प्रबुद्धः – illumined; मुक्तः – be free; कृतार्थः – the consumption of your life; भवतु – attain.

You too, discriminate this Supreme Truth the real nature of the Self, which is Bliss undiluted, and shaking off your delusion created by your own mind, be free& illumined, and attain the consumption of your life.

समाधिना साधुविनिश्चलात्मना

पश्यात्मतत्त्वं स्फुटबोधचक्षुषा ।

निःसंशयं सम्यगवेक्षितश्चे-

च्छ्रुतः पदार्थो न पुनर्विकल्प्यते ॥ ४७३ ॥

स्फुटबोधचक्षुषा साधु-विनिश्चलात्मना समाधिना आत्मतत्त्वं पश्य । चेत् पद-अर्थः श्रुतः निःसंशयं सम्यग् अवेक्षितः पुनः-न-विकल्प्यते ।

स्फुटबोधचक्षुषा – with the eye of clear realization; साधु-विनिश्चलात्मना – in which the mind has been perfectly stilled; समाधिना – through deep meditation; आत्मतत्त्वं – the truth of the Self; पश्य – visualize; चेत् – if; पद-अर्थः – the meaning of the words; श्रुतः – heard from the Guru; निःसंशयं-सम्यग्-अवेक्षितः – is perfectly & indubitably discerned; पुनः-न-विकल्प्यते – then it can lead to no more doubt.

Through deep meditation in which the mind has been perfectly stilled, visualize the truth of the Self with the eye of clear realization. If the meaning of the words heard from the Guru is perfectly & indubitably discerned, then it can lead to no more doubt.

स्वस्याविद्याबन्धसम्बन्धमोक्षा-

त्सत्यज्ञानानन्दरूपात्मलब्धौ ।

शास्त्रं युक्तिर्देशिकोक्तिः प्रमाणं

चान्तःसिद्धा स्वानुभूतिः प्रमाणम् ॥ ४७४ ॥

स्वस्य अविद्या-बन्ध-सम्बन्ध-मोक्षात् सत्य-ज्ञान-आनन्द-रूप-आत्मलब्धौ, शास्त्रं युक्तिः देशिकोक्तिः प्रमाणं च अन्तः-सिद्धा-स्वानुभूतिः प्रमाणम् ।

स्वस्य-आत्मलब्धा –in one's realization of the Atman; अविद्या-बन्ध-सम्बन्ध-मोक्षात् – through the breaking of one's connection with bondage of ignorance; सत्य-ज्ञान-आनन्द-रूप –Existence-Knowledge-Bliss Absolute; शास्त्रं – scriptures; युक्तिः – reasoning; देशिकोक्तिः – the words of the Guru; प्रमाणं – are the proofs; अन्तः-सिद्धा-स्वानुभूतिः – one's own experience earned by concentrating the mind; च-प्रमाणम् – is the greatest of all proofs.

In one's realization of the Atman Existence-Knowledge-Bliss Absolute, through the breaking of one's connection with bondage of ignorance, scriptures, reasoning, & the words of the Guru are the proofs; but one's own experience earned by concentrating the mind is the greatest of all proofs.

बन्धो मोक्षश्च तृप्तिश्च चिन्ताऽऽरोग्यक्षुदादयः ।

स्वेनैव वेद्या यज्ज्ञानं परेषामानुमानिकम् ॥ ४७५ ॥

बन्धः मोक्षः च तृप्तिः च चिन्ता-आरोग्य-क्षुदादयः स्वेन एव वेद्या, यत् परेषाम् ज्ञानं आनुमानिकम् ।

बन्धः – bondage; मोक्षः – liberation; च – and; तृप्तिः – satisfaction; च – whereas; चिन्ता – anxiety; आरोग्य – recovery from illness; क्षुदादयः – hunger & other such things; स्वेन-एव-वेद्या – are to be known by the man concern only; यत्-ज्ञानं – knowledge of these; परेषाम् – by others; आनुमानिकम् – is mere inferenceial.

Bondage, liberation, satisfaction, anxiety, recovery from illness, and hunger & other such things are to be known by the man concern only, whereas knowledge of these by others is mere inferential.

तटस्थिता बोधयन्ति गुरवः श्रुतयो यथा ।

प्रज्ञयैव तरेद्विद्वानीश्वरानुगृहीतया ॥ ४७६ ॥

यथा श्रुतयः गुरवः तटस्थिताः बोधयन्ति । विद्वान् ईश्वर-अनुगृहीतया प्रज्ञया एव तरेत्

यथा – as well as; श्रुतयः – the Srutis/Vedas; गुरवः – the Gurus; तटस्थिताः – standing aloof; बोधयन्ति – instruct the disciple; विद्वान् – wise one; ईश्वर-अनुगृहीतया – backed by the grace of God; प्रज्ञया – through illumination; एव – alone; तरेत् – should cross.

The Gurus as well as the Srutis/Vedas instruct the disciple standing aloof; so backed by the grace of God, wise one should cross through illumination alone.

स्वानुभूत्या स्वयं ज्ञात्वा स्वमात्मानमखण्डितम्।

संसिद्धः सम्मुखं तिष्ठेन्निर्विकल्पात्मनाऽऽत्मनि ॥ ४७७ ॥

स्व-अनुभूत्या अखण्डितम् स्वम्-आत्मानम् स्वयं ज्ञात्वा, संसिद्धः निर्विकल्प-आत्मना आत्मनि सम्मुखं तिष्ठेत्।

स्व-अनुभूत्या – through his own realization; अखण्डितम्-स्वम्-आत्मानम् – his indivisible Self; स्वयं – himself; ज्ञात्वा – knowimg; संसिद्धः – becoming perfect; निर्विकल्प-आत्मना – with his mind free from dualistic ideas; आत्मनि – with the Atman; सम्मुखं – face to face; तिष्ठेत् – a man should stand.

Himself knowing his indivisible Self through his own realization and thus becoming perfect, a man should stand face to face with the Atman, with his mind free from dualistic ideas.

वेदान्तसिद्धान्तनिरुक्तिरेषा

ब्रह्मैव जीवः सकलं जगच्च ।

अखण्डरूपस्थितिरेव मोक्षो

ब्रह्माद्वितीये श्रुतयः प्रमाणम् ॥ ४७८ ॥

जीवः च सकलं जगत् ब्रह्म एव एषा वेदान्त-सिद्धान्त-निरुक्तिः अखण्ड-रूपस्थितिः एव मोक्षः ।

ब्रह्म-अद्वितीये श्रुतयः प्रमाणम् ।

जीवः – the soul; च – and; सकलं – the whole; जगत् – universe; ब्रह्म-एव – are nothing but Brahman; एषा – is that; वेदान्त-सिद्धान्त-निरुक्तिः – the verdict of all discussion on the Vedanta; अखण्ड-रूपस्थितिः – abiding in Brahman, the indivisible Entity; मोक्षः – liberation means; ब्रह्म-अद्वितीये – that Brahman is One without a second; श्रुतयः-एव – the Vedas themselves; प्रमाणम् – are authority (for the statement).

The verdict of all discussion on the Vedanta is that the soul and the whole universe are nothing but Brahman, and that liberation means abiding in Brahman, the indivisible Entity. The Vedas themselves– are authority (for the statement) – that Brahman is One without a second.

इति गुरुवचनाच्छ्रुतिप्रमाणात्

परमवगम्य सतत्त्वमात्मयुक्त्या ।

प्रशमितकरणः समाहितात्मा

क्वचिदचलाकृतिरात्मनिष्ठतोऽभूत् ॥ ४७९ ॥

इति गुरुवचनात् श्रुतिप्रमाणात् आत्मयुक्त्या सतत्त्वम् परम् अवगम्य क्वचित् अचलाकृतिः प्रशमितकरणः समाहितात्मा आत्मनिष्ठतः अभूत् ।

इति-गुरुवचनात्-श्रुतिप्रमाणात्-आत्मयुक्त्या – through the above instructions of the Guru, the authority of the scriptures & his own reasoning; सतत्त्वम्-परम् – the Supreme Truth along with Its true nature; अवगम्य – realizing; क्वचित् – at a blessed moment; प्रशमितकरणः-समाहितात्मा – with his

senses quieted & the mind concentrated; अचलाकृतिः-आत्मनिष्ठतः – calm, steady & perfectly established in the Atman/Self; अभूत – the disciple become.

Realizing at a blessed moment, the Supreme Truth along with Its true nature; through the above instructions of the Guru, the authority of the scriptures & his own reasoning; with his senses quieted & the mind concentrated, the disciple become calm, steady & perfectly established in the Atman/Self.

किञ्चित्कालं समाधाय परे ब्रह्मणि मानसम् ।
उत्थाय परमानन्दादिदं वचनमब्रवीत् ॥ ४८० ॥

परे-ब्रह्मणि किञ्चित्-कालं मानसम् समाधाय उत्थाय परम-आनन्दात् इदं-वचनम् अब्रवीत् ।

परे-ब्रह्मणि – on the Supreme Brahman; किञ्चित्-कालं – for some time; मानसम् – the mind; समाधाय – concentrating; उत्थाय – he came down; परम-आनन्दात् – out of supreme bliss; इदं-वचनम् – as follows; अब्रवीत् – he spoke.

Concentrating the mind for some time on the Supreme Brahman; he came down out of supreme bliss, & spoke as follows.

बुद्धिर्विनष्टा गलिता प्रवृत्तिः
ब्रह्मात्मनोरेकतयाऽधिगत्या ।
इदं न जानेऽप्यनिदं न जाने
किं वा कियद्वा सुखमस्त्यपारम् ॥ ४८१ ॥*

ब्रह्म-आत्मनोः एकतया अधिगत्या बुद्धिः विनष्टा, प्रवृत्तिः गलिता, इदं न जाने, अनिदं वा अपि न जाने, अपारम् सुखम् किं वा कियत् अस्ति ।

ब्रह्म-आत्मनोः-एकतया – the identity of the Self & Brahman; अधिगत्या – by realizing; बुद्धिः – my mind; विनष्टा – has vanished; प्रवृत्तिः – all its activities; गलिता – have melted; इदं-न-जाने-अनिदं-अपि-वा-न-जाने – I do not know either this or non-this; अपारम् – the boundless; सुखम् – Bliss; किं – of what nature; वा – or; कियत् – of what measure; अस्ति – is.

My mind has vanished & all its activities have melted, by realizing the identity of the Self & Brahman; I do not know either this or non-this (i.e. either of relative entity); nor can I explain of what nature or of what measure the boundless Bliss of my experience is!

वाचा वक्तुमशक्यमेव मनसा मन्तुं न वा शक्यते
स्वानन्दामृतपूरपूरितपरब्रह्माम्बुधेर्वैभवम् ।
अम्भोराशिविशीर्णवार्षिकशिलाभावं भजन्मे मनो
यस्यांशांशलवे विलीनमधुनाऽऽनन्दात्मना निर्वृतम् ॥ ४८२ ॥

स्व-आनन्द-अमृत-पूर-पूरित-पर-ब्रह्म-अम्बुधेः वैभवम् वाचा वक्तुम् अशक्यम् एव, वा मनसा मन्तुं न शक्यते । अम्भोराशि-विशीर्ण-वार्षिक-शिलाभावं मे मनः भजत्, यस्य अंश-अंश-लवे विलीनम्, अधुना आनन्द-आत्मना निर्वृतम् ।

स्व-आनन्द्-अमृत-पूर-पूरित-पर-ब्रह्म-अम्बुधेः – of the ocean of Supreme Brahman replete with the swell of the nectar like Bliss of the Self; वैभवम् – the majesty; वाचा – in speech; वक्तुम् – to express; अशक्यम् – is verily impossible; न-वा-एव-शक्यते – nor can it be; मनसा – by the mind; मन्तुं – conceived; अम्भोराशि-विशीर्ण-वार्षिक-शिलाभावं-भजत् – like a hailstone getting merged in the ocean; मे-मनः – my mind; यस्य – of which; अंश-अंश-लवे –in an infinitesimal fraction; विलीनम् – melted; अधुना – and is now; आनन्द्-आत्मना – with that Essence of Bliss; निर्वृतम् – satisfied.

Te majesty of the ocean of Supreme Brahman replete with the swell of the nectar like Bliss of the Self, is verily impossible to express in speech, nor can it be conceived by the mind; an infinitesimal fraction of which my mind melted like a hailstone getting merged in the ocean, and is now satisfied with that Essence of Bliss.

क्व गतं केन वा नीतं कुत्र लीनमिदं जगत्।

अधुनैव मया दृष्टं नास्ति किं महदद्भुतम्॥ ४८३॥

इदं जगत् क्व गतं केन वा नीतं, कुत्र लीनम्? मया अधुना एव दृष्टं, न अस्ति किं महत् अद्भुतम ?

इदं-जगत् –the universe; क्व – where; गतं – has gone; केन-वा – by whom; नीतं – it is removed; कुत्र – where; लीनम् – it is merged; मया – by me; अधुना – now; एव – just; दृष्टं – seen; न-अस्ति -किं– has it ceased to exist; महत्-अद्भुतम – it is passing strange;

Where has gone the universe, by whom it is removed, or where it is merged? It was just now seen by me, has it ceased to exist? It is passing strange!

किं हेयं किमुपादेयं किमन्यत्किं विलक्षणम्।

अखण्डानन्दपीयूषपूर्णे ब्रह्ममहार्णवे॥ ४८४॥

अखण्ड-आनन्द-पीयूष-पूर्णे ब्रह्म-महा-अर्णवे उपादेयं-किं, हेयं-किं, किं-अन्यत् किं-विलक्षणम्?

अखण्ड-आनन्द-पीयूष-पूर्णे – filled with the nectar of Absolute Bliss; ब्रह्म-महा-अर्णवे – in the ocean of Brahman; उपादेयं-किं – what is to be shunned; हेयं-किं – what is to be accepted; किं-अन्यत् – what is other (than oneself); किं-विलक्षणम – what is different?

In the ocean of Brahman filled with the nectar of Absolute Bliss, what is to be shunned, or what is to be accepted, as well what is other (than oneself), or what is different?

न किञ्चिदत्र पश्यामि न शृणोमि न वेद्म्यहम्।

स्वात्मनैव सदानन्दरूपेणास्मि विलक्षणः॥ ४८५॥

अहम् अत्र न किञ्चिद् पश्यामि, न शृणोमि, न वेद्मि। स्व-आत्मना एव सदानन्दरूपेण विलक्षणः अस्मि।

अहम् – I; अत्र – in this; न – neither; किञ्चिद् – anything; पश्यामि – see; न – nor; शृणोमि – hear; न – nor; वेद्मि – know ; स्व-आत्मना –the Self; एव – simply; सदानन्दरूपेण – the Eternal Bliss; विलक्षणः – distinct from everything else; अस्मि – I exist as.

I neither see nor hear nor anything in this (state of realization). I simply exist as the Self, the Eternal Bliss, distinct from everything else.

नमो नमस्ते गुरवे महात्मने

विमुक्तसङ्गाय सदुत्तमाय ।

नित्याद्वयानन्दरसस्वरूपिणे

भूम्ने सदाऽपारदयाम्बुधाम्ने ॥ ४८६ ॥

गुरवे अद्वय-नित्य-आनन्दरस-स्वरूपिणे, भूम्ने, अपार-सदा-दया-अम्बु-धाम्ने, सदुत्तमाय, विमुक्तसङ्गाय, महात्मने ते नमो नमः ।

अद्वय – the one without second; नित्य-आनन्दरस-स्वरूपिणे – the embodiment of the essence of Eternal Bliss; भूम्ने – infinite; अपार-सदा-दया-अम्बु-धाम्ने – ever the boundless ocean of mercy; सदुत्तमाय – the best among the good souls; विमुक्तसङ्गाय – devoid of detachment; महात्मने-गुरवे – O noble Teacher; ते – to you; नमो-नमः – repeated salutations.

Repeated salutations to you, O noble Teacher, who are: devoid of detachment, the best among the good souls and the embodiment of the essence of Eternal Bliss, the one without second, infinite, and ever the boundless ocean of mercy.

यत्कटाक्षशशिसान्द्रचन्द्रिका-

पातधूतभवतापजश्रमः ।

प्राप्तवानहमखण्डवैभवा-

नन्दमात्मपदमक्षयं क्षणात् ॥ ४८७ ॥

यत्-कटाक्ष-शशि-सान्द्र-चन्द्रिका-पात-धूत-भवतापज-श्रमः *अखण्ड-वैभवानन्दम् अक्षयं-आत्मपदम् क्षणात* अहम्-प्राप्तवान् ।

यत्-कटाक्ष – whose glance; शशि-सान्द्र-चन्द्रिका-पात –like the shower of concentrated moonbeams; धूत-भवतापज-श्रमः – has removed my exhaustion brought on by the afflictions of the world; अखण्ड-वैभवानन्दम् – the Bliss of infinite majesty; अक्षयं-आत्मपदम् – the undecaying status of the Atman; क्षणात – in a moment; अहम्-प्राप्तवान – admitted me to.

Whose glance, like the shower of concentrated moonbeams, has removed my exhaustion brought on by the afflictions of the world, and in a moment admitted me to the undecaying status of the Atman, the Bliss of infinite majesty!

धन्योऽहं कृतकृत्योऽहं विमुक्तोऽहं भवग्रहात् ।

नित्यानन्दस्वरूपोऽहं पूर्णोऽहं त्वदनुग्रहात् ॥ ४८८ ॥

त्वदनुग्रहात् अहं-धन्यः, अहं-कृतकृत्यः, अहं-भवग्रहात्-विमुक्तः अहं-नित्यानन्दस्वरूपः, अहं-पूर्णः ।

त्वदनुग्रहात् – all through thy grace; अहं-धन्यः – blessed am I; अहं-कृतकृत्यः – I have attained the consummation of my life; अहं-भवग्रहात्-विमुक्तः – am free from the clutches of transmigration; अहं-नित्यानन्दस्वरूपः – I am the Essence of Eternal Bliss; अहं-पूर्णः – I am infinite.

Blessed am I, I have attained the consummation of my life, I am the Essence of Eternal Bliss, I am infinite - all through thy grace am free from the clutches of transmigration!

असङ्गोऽहमनङ्गोऽहमलिङ्गोऽहमभङ्गुरः ।

प्रशान्तोऽहमनन्तोऽहममलोऽहं चिरन्तनः ॥ ४८९ ॥

अहम्-असङ्गः, अहम्-अनङ्गः, अहम्-अलिङ्गः-अभङ्गुरः,अहम्-प्रशान्तः, अहम्-अनन्तः, अहं-अमलः चिरन्तनः ।

अहम्-असङ्गः – I am unattached; अहम्-अनङ्गः – I am disembodied; अहम्-अलिङ्गः-अभङ्गुरः – I am free from the subtle body, & undecaying; अहम्-प्रशान्तः – I am serene; अहम्-अनन्तः – I am infinite; अहं-अमलः-चिरन्तनः – I am taintless, & eternal.

I am unattached, I am disembodied, I am serene, I am infinite, I am free from the subtle body & undecaying, as well I am taintless & eternal.

अकर्ताहमभोक्ताहमविकारोऽहमक्रियः ।

शुद्धबोधस्वरूपोऽहं केवलोऽहं सदाशिवः ॥ ४९० ॥

अहम्-अकर्ता अहम्-अभोक्ता अहम्-अविकारः-अक्रियः अहं-शुद्धबोधस्वरूपः अहं-केवलः-सदाशिवः ।

अहम्-अकर्ता – I am not the doer; अहम्-अभोक्ता – I am not the experience; अहम्-अविकारः-अक्रियः – I am changeless & beyond activity; अहं-शुद्धबोधस्वरूपः – I am the Essence of Pure Knowledge; अहं-केवलः-सदाशिवः – I am Absolute & identified with Eternal God.

I am not the doer, I am not the experience, but I am changeless & beyond activity, I am the Essence of Pure Knowledge, I am Absolute & identified with Eternal God.

द्रष्टुः श्रोतुर्वक्तुः कर्तुर्भोक्तुर्विभिन्न एवाहम् ।

नित्यनिरन्तरनिष्क्रियनिःसीमासङ्गपूर्णबोधात्मा ॥ ४९१ ॥

द्रष्टुः – the seer; श्रोतुः – listener; वक्तुः – speaker; कर्तुः – doer; भोक्तुः – experiencer; विभिन्नः – different from; एव – indeed; नित्य – eternal; निरन्तर – without any break; निष्क्रिय – beyond activity; निःसीम – limitless; असङ्ग – unattached; पूर्ण – infinite; बोध – the Essence of Knowledge; आत्मा – the Self; अहम् – I am.

Indeed different from the seer, listener, speaker, doer, & experience I am the Self which is the Essence of Knowledge, eternal, without any break, beyond activity, limitless, unattached & infinite.

नाहमिदं नाहमदोऽप्युभयोरवभासकं परं शुद्धम् ।

बाह्याभ्यन्तरशून्यं पूर्णं ब्रह्माद्वितीयमेवाहम् ॥ ४९२ ॥

इदं-न-अहम्-अदः-अपि-न-अहम् – I am neither this nor that; उभयोः – of both; अवभासकं – the illuminer; शुद्धम् – pure; बाह्याभ्यन्तर – interior or exterior; शून्यं – devoid of; पूर्णं – infinite; अद्वितीयम् – the one without second; परं – the Supreme; ब्रह्म – Brahman; एव – indeed; अहम् – I am.

I am neither this nor that, but the Supreme Brahman, infinite, the one without second, devoid of interior or exterior – pure – the illuminer of both.

निरुपममनादितत्त्वं त्वमहमिदमद इति कल्पनादूरम् ।

नित्यानन्दैकरसं सत्यं ब्रह्माद्वितीयमेवाहम् ॥ ४९३ ॥

अहम् निरुपमम् अनादि-तत्त्वं 'त्वम्' 'अहम्' 'इदम्' 'अदः' इति कल्पनादूरम्, नित्यानन्द-एकरसं सत्यं अद्वितीयम् ब्रह्म एव (अस्मि)।

अहम् – I am; निरुपमम् – matchless; अनादि-तत्त्वं – the Reality that has no beginning, 'त्वम्'-'अहम्'-'इदम्'-'अदः'-इति-कल्पनादूरम् – beyond such imaginations as you,or I, or this, or that; नित्यानन्द-एकरसं – the Essence of Eternal Bliss; सत्यं – the Truth; अद्वितीयम् – the one without second; ब्रह्म – Brahman; एव – indeed.

I am indeed Brahman, the one without second, the Reality that has no beginning, the Essence of Eternal Bliss, the Truth beyond such imaginations as you, or I, or this, or that.

नारायणोऽहं नरकान्तकोऽहं
पुरान्तकोऽहं पुरुषोऽहमीशः।
अखण्डबोधोऽहमशेषसाक्षी
निरीश्वरोऽहं निरहं च निर्ममः॥ ४९४॥

अहं नारायणः-नरक-अन्तकः, अहं पुर-अन्तकः, अहं पुरुषः, अहं ईशः, अहं-निरीश्वरः, अहं-निरहं-च-निर्ममः, अहं अखण्डबोधः-अशेषसाक्षी।

अहं – I am; नारायणः – Narayana; नरक-अन्तकः – the slayer of Naraka; अहं – I am; पुर-अन्तकः – the destroyer of Tripura; अहं – I am; पुरुषः – the Supreme Being; अहं – I am; ईशः – the Ruler; अहं – I am; अखण्डबोधः – knowledge Absolute; अशेषसाक्षी – the witness of everything; अहं-निरीश्वरः – I have no other Ruler; अहं-निरहं-च-निर्ममः – I am devoid of the ideas of "I" & "mine".

I am Narayana, the slayer of Naraka, I am the destroyer of Tripura, I am the Supreme Being, I am the Ruler, I have no other Ruler, I am devoid of the ideas of "I" & "mine", I am knowledge Absolute the witness of everything.

सर्वेषु भूतेष्वहमेव संस्थितो
ज्ञानात्मनाऽन्तर्बहिराश्रयः सन्।
भोक्ता च भोग्यं स्वयमेव सर्वं
यद्यत्पृथग्दृष्टमिदन्तया पुरा॥ ४९५॥

सर्वेषु-भूतेषु ज्ञान-आत्मना अन्तः-बहिः-आश्रयः-सन् अहम् एव संस्थितः।

(अहम्)-स्वयम-एव इदम्-तया-पृथक्-दृष्टं-सर्वं, यद्-यद्-पुरा-भोग्यं-भोक्ता-एव च।

सर्वेषु-भूतेषु – in all beings; ज्ञान-आत्मना – as knowledge; अन्तः-बहिः-आश्रयः-सन् – being their internal & external support; अहम् – I; एव – alone; संस्थितः – reside; (अहम्)-स्वयम-एव – I myself am; इदम्-तया-पुरा-पृथक्-दृष्टं-सर्वं – whatever I looked upon different as 'this' previously; यद्-यद्-भोग्यं-भोक्ता-एव – the experiencer as well all that is experienced; च – and.

I alone reside as knowledge in all beings, being their internal & external support. I myself am the experiencer as well all that is experienced, and whatever I looked upon different as 'this' previously.

मय्यखण्डसुखाम्भोधौ बहुधा विश्ववीचयः।

उत्पद्यन्ते विलीयन्ते मायामारुतविभ्रमात्॥ ४९६॥

अखण्ड-सुख-अम्भोधौ मयि माया-मारुत-विभ्रमात् बहुधा विश्ववीचयः उत्पद्यन्ते विलीयन्ते ।

अखण्ड-सुख-अम्भोधौ – the ocean of Infinite Bliss; मयि – in me; माया-मारुत-विभ्रमात् – by the playing of the wind of Illusion; बहुधा – various; विश्ववीचयः – waves of the universe; उत्पद्यन्ते – created; विलीयन्ते – destroyed.

In me, the ocean of Infinite Bliss, various waves of the universe are created & destroyed by the playing of the wind of Illusion/Maya.

स्थुलादिभावा मयि कल्पिता भ्रमा-

दारोपितानुस्फुरणेन लोकैः।

काले यथा कल्पकवत्सराय-

णत्वा‍र्दयो निष्कलनिर्विकल्पे ॥ ४९७ ॥*

यथा काले अनुस्फुरणेन कल्पक-वत्सर-अयन-ऋतु-आदयः लोकैः कल्पिताः निष्कल-निर्विकल्पे मयि स्थुलादि भावा भ्रमात् आरोपिताः।

यथा – just as; काले – in the time; अनुस्फुरणेन – as per worldly/relative experiences; कल्पक – cycles; वत्सर – years; अयन – half-years; ऋतु – seasons; आदयः – etc.; लोकैः – by people; कल्पिताः – are imagined; निष्कल-निर्विकल्पे-मयि – in me who is Indivisible & Absolute; स्थुलादि-भावा – such ideas as gross & alike; भ्रमात् – erroneously; आरोपिताः – are imposed.

Such ideas as gross & alike are erroneously imposed in me who is Indivisible & Absolute; just as cycles, half-years, seasons etc. are imagined in the time as per worldly/relative experiences.

आरोपितं नाश्रयदूषकं भवेत्

कदापि मूढैरतिदोषदूषितैः।

नार्द्रिकरोत्यूषरभूमिभागं

मरीचिकावारि महाप्रवाहः॥ ४९८॥

अतिदोष-दूषितैः मूढैः आरोपितं आश्रयदूषकं कदा अपि न भवेत् ।

मरीचिका-वारि-महाप्रवाहः उषर-भूमि-भागं न आर्द्रिकरोति।

अतिदोष-दूषितैः-मूढैः – by the grossly ignorant fools; आरोपितं – that which is superimposed; आश्रयदूषकं-कदा-अपि-न-भवेत् – can never taint the substratum; मरीचिका-वारि-महाप्रवाहः – the great rush of waters observed in mirage; उषर-भूमि-भागं – the desert tracts; न – never; आर्द्रिकरोति – wets.

That which is superimposed by the grossly ignorant fools can never taint the substratum: the great rush of waters observed in mirage never wets the desert tracts.

आकाशवल्लेपविदूरगोऽहं

आदित्यवद्भास्यविलक्षणोऽहम्।

अहार्यवन्नित्यविनिश्चलोऽहं

अम्भोधिवत्पारविवर्जितोऽहम्॥ ४९९॥

अहं आकाशवत् लेपविदूरगः, भास्यविलक्षणः आदित्यवत् अहम्, अहार्यवत् नित्यविनिश्चलः अहं,

अहम् अम्भोधिवत् पारविवर्जितः।

अहं – I am; आकाशवत् – like the sky; लेपविदूरगः – beyond contamination; भास्यविलक्षणः – distinct from things illumined; आदित्यवत् – like the sun; अहम् – I am; अहार्यवत् – like the mountain; नित्यविनिश्चलः – always motionless; अहं – I am; अहम् – I am; अम्भोधिवत् – like the ocean; पारविवर्जितः – limitless.

I am beyond contamination like the sky; I am distinct from things illumined like the sun; I am always motionless like the mountain; I am limitless like the ocean.

न मे देहेन सम्बन्धो मेघेनेव विहायसः।

अतः कुतो मे तद्धर्मा जाग्रत्स्वप्नसुषुप्तयः॥ ५००॥

विहायसः मेघेन इव, मे देहेन सम्बन्धः न।

अतः तद्धर्माः जाग्रत्-स्वप्न-सुषुप्तयः मे कुतः।

विहायसः – the sky; मेघेन – with clouds; इव – as; मे – I have; देहेन – with the body; सम्बन्धः – connection; न – no; अतः – so; तद्धर्माः – which are attributes of body; जाग्रत्-स्वप्न-सुषुप्तयः – the states of wakefulness, dream, & profound sleep; मे – affect me; कुतः – how can.

I have no connection with the body, as the sky (has no connection) with clouds; so how can the states of wakefulness, dream, & profound sleep, which are attributes of body affect me.

उपाधिरायाति स एव गच्छति

स एव कर्माणि करोति भुङ्क्ते।

स एव जीर्यन् म्रियते सदाहं

कुलाद्रिवन्निश्चल एव संस्थितः॥ ५०१॥

उपाधिः आयाति स एव गच्छति, स एव कर्माणि करोति भुङ्क्ते।

सः एव जीर्यन् म्रियते। कुलाद्रिवत् सदा निश्चलः एव अहं संस्थितः।

उपाधिः – superimposed attribute; आयाति – comes; स – that; एव – alone; गच्छति – goes; स – that; एव – again; कर्माणि – actions; करोति – performs; भुङ्क्ते – experiences; सः – that; एव – alone; जीर्यन् – decays; म्रियते – dies; कुलाद्रिवत् – like the Kula mountain; सदा – ever; निश्चलः – firm; एव – अहं – I; संस्थितः – remain.

It is superimposed attribute *(upadhi)* that comes, and it is that alone which goes; that again performs actions and experiences (their fruits), that alone decays and dies; whereas I ever remain firm like the Kula mountain.

न मे प्रवृत्तिर्न च मे निवृत्तिः

सदैकरूपस्य निरंशकस्य ।

एकात्मको यो निबिडो निरन्तरो

व्योमेव पूर्णः स कथं नु चेष्टते ॥ ५०२ ॥

सदा एकरूपस्य निरंशकस्य मे प्रवृत्तिः न मे न च निवृत्तिः ।

यः एकात्मकः निबिडो निरन्तरः व्योम इव पूर्णः सः कथं नु चेष्टते ?

सदा-एकरूपस्य-निरंशकस्य-मे – for me who am always the same & devoid of parts;

प्रवृत्तिः-न-मे-न-च-निवृत्तिः – there is neither engaging in work noe cession from it;

यः-एकात्मकः-निबिडा-निरन्तरः-व्योम-इव-पूर्णः – which is one, concentrated, without break & infinite like the sky; सः-कथं-नु-चेष्टते – how can that, ever strive ?

For me who am always the same & devoid of parts, there is neither engaging in work nor cession from it. How can that which is one, concentrated, without break & infinite like the sky, ever strive?

पुण्यानि पापानि निरिन्द्रियस्य

निश्चेतसो निर्विकृतेर्निराकृतेः ।

कुतो ममाखण्डसुखानुभूतेः

ब्रूते ह्यनन्वागतमित्यपि श्रुतिः ॥ ५०३ ॥

निरिन्द्रियस्य निश्चेतसः निर्विकृतेः निराकृतेः अखण्डसुखानुभूतेः मम् पुण्यानि पापानि कुत ?

हि अनन्वागतम् इति श्रुतिः अपि ब्रूते ।

निरिन्द्रियस्य – without organs; निश्चेतसः – without mind; निर्विकृतेः – changeless; निराकृतेः – formless; अखण्डसुखानुभूतेः – who has the realization of Bliss Absolute; मम् – for me; पुण्यानि – merits; पापानि – demerits; कुत – how can there be; हि-अनन्वागतम् – 'Verily Not touched'; इति – as; श्रुतिः – Brhadaranyakopnisad; अपि – also; ब्रूते – mention this.

How can there be merits & demerits for me, who am: without organs, without mind, changeless, formless, and who has the realization of Bliss Absolute? Brhadaranyakopnisad also mention this as 'Verily Not touched'.

छायया स्पृष्टमुष्णं वा शीतं वा सुष्ठु दुःष्ठु वा ।

न स्पृशत्येव यत्किञ्चित्पुरुषं तद्विलक्षणम् ॥ ५०४ ॥

छायया स्पृष्टम उष्णं वा शीतं वा सुष्ठु वा दुःष्ठु, तद्विलक्षणम् पुरुषं यत् किञ्चित् एव न स्पृशति ।

छायया – the shadow of a man's body; स्पृष्टम – happen to touch; उष्णं – heat; वा – or; शीतं – cold; वा – or; सुष्ठु – good; वा – or; दुःष्ठु – evil; तद्विलक्षणम् – who is distinct from the shadow; पुरुषं – the man himself; यत्-किञ्चित् – in the least; न-एव-स्पृशति – it affects not.

If heat or cold or good or evil happen to touch the shadow of a man's body, it affects not in the least the man himself, who is distinct from the shadow.

न साक्षिणं साक्ष्यधर्माः संस्पृशन्ति विलक्षणम्।

अविकारमुदासीनं गृहधर्माः प्रदीपवत्॥ ५०५॥

प्रदीपवत्-गृहधर्माः, साक्ष्यधर्माः विलक्षणम् अविकारम् उदासीनं साक्षिणं न संस्पृशन्ति।

प्रदीपवत्-गृहधर्माः – as properties of a room (do not affect) the lamp (that illumines it); साक्ष्यधर्माः – the properties of things observed; विलक्षणम् – which is distinct from them; अविकारम् – changeless; उदासीनं – indifferent; साक्षिणं – the witness; न-संस्पृशन्ति – do not affect.

The properties of things observed do not affect the witness, which is distinct from them, changeless & indifferent; as properties of a room (do not affect) the lamp (that illumines it).

रवेर्यथा कर्मणि साक्षिभावो

वन्हेर्यथा दाहनियामकत्वम्।

रज्जोर्यथाऽऽरोपितवस्तुसङ्गः

तथैव कूटस्थचिदात्मनो मे॥ ५०६॥

रवेः यथा कर्मणि साक्षिभावः, यथा वन्हेः दाहनियामकत्वम्, यथा रज्जोः आरोपित-वस्तु-सङ्गः तथा एव कूटस्थ-चिदात्मनः मे।

रवेः – the sun; यथा – as; कर्मणि – of men's action; साक्षिभावः – is a mere witness; यथा – as; वन्हेः – fire; दाहनियामकत्वम् – burns everything without distinction; यथा – as; रज्जोः – the rope; आरोपित-वस्तु-सङ्गः – is related to a thing superimposed; तथा-एव – just like that; कूटस्थ – the unchangeable Self; चिदात्मनः – the Intelligence Absolute; मे – mine relation with other.

As fire burns everything without distinction, as the sun is a mere witness of men's action, as the rope is related to a thing superimposed; just like that is - the Intelligence Absolute & unchangeable Self - mine relation with other.

कर्तापि वा कारयितापि नाहं

भोक्तापि वा भोजयितापि नाहम्।

द्रष्टापि वा दर्शयितापि नाहं

सोऽहं स्वयंज्योतिरनीदृगात्मा॥ ५०७॥

अहं कर्ता अपि न वा कारयिता अपि। अहम् भोक्ता अपि न वा भोजयिता अपि।

अहं द्रष्टा अपि न वा दर्शयिता अपि। अहं अनीदृग् स्वयंज्योतिः सः आत्मा।

अहं – I; कर्ता-अपि-न-वा-कारयिता-अपि – neither do nor make others do any action; अहम् – I; भोक्ता-अपि-न-वा-भोजयिता-अपि – neither enjoy nor make others enjoy; अहं – I; द्रष्टा-अपि-न-वा-दर्शयिता-अपि – neither see nor make others see; अहं – I am; अनीदृग् – Transcendent; स्वयंज्योतिः – Self-effulgent; सः – that; आत्मा – Atman.

I neither do nor make others do any action; I neither enjoy nor make others enjoy; I neither see nor make others see; I am that Self-effulgent, Transcendent Atman.

चलत्युपाधौ प्रतिबिम्बलौल्य-
मौपाधिकं मूढधियो नयन्ति ।
स्वबिम्बभूतं रविवद्विनिष्क्रियं
कर्तास्मि भोक्तास्मि हतोऽस्मि हेति ॥ ५०८ ॥

मूढधियः उपाधौ चलति 'कर्ता अस्मि', 'भोक्ता अस्मि', 'हा हतः अस्मि', इति औपाधिकं प्रतिबिम्बलौल्य स्वबिम्बभूतं विनिष्क्रियं रविवत् नयन्ति ।

उपाधौ-चलति – when the supervening adjunct is moving; 'कर्ता-अस्मि' – 'I am the doer'; 'भोक्ता-अस्मि' –'I am the experiencer'; 'हा-हतः-अस्मि' – 'Oh, alas! I am killed'; इति – औपाधिकं-प्रतिबिम्बलौल्य – the resulting movement; स्वबिम्बभूतं – of the reflection; विनिष्क्रियं – which is free from activity; रविवत् – such as the sun; मूढधियः-नयन्ति – is ascribed by fools to the object reflected.

When the supervening adjunct is moving, the resulting movement of the reflection is ascribed by fools to the object reflected such as the sun, which is free from activity (and they think) 'I am the doer', 'I am the experiencer', 'Oh, alas! I am killed'.

जले वापि स्थले वापि लुठत्वेष जडात्मकः ।
नाहं विलिप्ये तद्धर्मैर्घटधर्मैर्नभो यथा ॥ ५०९ ॥

एषः-जड-आत्मकः जले-वा-अपि-स्थल-वा-अपि लुठतु ।
अहं तद्धर्मैः न-विलिप्ये, यथा नभः घटधर्मैः ।

एषः-जड-आत्मकः – let this inert body; जले-वा-अपि-स्थल-वा-अपि – in water or on land; लुठतु – drop down; अहं – I am; तद्धर्मैः – by its properties; न-विलिप्ये – not touched; यथा – like; नभः – sky; घटधर्मैः – by the properties of jar.

Let this inert body drop down in water or on land, I am not touched by its properties, like sky by the properties of jar.

कर्तृत्वभोक्तृत्वखलत्वमत्तता-
जडत्वबद्धत्वविमुक्ततादयः ।
बुद्धेर्विकल्पा न तु सन्ति वस्तुतः
स्वस्मिन्परे ब्रह्मणि केवलेऽद्वये ॥ ५१० ॥

कर्तृत्व-भोक्तृत्व-खलत्व-मत्तता-जडत्व-बद्धत्व-विमुक्तता-आदयः बुद्धेः-विकल्पाः सन्ति, न तु वस्तुतः केवले अद्वये परे ब्रह्मणि स्वस्मिन् ।

कर्तृत्व – agency; भोक्तृत्व – experience; खलत्व – cunning; मत्तता – drunkenness; जडत्व – dullness; बद्धत्व – bondage; विमुक्तता – freedom; आदयः – such as; बुद्धेः-विकल्पाः – the passing states of the intellect; सन्ति – are; न-तु-वस्तुतः – never in reality; केवले – the Absolute; अद्वये – the one without second; परे-ब्रह्मणि – the Supreme Brahman; स्वस्मिन् – in the Self.

The passing states of the intellect, such as agency, experience, cunning, drunkenness, dullness, bondage & freedom are never in reality in the Self, the Supreme Brahman, the Absolute, the one without second.

सन्तु विकाराः प्रकृतेर्दशधा शतधा सहस्रधा वापि ।

किं मेऽसङ्गचितस्तैर्न घनः क्वचिदम्बरं स्पृशति ॥ ५११ ॥

प्रकृतेः दशधा शतधा वा सहस्रधा अपि विकाराः सन्तु, असङ्गचितः मे तैः किं ? (यथा) घनः अम्बरं क्वचित् न स्पृशति ।

प्रकृतेः – in nescience; दशधा-शतधा-सहस्रधा-वा-अपि – in ten a hundred or even a thousand ways;– विकाराः – changes; सन्तु – let there be; असङ्गचितः – the unattached Consciousness; मे-किं – what have I; तैः – got to do with them; (यथा) घनः – the clouds; अम्बरं – the sky; क्वचित्-न – never do; स्पृशति – touch.

Let there be changes in nescience/Prakrti in ten a hundred or even a thousand ways, what have I, the unattached Consciousness, got to do with them? Never do the clouds touch the sky.

अव्यक्तादिस्थूलपर्यन्तमेतत्

विश्व यत्राभासमात्रं प्रतीतम् ।

व्योमप्रख्यं सूक्ष्ममाद्यन्तहीनं

ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१२ ॥

यत्र अव्यक्तादि-स्थूलपर्यन्तम् एतत् विश्व आभासमात्रं-प्रतीतम्, यत् व्योमप्रख्यं सूक्ष्मम् आदि-अन्तहीनं अद्वैतं ब्रह्म तत् एव अहम् अस्मि ।

यत्र – in; अव्यक्तादि-स्थूलपर्यन्तम् – from the undifferentiated down to the gross body; एतत्-विश्व – the whole universe; आभासमात्रं – merely as a shadow; प्रतीतम् – appears; यत् – which; व्योमप्रख्यं – which is like the sky; सूक्ष्मम् – subtle; आदि-अन्तहीनं – without beginning or end; अद्वैतं – the one without second; ब्रह्म – Brahman; तत् – that; एव – verily; अहम् – I; अस्मि – am.

I am verily that Brahman, the one without second, which is like the sky, subtle, without beginning or end, in which the whole universe from the undifferentiated down to the gross body appears merely as a shadow.

सर्वाधारं सर्ववस्तुप्रकाशं

सर्वाकारं सर्वगं सर्वशून्यम् ।

नित्यं शुद्धं निश्चलं निर्विकल्पं

ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१३ ॥

यत् सर्वाधारं सर्ववस्तुप्रकाशं सर्वाकारं सर्वगं सर्वशून्यम् नित्यं शुद्धं निश्चलं निर्विकल्पं तत् अद्वैतं ब्रह्म एव अहम् अस्मि ।

यत् – which is; सर्वाधारं – the support of all; सर्ववस्तुप्रकाशं – which illumines all things; सर्वाकारं – with infinite forms; सर्वगं – omnipresent; सर्वशून्यम् – devoid of multiplicity; नित्यं – eternal;

शुद्धं – pure; निश्चलं – unmoved; निर्विकल्पं – absolute; अद्वैतं – the one without second; ब्रह्म – Brahman; तत् – that; एव – verily; अहम् – I; अस्मि – am.

I am verily that Brahman, the one without second, with infinite forms, which illumines all things, which is: the support of all, omnipresent, devoid of multiplicity, eternal, pure, unmoved, and absolute.

यत्प्रत्यस्ताशेषमायाविशेषं
प्रत्यग्रूपं प्रत्ययागम्यमानम् ।
सत्यज्ञानानन्तमानन्दरूपं
ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१४ ॥

यत् प्रत्यस्त-अशेषमायाविशेषं प्रत्यग्-रूपं प्रत्यय-अगम्यमानम् सत्य-ज्ञान-अनन्तम् आनन्दरूपं अद्वैतं ब्रह्म तत् एव अहम् अस्मि ।

यत् – which is; प्रत्यस्त-अशेषमायाविशेषं – which transcends the endless differentiations of Maya or nescience; प्रत्यग्-रूपं – which is the inmost essence of all; प्रत्यय-अगम्यमानम् – is beyond the range of consciousness; सत्य-ज्ञान-अनन्तम् – which is Truth, Knowledge, Infinity; आनन्दरूपं – Bliss Absolute; अद्वैतं – the one without second; ब्रह्म – Brahman; तत् – that; एव – verily; अहम् – I; अस्मि – am.

I am verily that Brahman, the one without second, which transcends the endless differentiations of Maya or nescience, which is the inmost essence of all, is beyond the range of consciousness, & which is Truth, Knowledge, Infinity, and Bliss Absolute.

निष्क्रियोऽस्म्यविकारोऽस्मि
निष्कलोऽस्मि निराकृतिः ।
निर्विकल्पोऽस्मि नित्योऽस्मि
निरालम्बोऽस्मि निर्द्वयः ॥ ५१५ ॥

अहम् निष्क्रियः अस्मि, अविकारः अस्मि, निष्कलः अस्मि, निराकृतिः निर्विकल्पः अस्मि, नित्यः अस्मि, निरालम्बः निर्द्वयः अस्मि ।

अहम् – I am; निष्क्रियः-अस्मि – without activity; अविकारः-अस्मि – changeless; निष्कलः-अस्मि – without parts; निराकृतिः-अस्मि – formless; निर्विकल्पः-अस्मि – absolute;नित्यः-अस्मि – eternal; निरालम्बः-अस्मि – without any other support; निर्द्वयः-अस्मि – the one without second.

I am: without activity, changeless, without parts, formless, absolute, eternal, without any other support, the one without second.

सर्वात्मकोऽहं सर्वोऽहं सर्वातीतोऽहमद्वयः ।
केवलाखण्डबोधोऽहमानन्दोऽहं निरन्तरः ॥ ५१६ ॥

अहं-सर्वात्मकः, अहं-सर्वः, अहम्-सर्वातीतः-अद्वयः, अहं-केवल-अखण्ड-बोधः, अहं-निरन्तरः-आनन्दः ।

अहं-सर्वात्मकः – I am the Universal; अहं-सर्वः – I am the all; अहम्-सर्वातीतः-अद्वयः – I am transcendent, one without second; अहं-केवल-अखण्ड-बोधः – I am Absolute & Infinite-Knowledge; अहं-निरन्तरः-आनन्दः – I am the indivisible Bliss.

I am the Universal, I am the all, I am transcendent, one without second, I am Absolute & Infinite-Knowledge and I am the indivisible Bliss.

शिष्य उवाच ।

स्वाराज्यसाम्राज्यविभूतिरेषा

भवत्कृपाश्रीमहिमप्रसादात् ।

प्राप्ता मया श्रीगुरवे महात्मने

नमो नमस्तेऽस्तु पुनर्नमोऽस्तु ॥ ५१७ ॥

शिष्य उवाच । भवत्-कृपाश्रीमहिम-प्रसादात् मया एषा स्वाराज्य-साम्राज्य-विभूतिः प्राप्ता । श्रीगुरवे! महात्मने! ते-नमः-अस्तु । पुनः-नमः-नमः-अस्तु ।

शिष्य उवाच – the aspirant responded

भवत्-कृपाश्रीमहिम-प्रसादात् – by virtue of the supreme majesty of your grace; एषा – this; स्वाराज्य-साम्राज्य-विभूतिः – splendor of the sovereignty of Self-effulgence; मया-प्राप्ता – I have received; श्रीगुरव-महात्मने – O glorious, noble-minded Teacher; ते-नमः-अस्तु – salutations to you; पुनः-नमः-नमः-अस्तु – salutations again & again.

The aspirant responded…

This splendor of the sovereignty of Self-effulgence I have received by virtue of the supreme majesty of your grace. Salutations to you, O glorious, noble-minded Teacher, salutations again & again.

महास्वप्ने मायाकृतजनिजरामृत्युगहने

भ्रमन्तं क्लिश्यन्तं बहुलतरतापैरनुदिनम् ।

अहंकारव्याघ्रव्यथितमिममत्यन्तकृपया

प्रबोध्य प्रस्वापात्परमवितवान्मामसि गुरो ॥ ५१८ ॥

मायाकृत-जनि-जरा-मृत्यु-गहने महास्वप्न-भ्रमन्तं अनुदिनम् बहुलतर-तापैः क्लिश्यन्तं अहंकार-व्याघ्रव्यथितम् इमम्-माम् गुरो अत्यन्तकृपया परं-प्रस्वापात् प्रबोध्य अवितवान्-असि ।

मायाकृत-जनि-जरा-मृत्यु-गहने – in a forest of birth, decay, & death created by illusion; महास्वप्न-भ्रमन्तं – who was wandering in interminable dream; अनुदिनम् – days after days; बहुलतर-तापैः – by countless afflictions; क्लिश्यन्तं – being tormented; अहंकार-व्याघ्रव्यथितम् – sorely troubled by the anger of egoism; इमम्-माम् – me; गुरो – O Master; अत्यन्तकृपया – out of sheer grace; परं-प्रस्वापात् – from the deep sleep; प्रबोध्य – awakened me; अवितवान्-असि – you have completely saved.

O Master, you have out of sheer grace awakened me from the deep sleep and completely saved me; who was wandering in interminable dream, in a forest of birth, decay, & death created by illusion, being tormented days after days by countless afflictions, and sorely troubled by the anger of egoism.

नमस्तस्मै सदैकस्मै कस्मैचिन्महसे नमः ।

यदेतद्विश्वरूपेण राजते गुरुराज ते ॥ ५१९ ॥

गुरुराज ते नमः । कस्मैचित्-महसे यत् सदा-एकस्मै एतत्-विश्वरूपेण-राजते तस्मै नमः ।

गुरुराज – O Prince of Teachers; ते – to you; नमः – salutations; कस्मैचित्-महसे – you are unnamable greatness; यत्-सदा-एकस्मै – that is ever the same; एतत्-विश्वरूपेण-राजते – does manifest yourself as this universe; तस्मै-नमः – I salute you.

Salutations to you, O Prince of Teachers, you are unnamable greatness that is ever the same, and does manifest yourself as this universe; I salute you.

इति नतमवलोक्य शिष्यवर्यं

समधिगतात्मसुखं प्रबुद्धतत्त्वम् ।

प्रमुदितहृदयं स देशिकेन्द्रः

पुनरिदमाह वचः परं महात्मा ॥ ५२० ॥*

समधिगत-आत्मसुखं-प्रबुद्धतत्त्वम् शिष्यवर्यं नतम् इति अवलोक्य प्रमुदितहृदयः सः महात्मा-देशिक-इन्द्रः पुनः आह इदम् परं वचः ।

समधिगत-आत्मसुखं-प्रबुद्धतत्त्वम् – who had attained the Bliss of the Self & realized the Truth; शिष्यवर्यं – the worthy disciple; नतम् – prostrating himself; इति – thus; अवलोक्य – seeing; प्रमुदितहृदयः – with his heart full of joy; सः – that; महात्मा-देशिक-इन्द्रः – noble & ideal Teacher; पुनः – again; आह – addressed; इदम् – the following; परं – excellent; वचः – words.

Seeing the worthy disciple, who had attained the Bliss of the Self & realized the Truth, thus prostrating himself, that noble & ideal Teacher with his heart full of joy again addressed the following excellent words.

श्रीगुरुरुवाच ।

ब्रह्मप्रत्ययसन्ततिर्जगदतो ब्रह्मैव तत्सर्वतः

पश्याध्यात्मदृशा प्रशान्तमनसा सर्वास्ववस्थास्वपि ।

रूपादन्यदवेक्षितं किमभितश्चक्षुष्मतां दृश्यते

तद्वद्ब्रह्मविदः सतः किमपरं बुद्धेर्विहारास्पदम् ॥ ५२१ ॥

श्रीगुरुरुवाच ।जगदत् ब्रह्म-प्रत्यय-सन्ततिः अतः तत्-सर्वतः ब्रह्म-एव । सर्वासु-अवस्थासु-अपि अध्यात्मदृशा प्रशान्तमनसा पश्य । अभितः-अवेक्षितं रूपात्-अन्यत् किम्-चक्षुष्मतां-दृश्यते ? तद्वद् ब्रह्मविदः बुद्धेः विहारास्पदम् सतः अपरं किम् ?

श्रीगुरुरुवाच – the Master continues; जगदत् – the universe; ब्रह्म-प्रत्यय-सन्ततिः – is an unbroken series of perceptions of Brahman; अतः – hence; तत्-सर्वतः – it is in all respects; ब्रह्म-एव – nothing but Brahman; सर्वासु-अवस्थासु-अपि – under all circumstances; अध्यात्मदृशा-प्रशान्तमनसा – with the eyes of illumination & a serene mind; पश्य – see this; अभितः-दृश्यते– to see all around; रूपात्-अन्यत् – anything else but forms; किम्-चक्षुष्मतां-अवेक्षितं – is one who has eyes ever found; तद्वद् – similarly; ब्रह्मविदः – of a man of realization; बुद्धेः – the intellect; विहारास्पदम् – to engage; सतः-अपरं – except Brahman; किम् – what is there.

The Master continues; the universe is an unbroken series of perceptions of Brahman; hence it is in all respects nothing but Brahman. See this with the eyes of illumination & a serene mind, under all circumstances. Is one who has eyes ever found to see all around anything else but forms? Similarly what is there except Brahman to engage the intellect of a man of realization?

कस्तां परानन्दरसानुभूति-

मृत्सृज्य शून्येषु रमेत विद्वान्।

चन्द्रे महाल्हादिनि दीप्यमाने

चित्रेन्दुमालोकयितुं क इच्छेत्॥ ५२२ ॥

तां पर-आनन्द-रस-अनुभूतिम् उत्सृज्य कः विद्वान् शून्येषु रमेतः ? महाल्हादिनि चन्द्रे दीप्यमाने

चित्र-इन्दुम् आलोकयितुं कः इच्छेत् ?

तां – that; पर-आनन्द-रस-अनुभूतिम् – enjoyment of Supreme Bliss; उत्सृज्य – would discard; कः – which; विद्वान् – wise man; शून्येषु – in things unsubstantial; रमेतः – revel; महाल्हादिनि – the exceedingly charming; चन्द्रे – moon; दीप्यमाने – when ..is shining; चित्र-इन्दुम् – at a painted moon; आलोकयितुं – to look; कः – who would; इच्छेत – wish.

Which wise man would discard that enjoyment of Supreme Bliss and revel in things unsubstantial? When the exceedingly charming is shining who would wish to look at a painted moon?

असत्पदार्थानुभवेन किञ्चिन्

न ह्यस्ति तृप्तिर्न च दुःखहानिः।

तदद्वयानन्दरसानुभूत्या

तृप्तः सुखं तिष्ठ सदात्मनिष्ठया॥ ५२३ ॥

असत्-पदार्थ-अनुभवेन किञ्चिन् हि तृप्तिः न अस्ति न च दुःखहानिः।

तत् अद्वयानन्द-रस-अनुभूत्या तृप्तः सत्-आत्मनिष्ठया सुखं तिष्ठ।

असत्-पदार्थ-अनुभवेन – from the perception of unreal things;

किञ्चिन्-हि-तृप्तिः-न-अस्ति-न-च-दुःखहानिः – there is neither satisfaction nor a cessation of misery;

तत् – therefore; अद्वयानन्द-रस-अनुभूत्या – with the realization of the Bliss Absolute the one without second; तृप्तः – being satisfied; सत्-आत्मनिष्ठया – in a state of identity with that reality; सुखं – happily; तिष्ठ – live.

From the perception of unreal things there is neither satisfaction nor a cessation of misery. Therefore being satisfied with the realization of the Bliss Absolute the one without second, live happily in a state of identity with that reality.

स्वमेव सर्वथा पश्यन्मन्यमानः स्वमद्वयम्।

स्वानन्दमनुभुञ्जानः कालं नय महामते ॥ ५२४ ॥

सर्वथा स्वम् अद्वयम् मन्यमानः स्वम् एव पश्यन्, स्वानन्दम् अनुभुञ्जानः महामते कालं नय ।

सर्वथा – in all circumstances; स्वम्-मन्यमानः – thinking of the Self; अद्वयम् – the One without a second; स्वम् – the Self; एव – alone; पश्यन् – beholding; स्वानन्दम्-अनुभुञ्जानः – enjoying the Bliss of the Self; महामते – O noble soul; कालं-नय – pass your time.

Beholding the Self alone in all circumstances, thinking of the Self, the One without a second, and enjoying the Bliss of the Self, pass your time O noble soul.

अखण्डबोधात्मनि निर्विकल्पे

विकल्पनं व्योम्नि पुरप्रकल्पनम्।

तदद्वयानन्दमयात्मना सदा

शान्तिं परामेत्य भजस्व मौनम्॥ ५२५ ॥

निर्विकल्पे अखण्ड-बोध-आत्मनि विकल्पनं व्योम्नि पुर-प्रकल्पनम्।

तत् अद्वय-आनन्दमय-आत्मना सदा पराम् शान्तिं एत्य मौनम् भजस्व ।

निर्विकल्पे-अखण्ड-बोध-आत्मनि – in the Atman, the Infinite Knowledge, the Absolute; विकल्पनं – dualistic conceptions; व्योम्नि – in the air; पुर-प्रकल्पनम् – are like imagining castels; तत् – therefore; अद्वय-आनन्दमय-आत्मना – identifying thyself with the Bliss Absolute the one without second; सदा – always; पराम्-शान्तिं-एत्य – and thereby attaining Supreme Pece; मौनम्-भजस्व – remain quite.

Dualistic conceptions in the Atman, the Infinite Knowledge, the Absolute, are like imagining castles in the air. Therefore, always identifying yourself with the Bliss Absolute the one without second, and thereby attaining Supreme Peace remain quite.

तूष्णीमवस्था परमोपशान्तिः

बुद्धेरसत्कल्पविकल्पहेतोः।

ब्रह्मात्मना ब्रह्मविदो महात्मनो

यत्राद्वयानन्दसुखं निरन्तरम्॥ ५२६ ॥

ब्रह्मविदः-महात्मनः असत्-कल्प-विकल्प-हेतोः बुद्धेः परमा-उपशान्तिः। तूष्णीम्-अवस्था ब्रह्मात्मना यत्र निरन्तरम् अद्वय-आनन्द-सुखं ।

ब्रह्मविदः-महात्मनः – to the sage who has realize Brahman; असत्-कल्प-विकल्प-हेतोः – which is cause of unreal fancies; बुद्धेः – the mind; परमा-उपशान्तिः – becomes perfectly tranquil; तूष्णीम्-अवस्था – this verily is the state of quietude; यत्र – in which; ब्रह्मात्मना – identified with Brahman he has; निरन्तरम्-अद्वय-आनन्द-सुखं – constant enjoyment of the Bliss Absolute, the one without a second.

To the sage who has realize Brahman, the mind, which is cause of unreal fancies, becomes perfectly tranquil; this verily is the state of quietude, in which, identified with Brahman he has constant enjoyment of the Bliss Absolute, the one without a second.

नास्ति निर्वासनान्मौनात्परं सुखकृदुत्तमम्।

विज्ञातात्मस्वरूपस्य स्वानन्दरसपायिनः ॥ ५२७ ॥

विज्ञात-आत्मस्वरूपस्य स्व-आनन्द-रसपायिनः निर्वासनात् मौनात् परं उत्तमम् सुखकत् न अस्ति ।

विज्ञात-आत्मस्वरूपस्य – to the man who has realized his own nature; स्व-आनन्द-रसपायिनः – who drinks the undiluted Bliss of the Self; निर्वासनात् – that comes of a state of desirelessness; मौनात् –the quietutde; परं – than; उत्तमम्-सुखकत् – more exhilarating; न – nothing; अस्ति – there is.

To the man who has realized his own nature, and drinks the undiluted Bliss of the Self, there is nothing more exhilarating than the quietude that comes of a state of desirelessness.

गच्छंस्तिष्ठन्नुपविशञ्छयानो वाऽन्यथापि वा ।

यथेच्छया वसेद्विद्वानात्मारामः सदा मुनिः ॥ ५२८ ॥

आत्मारामः-मुनिः-विद्वान् गच्छं, स्तिष्ठन्, उपविशन्, वा शयानः वा अन्यथा अपि सदा यथा-इच्छया वसेत्।

आत्मारामः-मुनिः-विद्वान् – the illumined sage, whose pleasure is in the Self; गच्छं – going; स्तिष्ठन्-उपविशन्-शयानः –staying sitting or lying; वा – whether;– अन्यथा-अपि-वा – or in any other condition; सदा – ever; यथा-इच्छया – at ease; वसेत् – lives.

The illumined sage, whose pleasure is in the Self, ever lives at ease, whether going or staying sitting or lying, or in any other condition.

न देशकालासनदिग्यमादि-

लक्ष्याद्यपेक्षाऽप्रतिबद्धवृत्तेः ।

संसिद्धतत्त्वस्य महात्मनोऽस्ति

स्ववेदने का नियमाद्यवस्था ॥ ५२९ ॥

संसिद्धतत्त्वस्य अप्रतिबद्धवृत्तेः महात्मननः देश काल आसन दिग् यमादि लक्ष्यादि अपेक्षा-न-अस्ति ।

स्ववेदने का-नियमाद्यवस्था ?

संसिद्धतत्त्वस्य – who has perfectly realized the Truth; अप्रतिबद्धवृत्तेः – whose mind functions meet with no obstructio; महात्मननः – the noble soul; देश – place; काल – time; आसन – posture; दिग् – direction; यमादि – moral disciplines; लक्ष्यादि – object of medition & so forth; अपेक्षा-न-अस्ति – no

more depends upon conditions of; स्ववेदने – in knowing one's own Self; का-नियमाद्यवस्था – what regulative condition canthere be.

The noble soul who has perfectly realized the Truth, and whose mind functions meet with no obstruction, no more depends upon conditions of no more depends upon conditions of place, time, posture, direction, moral disciplines, object of meditation & so forth; what regulative condition can there be in knowing one's own Self ?

घटोऽयमिति विज्ञातुं नियमः कोऽन्ववेक्षते ।

विना प्रमाणसुष्ठुत्वं यस्मिन्सति पदार्थधीः ॥ ५३० ॥

'अयम्-घटः' इति-विज्ञातुं प्रमाणसुष्ठुत्वं विना कः-नु-नियमः अवेक्षते ?

यस्मिन्-सति पदार्थधीः ।

'अयम्-घटः' – 'this is a jar'; इति-विज्ञातुं – to know that; प्रमाणसुष्ठुत्वं – the means of knowledge be free from defect; विना – except that; कः-नु-नियमः – what condition forsooth; अवेक्षते – is necessary; यस्मिन्-सति – which alone ensures; पदार्थधीः – a condition of the object.

To know that 'this is a jar', what condition forsooth, is necessary except that the means of knowledge be free from defect, which alone ensures a condition of the object?

अयमात्मा नित्यसिद्धः प्रमाणे सति भासते ।

न देशं नापि वा कालं न शुद्धिं वाप्यपेक्षते ॥ ५३१ ॥

अयम-आत्मा नित्यसिद्धः प्रमाणे-सति भासते । न-देशं-न-अपि-वा-कालं-शुद्धिं-अपि-वा-न-अपेक्षते ।

अयम-आत्मा – this Self/Atman; नित्यसिद्धः – which is an eternal verity; प्रमाणे-सति – as soon as the right means of knowledge is present; भासते – manifests Itself;

न-देशं-न-अपि-वा-कालं-शुद्धिं-अपि-वा-न-अपेक्षते – does not depend upon either place or time or purity even.

This Self/Atman which is an eternal verity as soon as the right means of knowledge is present, and does not depend upon either place or time or purity even.

देवदत्तोऽहमोत्येतद्विज्ञानं निरपेक्षकम् ।

तद्वद्ब्रह्मविदोऽप्यस्य ब्रह्माहमिति वेदनम् ॥ ५३२ ॥

'अहम्-देवदत्तः' इति-एतत्-विज्ञानं निरपेक्षकम्, तद्वद् अस्य ब्रह्मविदः 'अहम्-ब्रह्म' इति वेदनम् अपि ।

'अहम्-देवदत्तः' – 'I am Devadatta'; इति-एतत्-विज्ञानं – the consciousness; निरपेक्षकम् – is independent of circumstances; तद्वद् – similar; अस्य-ब्रह्मविदः – of the knower of Brahman; 'अहम्-ब्रह्म' – 'I am Brahman'; इति – that; वेदनम् – the realization; अपि – is the case with.

The consciousness, 'I am Devadatta' is independent of circumstances; similar is the case with the realization of the knower of Brahman that 'I am Brahman'.

भानुनेव जगत्सर्वं भासते यस्य तेजसा ।

अनात्मकमसत्तुच्छं किं नु तस्यावभासकम् ॥ ५३३ ॥

भानुना इव यस्य तेजसा सर्वं जगत् अनात्मकम्, असत्, तुच्छं भासते, तस्य-नु-किं-अवभासकम् ?

भानुना-इव – like the sun; यस्य – whose; तेजसा – luster; सर्वं – the whole; जगत् – universe;

अनात्मकम् – unsubstantial; असत् – unreal; तुच्छं – insignificant; भासते – causes to appear at all;

तस्य-नु-कि-अवभासकम् – what indeed can manifest That.

What indeed can manifest That, whose luster like the sun, causes the whole universe unsubstantial, unreal, insignificant to appear at all

वेदशास्त्रपुराणानि भूतानि सकलान्यपि ।

येनार्थवन्ति तं किन्नु विज्ञातारं प्रकाशयेत्॥ ५३४ ॥

वेदशास्त्रपुराणानि भूतानि सकलानि अपि येन अर्थवन्ति तं विज्ञातारं किं नु प्रकाशयेत् ?

वेदशास्त्रपुराणानि – the Vedas, Purans & other Scriptures; भूतानि – beings; सकलानि – all; अपि – as well as; येन – by which; अर्थवन्ति – are endowed with a meaning; तं-विज्ञातारं – that Eternal-Subject; किं-नु-प्रकाशयेत् – what indeed, can illuminate.

What indeed, can illuminate that Eternal-Subject by which the Vedas, Purans & other Scriptures, as well as all beings are endowed with a meaning?

एष स्वयंज्योतिरनन्तशक्तिः

आत्माऽप्रमेयः सकलानुभूतिः ।

यमेव विज्ञाय विमुक्तबन्धो

जयत्ययं ब्रह्मविदुत्तमोत्तमः ॥ ५३५ ॥

एष स्वयंज्योतिः आत्मा अनन्तशक्तिः अप्रमेयः सकलानुभूतिः, यम् विज्ञाय एव अयं ब्रह्मविद्-उत्तमः

विमुक्तबन्धः उत्तमः-जयति ।

एष – here is; स्वयंज्योतिः – the Self-effulgent; आत्मा – Self/Atman; अनन्तशक्तिः – of infinite power; अप्रमेयः – beyond the range of conditional knowledge; सकलानुभूतिः – common experience of all; यम् – which; एव – alone; विज्ञाय – by knowing; अयं – this; ब्रह्मविद्-उत्तमः – incomparable knower of Brahman; विमुक्तबन्धः – freed from bondage; उत्तमः-जयति – lives glorious life.

Here is the Self-effulgent Self/Atman, of infinite power beyond the range of conditional knowledge, yet common experience of all; by knowing which alone this incomparable knower of Brahman lives glorious life freed from bondage.

न खिद्यते नो विषयैः प्रमोदते

न सज्जते नापि विरज्यते च ।

स्वस्मिन्सदा क्रीडति नन्दति स्वयं

निरन्तरानन्दरसेन तृप्तः ॥ ५३६ ॥

न-खिद्यते-नो-प्रमोदते विषयैः, न-सज्जते-न-अपि-विरज्यते-च ।

निरन्तर-आनन्द-रसेन तृप्तः स्वस्मिन् सदा क्रीडति स्वयं नन्दति ।

न-खिद्यते-नो-प्रमोदते – is neither grieved nor elated; विषयैः – by sense-objects;

न-सज्जते-न-अपि-विरज्यते-च – is neither attached nor averse to them;

निरन्तर-आनन्द-रसेन – with undiluted constant bliss; तृप्तः – satisfied; स्वस्मिन् – with the Self;

सदा – always; क्रीडति – disports; स्वयं – in the Self/therein; नन्दति – takes pleasure.

Satisfied with undiluted, constant bliss, he is neither grieved nor elated by sense-objects, is neither attached nor averse to them, but always disports with the Self and takes pleasure therein.

क्षुधां देहव्यथां त्यक्त्वा बालः क्रीडति वस्तुनिः ।

तथैव विद्वान् रमते निर्ममो निरहं सुखी ॥ ५३७ ॥

बालः क्षुधां देहव्यथां त्यक्त्वा वस्तुनिः क्रीडति तथा एव विद्वान् निर्ममः-निरहं रमते सुखी ।

क्षुधां – hunger; देहव्यथां – bodily pains; त्यक्त्वा – forgetting; बालः – a child; क्रीडति – plays; वस्तुनिः – with its toys; तथैव – exactly so does; विद्वान् – the man of realization; रमते – takes pleasure;

निर्ममः-निरहं – in the reality without ideas of "I" or "mine"; सुखी – is happy.

A child plays with its toys forgetting hunger and bodily pains; exactly so does the man of realization takes pleasure in the reality without ideas of "I" or "mine", and is happy.

चिन्ताशून्यमदैन्यभैक्षमशनं पानं सरिद्वारिषु

स्वातन्त्र्येण निरंकुशा स्थितिरभीर्निद्रा श्मशाने वने ।

वस्त्रं क्षालनशोषणादिरहितं दिग्वास्तु शय्या मही

संचारो निगमान्तवीथिषु विदां क्रीडा परे ब्रह्मणि ॥ ५३८ ॥

विदां अशनं चिन्ताशून्यम् अदैन्यभैक्षम्, पानं सरिद्वारिषु, स्थितिः स्वातन्त्र्येण निरंकुशा अभीः, निद्रा श्मशाने वने, वस्त्रं क्षालन-शोषण-आदि-रहितं दिक् वा अस्तु, शय्या मही, संचारः निगम-अन्त-वीथिषु, क्रीडा परे ब्रह्मणि ।

विदां – men of realization; अशनं – have their food; चिन्ताशून्यम्-अदैन्य-भैक्षम् – without anxiety or humiliaton by begging; पानं – their drink; सरिद्वारिषु – from the water of rivers; स्थितिः – they live; स्वातन्त्र्येण – freely; निरंकुशा – independently; अभीः – without fear; निद्रा – sleep; श्मशाने-वने – in cremation grounds or forests; वस्त्रं – their clothing; क्षालन-शोषण-आदि-रहितं – which need no washing and drying; दिक्-वा – quarters themselves; अस्तु – may be; शय्या – their bed; मही – the earth; संचारः – they roam; निगम-अन्त-वीथिष – in the avenue of the Vedanta; क्रीडा – their pastime; परे-ब्रह्मणि – in the Supreme Brahman.

Men of realization have their food without anxiety or humiliation by begging, and their drink from the water of rivers; they live freely and independently, and sleep without fear in cremation grounds or forests; their clothing may be quarters themselves which need no washing and drying; the earth is their bed; they roam in the avenue of the Vedanta; while their pastime is in the Supreme Brahman.

विमानमालम्ब्य शरीरमेतद् भुनक्त्यशेषान्विषयानुपस्थितान् ।

परेच्छया बालवदात्मवेत्ता योऽव्यक्तलिङ्गोऽननुषक्तबाह्यः ॥ ५३९ ॥

आत्मवेत्ता यः अननुषक्त-बाह्यः अव्यक्तलिङ्गः, एतद् शरीरम् विमानमालम्ब्य, उपस्थितान् अशेषान् विषयान् परेच्छया बालवत् भुनक्ति ।

आत्मवेत्ता – the knower of the Self; यः – who; अननुषक्त-बाह्यः-अव्यक्तलिङ्गः – wears no outer marks and is unattached to external things; एतद्-शरीरम्-विमानमालम्ब्य – rests on this body without identification; उपस्थितान् – as they come; अशेषान् – all sorts of; विषयान् – sense-objects; परेच्छया – through others' wish; बालवत् – like a child; भुनक्ति – experience.

The knower of the Self, who wears no outer marks and is unattached to external things, rests on this body without identification, and experience all sorts of sense-objects as they come, through others' wish, like a child.

दिगम्बरो वापि च साम्बरो वा
त्वगम्बरो वापि चिदम्बरस्थः ।
उन्मत्तवद्वापि च बालवद्वा
पिशाचवद्वापि चरत्यवन्याम् ॥ ५४० ॥

दिगम्बरः-वा-अपि – having no other clothes on his person except the quarters; स-अम्बरः-वा-च -त्वग्-अम्बरः-वा-अपि – or sometimes wearing clothes or perhaps skin at other times; चित्-अम्बरस्थः – established in the eternal plane of Absolute Knowledge; उन्मत्तवत्-वा-अपि-च-बालवत्-वा-पिशाचवत्-वा-अपि – sometimes like a madman, sometimes like a child and at other times like a ghoul; अवन्याम्-चरति – he wanders in the world.

Established in the eternal plane of Absolute Knowledge, he wanders in the world, sometimes like a madman, sometimes like a child and at other times like a ghoul, having no other clothes on his person except the quarters, or sometimes wearing clothes or perhaps skin at other times.

कामान्निष्कामरूपी संश्चरत्येकचरो मुनिः ।
स्वात्मनैव सदा तुष्टः स्वयं सर्वात्मना स्थितः ॥ ५४१ ॥

एकचरः स्वात्मना एव सदा तुष्टः, स्वयं सर्वात्मना स्थितः मुनिः निष्कामरूपी सन् कामान् चरति ।

एकचरः – living alone; स्वात्मना-एव-तुष्टः – satisfied with his own Self; सदा – always; स्वयं-सर्वात्मना-स्थितः – himself present as all; मुनिः – the sage; निष्कामरूपी-सन् – being very embodiment of desirelessness; कामान् – sense-objects; चरति – enjoys.

The sage, living alone, enjoys sense-objects, being very embodiment of desirelessness; always satisfied with his own Self, and himself present as all.

क्वचिन्मूढो विद्वान् क्वचिदपि महाराजविभवः
क्वचिद्भ्रान्तः सौम्यः क्वचिदजगराचारकलितः ।
क्वचित्पात्रीभूतः क्वचिदवमतः क्वाप्यविदितः
चरत्येवं प्राज्ञः सततपरमानन्दसुखितः ॥ ५४२ ॥

सतत-परमानन्द-सुखितः प्राज्ञः क्वचित् मूढः, विद्वान्, क्वचित् महाराजविभवः अपि, क्वचित् भ्रान्तः, सौम्यः,

क्वचित् अजगर-आचारकलितः, क्वचित् पात्रीभूतः, क्वचित् अवमतः, क्व अविदितः अपि एवं चरति ।

सतत-परमानन्द-सुखितः – ever happy with supreme bliss; प्राज्ञः – the man of realization;

क्वचित्-मूढः – sometimes as fool; विद्वान्-अपि – sometimes a sage; क्वचित्-महाराजविभवः – sometimes possessed of regal splendor; क्वचित्-भ्रान्तः – sometimes wandering; सौम्यः-अपि – sometimes wearing benignant expression; क्वचित्-अजगर-आचारकलितः – sometimes behaving like a motionless python; क्वचित्-पात्रीभूतः – sometimes honoured; क्वचित्-अवमतः – sometimes insulted; क्व-अविदितः – sometimes unknown; एवं – thus; चरति – lives.

Sometimes as fool, sometimes a sage, sometimes possessed of regal splendor, sometimes wandering, sometimes behaving like a motionless python, sometimes wearing benignant expression, sometimes honoured, sometimes insulted, sometimes unknown - thus lives the man of realization, ever happy with supreme bliss.

निर्धनोऽपि सदा तुष्टोऽप्यसहायो महाबलः ।

नित्यतृप्तोऽप्यभुञ्जानोऽप्यसमः समदर्शनः ॥ ५४३ ॥

निर्धनः-अपि-सदा-तुष्टः, असहायः-अपि-महाबलः, अभुञ्जानः-अपि-नित्यतृप्तः, असमः-अपि-समदर्शनः ।

निर्धनः-अपि-सदा-तुष्टः – though without reaches, yet ever content; असहायः-अपि-महाबलः – though helpless, yet very powerful; अभुञ्जानः-अपि-नित्यतृप्तः – though not enjoying the sense-objects, yet eternally satisfied; असमः-अपि-समदर्शनः – though without an exemplar, yet looking upon all with an eye of equality.

Though without reaches, yet ever content; though helpless, yet very powerful; though not enjoying the sense-objects, yet eternally satisfied; though without an exemplar, yet looking upon all with an eye of equality.

अपि कुर्वन्नकुर्वाणश्चाभोक्ता फलभोग्यपि ।

शरीर्यप्यशरीर्येष परिच्छिन्नोऽपि सर्वगः ॥ ५४४ ॥

एषः-च कुर्वन्-अपि-अकुर्वाणः, फलभोगी-अपि-अभोक्ता, शरीरी-अपि-अशरीरी, परिच्छिन्नः-अपि-सर्वगः ।

एषः-च – he/this man of realization as well is; कुर्वन्-अपि-अकुर्वाणः – though doing, yet inactive;

फलभोगी-अपि-अभोक्ता – though experience fruits of past actions, yet unattached to them;

शरीरी-अपि-अशरीरी – though possessed of a body, yet without identification with it;

परिच्छिन्नः-अपि-सर्वगः – though limited, yet omnipresent.

He/this man of realization as well is though doing, yet inactive; though experience fruits of past actions, yet unattached to them; though possessed of a body, yet without identification with it; though limited, yet omnipresent.

अशरीरं सदा सन्तमिमं ब्रह्मविदं क्वचित् ।

प्रियाप्रिये न स्पृशतस्तथैव च शुभाशुभे ॥ ५४५ ॥*

सदा-अशरीरं-सन्तम् इमं-ब्रह्मविदं प्रिय-अप्रिये तथा-एव-च शुभ-अशुभे क्वचित्-न स्पृशतः ।

सदा-अशरीरं-सन्तम् – who always lives without body idea; इमं-ब्रह्मविदं – to this knower of Brahman; प्रिय-अप्रिये-शुभ-अशुभे – the pleasure or pain or good or evil; तथा-एव-च – as well; क्वचित्-न – can never; स्पृशतः – touch.

To this knower of Brahman, who always lives without body idea, can never touch the pleasure or pain or good or evil as well.

स्थूलादिसम्बन्धवतोऽभिमानिनः

सुखं च दुःखं च शुभाशुभे च ।

विध्वस्तबन्धस्य सदात्मनो मुनेः

कुतः शुभं वाऽप्यशुभं फलं वा ॥ ५४६ ॥

सुखं च दुःखं च शुभाशुभे च स्थूलादि-सम्बन्धवतः अभिमानिनः विध्वस्त-बन्धस्य सदात्मनः मुनेः शुभं वा अशुभं वा अपि फलं कुतः ?

सुखं – pleasure; च – or; दुःखं – pain; च – or; शुभ – good; च – or; अशुभे – evil (affects only); स्थूलादि-सम्बन्धवतः-अभिमानिनः – him who has connection with gross-body etc., and identifies himself with these; विध्वस्त-बन्धस्य-सदात्मनः – who has identified himself with Reality and thereby shattered his bondage; मुनेः – the sage; शुभं – good; वा – or ; अशुभं – evil; वा – or; अपि – even; फलं – their fruits; कुतः – how can..touch.

Pleasure or pain or good or– evil affects only him who has connection with gross-body etc., and identifies himself with these; but how can good or evil, or even their fruits, touch the sage who has identified himself with Reality and thereby shattered his bondage ?

तमसा ग्रस्तवद्भानादग्रस्तोऽपि रविर्जनैः ।

ग्रस्त इत्युच्यते भ्रान्त्यां ह्यज्ञात्वा वस्तुलक्षणम् ॥ ५४७ ॥

जनैः वस्तुलक्षणम् अज्ञात्वा अग्रस्तः अपि रविः ग्रस्तवत् भानात् तमसः ग्रस्तः इति भ्रान्त्यां हि उच्यते ।

जनैः – by people; वस्तुलक्षणम्-अज्ञात्वा – not knowing the real nature of the sun; रविः – the sun; अग्रस्त-अपि-ग्रस्तवत्-भानात् – which appears to be, but is not actually, तमसः-ग्रस्तः – swallowed by Rahu; इति-भ्रान्त्यां-हि-उच्यते – is said to be swallowed, on account of delusion.

The sun which appears to be, but is not actually swallowed by Rahu, is said to be swallowed, on account of delusion, by people, not knowing the real nature of the sun.

तद्वद्देहादिबन्धेभ्यो विमुक्तं ब्रह्मवित्तमम् ।

पश्यन्ति देहिवन्मूढाः शरीराभासदर्शनात् ॥ ५४८ ॥

तद्वत् देहादिबन्धेभ्यः विमुक्तं ब्रह्मवित्तमम् मूढाः शरीराभासदर्शनात् देहिवत् पश्यन्ति ।

तद्वत् – similarly; देहादिबन्धेभ्यः-विमुक्तं – who is free from the bondages of the body and alike; ब्रह्मवित्तमम् – the perfect knower of Brahman; मूढाः – ignorant people; शरीराभासदर्शनात् – seeing but the appearance of it/body; देहिवत् – as possessed of the body; पश्यन्ति – look upon.

Similarly ignorant people look upon the perfect knower of Brahman, who is free from the bondages of the body and alike, as possessed of the body, seeing but the appearance of it.

अहिर्निर्ल्वयनीं वायं मुक्त्वा देहं तु तिष्ठति ।

इतस्ततश्चाल्यमानो यत्किञ्चित्प्राणवायुना ॥ ५४९ ॥

अयं – he; अहिः-निर्ल्वयनीं-वा – like the snake its slough; प्राणवायुना – by the force of prana; इतः-ततः – hither and thither; यत्-किञ्चित् – whatever little; चाल्यमानः – (that body) is moved; तु – however; देहं – the body; मुक्त्वा – discarding; तिष्ठति – rests.

He/(this knower of Brahman) rests discarding the body, like the snake its slough, however whatever little that body moves hither and thither, is by the force of prana.

स्रोतसा नीयते दारु यथा निम्नोन्नतस्थलम् ।

दैवेन नीयते देहो यथाकालोपभुक्तिषु ॥ ५५० ॥

यथा स्रोतसा दारु निम्न-उन्नत-स्थलम् नीयते, (तथा) देहः दैवेन यथा-काल-उपभुक्तिषु नीयते ।

यथा – as; स्रोतसा – by the current; दारु – a piece of wood; निम्न-उन्नत-स्थलम् – to a high or low ground; नीयते – is borne; (तथा) – so; देहः – is the body; दैवेन – by the momentum of past actions; यथा-काल – as these present themselves in due course; उपभुक्तिषु – to the varied experience of their fruits; नीयते – carried on.

As a piece of wood is borne by the current to a high or low ground, so is the body carried on by the momentum of past actions to the varied experience of their fruits, as these present themselves in due course.

प्रारब्धकर्मपरिकल्पितवासनाभिः

संसारिवच्चरति भुक्तिषु मुक्तदेहः ।

सिद्धः स्वयं वसति साक्षिवदत्र तूष्णीं

चक्रस्य मूलमिव कल्पविकल्पशून्यः ॥ ५५१ ॥

मुक्तदेहः प्रारब्ध-कर्म-परिकल्पित-वासनाभिः भुक्तिषु संसारिवत् चरति ।

कल्पविकल्पशून्यः सिद्धः चक्रस्य मूलम् इव साक्षिवत् स्वयं अत्र तूष्णीं वसति ।

मुक्तदेहः – the man of realization, berfit of body idea; प्रारब्ध-कर्म-परिकल्पित-वासनाभिः – through desires engenerated by the resultant of past work that has led to the present birth; भुक्तिषु – amid sense-enjoyments; संसारिवत् – like a man subject to transmigration; चरति – moves; कल्पविकल्पशून्यः – like a witness; चक्रस्य-मूलम्-इव – like the pivot of the potter's wheel; साक्षिवत् – like a witness; सिद्धः-स्वयं – he himself however; अत्र – in the body; तूष्णीं – unmoved; वसति – lives.

The man of realization, bereft of body idea, moves amid sense-enjoyments like a man subject to transmigration, through desires engenerated by the resultant of past work that has led to the present birth. He himself, however, lives unmoved in the body, like a witness, like a witness, like the pivot of the potter's wheel.

नैवेन्द्रियाणि विषयेषु नियुंक्त एष

नैवापयुंक्त उपदर्शनलक्षणस्थः।

नैव क्रियाफलमपीषदवेक्षते स

स्वानन्दसान्द्ररसपानसुमत्तचित्तः॥ ५५२॥

एष विषयेषु इन्द्रियाणि नियुंक्ते-न-एव अपयुंक्त-न-एव उपदर्शन-लक्षणस्थः।

सान्द्र-स्वानन्द-रसपान-सुमत्त-चित्तः स क्रियाफलम् इषत्-अपि-अवेक्षते-न-एव।

एष – he; विषयेषु – to their objects; इन्द्रियाणि – the sense-organes; नियुंक्ते-न-एव – neither directs; अपयुंक्त-न-एव – nor detaches from them; उपदर्शन-लक्षणस्थः – but stays like an unconcerned spectator; सान्द्र-स्वानन्द-रसपान-सुमत्त-चित्तः – his mind being thoroughly inebriated with drinking the undiluted elixir of the Bliss of the Atman; स – he; क्रियाफलम् – for the fruits of actions; इषत्-अपि-अवेक्षते-न-एव – has not the least regard.

He neither directs the sense-organs to their objects nor detaches from them, but stays like an unconcerned spectator. And he has not the least regard for the fruits of actions, his mind being thoroughly inebriated with drinking the undiluted elixir of the Bliss of the Atman.

लक्ष्यालक्ष्यगतिं त्यक्त्वा यस्तिष्ठेत्केवलात्मना।

शिव एव स्वयं साक्षादयं ब्रह्मविदुत्तमः॥ ५५३॥

लक्ष्य-अलक्ष्य-गतिं त्यक्त्वा यः केवलात्मना तिष्ठेत्, अयं स्वयं साक्षात् शिवः एव ब्रह्मविदुत्तमः।

लक्ष्य-अलक्ष्य-गतिं – all consideration of fitness or otherwise of the objects of meditation; त्यक्त्वा – giving up; यः – who; केवलात्मना – as the Absolute Atman; तिष्ठेत् – lives; अयं – he; स्वयं – Himself; साक्षात्-शिवः-एव – is verily Siva; ब्रह्मविदुत्तमः – he is the best among the knowers of Brahman.

He who, giving up all consideration of fitness or otherwise of the objects of meditation, lives as the Absolute Atman, is verily Siva Himself, and he is the best among the knowers of Brahman.

जीवन्नेव सदा मुक्तः कृतार्थो ब्रह्मवित्तमः।

उपाधिनाशाद्ब्रह्मैव सन् ब्रह्माप्येति निर्द्वयम्॥ ५५४॥

जीवत् एव, ब्रह्मवित्तमः, सदा मुक्तः कृतार्थः, उपाधि-नाशाद् ब्रह्म एव सन् निर्द्वयम् ब्रह्म अपि एति।

जीवत्-एव – even while living; ब्रह्मवित्तमः – the perfect knower of Brahman; सदा-मुक्तः – becomes ever free; कृतार्थः – attains the goal of his life; उपाधि-नाशाद् – through thedestruction of limitations; ब्रह्म-एव-सन् – which he has been all along; निर्द्वयम्-ब्रह्म – the one Brahman without second; अपि-एति – is merged in.

Through the destruction of limitations, the perfect knower of Brahman is merged in the one Brahman without second, which he has been all along, becomes ever free even while living, and attains the goal of his life.

शैलूषो वेषसद्भावाभावयोश्च यथा पुमान्।

तथैव ब्रह्मविच्छ्रेष्ठः सदा ब्रह्मैव नापरः॥ ५५५॥

यथा-शैलूषः वेष-सद्भाव-अभावयोः-च पुमान्-एव तथा ब्रह्मवित्-श्रेष्ठः सदा-ब्रह्म-एव न-अपरः ।

यथा-शैलूषः – as an actor; वेष-सद्भाव-अभावयोः-च – when he puts on the dress of his role or when he does not; पुमान्-एव – is always a man; तथा – so; ब्रह्मवित्-श्रेष्ठः – the perfect knower of Brahman; सदा-ब्रह्म-एव – is always Brahman; न-अपरः – and nothing else.

As an actor, when he puts on the dress of his role or when he does not, is always a man, so the perfect knower of Brahman is always Brahman and nothing else.

यत्र क्वापि विशीर्णं सत्पर्णमिव तरोर्वपुः पततात् ।

ब्रह्मीभूतस्य यतेः प्रागेव तच्चिदग्निना दग्धम् ॥ ५५६ ॥

तरोः विशीर्णं सत् पर्णं इव ब्रह्मीभूतस्य यतेः वपुः यत्र क्व अपि पततात् तत् प्राक् एव चिदग्निना दग्धम् ।

तरोः – of a tree; विशीर्णं-सत्-पर्णं-इव – like the dry leaf; ब्रह्मीभूतस्य – who has realized his identity with Brahman; यतेः – of the Monk; वपुः – the body; यत्र-क्व-अपि-पततात् – let..wither & fall anywhere; तत् – it; प्राक्-एव – has been already; चिदग्निना – by the fire of knowledge; दग्धम् – burnt.

Let the body of the Monk who has realized his identity with Brahman, wither & fall anywhere like the dry leaf of a tree; it has been already burnt by the fire of knowledge.

सदात्मनि ब्रह्मणि तिष्ठतो मुनेः

पूर्णाऽद्वयानन्दमयात्मना सदा ।

न देशकालाद्युचितप्रतीक्षा

त्वङ्मांसविट्पिण्डविसर्जनाय ॥ ५५७ ॥

सदात्मनि ब्रह्मणि पूर्ण-अद्वय-आनन्दमय-आत्मना सदा-तिष्ठतः मुनेः त्वङ्-मांस-विट्-पिण्ड-विसर्जनाय देश-कालादि-उचित-प्रतीक्षा न ।

सदात्मनि-ब्रह्मणि – in the reality - Brahman; पूर्ण-आनन्दमय-अद्वय-आत्मना – as infinite Bliss, the one without a second; सदा-तिष्ठतः – who always lives; मुनेः – the sage; त्वङ्-मांस-विट्-पिण्ड-विसर्जनाय – for giving up this mass of skin, flesh, and filth; देश-कालादि-उचित – the customary considerations of place, time etc.; प्रतीक्षा-न – does not depend upon.

The sage who always lives in the reality – Brahman - as infinite Bliss, the one without a second, does not depend upon the customary considerations of place, time etc., for giving up this mass of skin, flesh, and filth.

देहस्य मोक्षो नो मोक्षो न दण्डस्य कमण्डलोः ।

अविद्याहृदयग्रन्थिमोक्षो मोक्षो यतस्ततः ॥ ५५८ ॥

यतः देहस्य मोक्षः नो, मोक्षो न दण्डस्य कमण्डलोः, ततः अविद्या-हृदय-ग्रन्थि-मोक्षः मोक्षः ।

देहस्य-मोक्षः – the giving up of the body; नो-मोक्षो – is not liberation; न – nor that; दण्डस्य-कमण्डलोः – of the staff & the water-bowl; यतः-अविद्या-हृदय-ग्रन्थि-मोक्षः – consists in the destruction of the heart's knot which is nescience; ततः-मोक्षः – but the liberation.

The giving up of the body is not liberation, nor that of the staff & the water-bowl; but the liberation consists in the destruction of the heart's knot which is nescience.

कुल्यायामथ नद्यां वा शिवक्षेत्रेऽपि चत्वरे ।

पर्णं पतति चेत्तेन तरोः किं नु शुभाशुभम् ॥ ५५९ ॥

पर्णं कुल्यायां वा नद्यां अथ शिवक्षेत्रे चत्वरे अपि चेत् पतति तेन तरोः किं नु शुभाशुभम् ?

पर्णं-पतति-चेत – if a leaf falls; कुल्यायां-वा-नद्यां-अथ-शिवक्षेत्रे-चत्वरे-अपि – in a small stream, or river, or a place consecrated to Shiva, or even in a crossing of roads; तरोः – to the tree; तेन-किं-नु-शुभाशुभम् – of what good or evil effect is that.

If a leaf falls in a small stream, or river, or a place consecrated to Shiva, or even in a crossing of roads; to the tree of what good or evil effect is that?

पत्रस्य पुष्पस्य फलस्य नाशवद्-

देहेन्द्रियप्राणधियां विनाशः ।

नैवात्मनः स्वस्य सदात्मकस्या-

नन्दाकृतेर्वृक्षवदस्ति चैषः ॥ ५६० ॥

देह-इन्द्रिय-प्राण-धियां विनाशः पत्रस्य पुष्पस्य फलस्य नाशवत् च, स्वस्य सदात्मकस्य आनन्दाकृतेः आत्मनः न एव एषः वृक्षवत् अस्ति ।

देह-इन्द्रिय-प्राण-धियां – of the body, organs, vital force/pranas, & intellect/buddhi; विनाशः – the destruction; पत्रस्य-पुष्पस्य-फलस्य-नाशवत् – is like that of a leaf or flower or fruit (to a tree); स्वस्य – which is one's true nature; सदात्मकस्य – the Reality; आनन्दाकृतेः – the Embodiment of Bliss; आत्मनः – the Self/Atman; न-एव-च – it does not affect; एषः – that; वृक्षवत् – like the tree; अस्ति – survives.

The destruction of the body, organs, vital force/pranas, & intellect/buddhi is like that of a leaf or flower or fruit (to a tree); it does not affect the Self/Atman, the Reality, the Embodiment of Bliss, which is one's true nature; that survives like the tree.

प्रज्ञानघन इत्यात्मलक्षणं सत्यसूचकम् ।

अनूद्यौपाधिकस्यैव कथयन्ति विनाशनम् ॥ ५६१ ॥

'प्रज्ञानघनः' इति सत्यसूचकम् आत्मलक्षणं अनूद्य औपाधिकस्य एव विनाशनम् कथयन्ति ।

'प्रज्ञानघनः' – "The Embodiment of Knowledge"; इति – in the words; सत्यसूचकम् – which indicates Its Reality; आत्मलक्षणं – the real nature of the Self/Atman; अनूद्य – by setting forth; औपाधिकस्य – of the apparent limitations; एव – merely; विनाशनम् – destruction; कथयन्ति – speaks off.

The Srutis, by setting forth the real nature of the Self/Atman in the words, "The Embodiment of Knowledge", which indicates Its Reality, speaks off destruction of the apparent limitations merely.

अविनाशी वा अरेऽयमात्मेति श्रुतिरात्मनः ।

प्रब्रवीत्यविनाशित्वं विनश्यत्सु विकारिषु ॥ ५६२ ॥

'अरे अयम् आत्मा अविनाशी वा' इति श्रुतिः विकारिषु विनश्यत्सु आत्मनः अविनाशित्वं प्रब्रवीति ।

'अरे अयम् आत्मा अविनाशी वा' – "Verily is this Self immortal, my dear"; इति – in the passage; श्रुतिः – the Sruti; विकारिषु – and subject to modification; विनश्यत्सु – in the midst of things perishable; आत्मनः – of the Self; अविनाशित्वं – the immortality; प्रब्रवीति – mentions.

The Srutis in the passage, "Verily is this Self immortal, my dear" mentions the immortality of the Self in the midst of things perishable and subject to modification.

पाषाणवृक्षतृणधान्यकडङ्कराद्या
दग्धा भवन्ति हि मृदेव यथा तथैव ।
देहेन्द्रियासुमन आदि समस्तदृश्यं
ज्ञानाग्निदग्धमुपयाति परात्मभावम् ॥ ५६३ ॥

यथा पाषाण-वृक्ष-तृण-धान्य-कडङ्कराद्या दग्धा मृद्-एव-हि भवन्ति तथा-एव देह-इन्द्रिय-आसु-मन-आदि समस्तदृश्यं ज्ञानाग्नि-दग्धम् परात्मभावम्-उपयाति ।

यथा – just as; पाषाण – a stone; वृक्ष – a tree; तृण – grass; धान्य – paddy; कडङ्कर – husk; आद्या – etc.; दग्धा – when burnt; मृद्-एव-हि – earth (ashes) only; भवन्ति – are reduced to; तथा-एव – even so; देह-इन्द्रिय-आसु-मन-आदि-समस्तदृश्यं – the whole objective universe comprising the body, organs, vital force, mind, and so forth; ज्ञानाग्नि-दग्धम् – when burnt by the fire of realization; परात्मभावम्-उपयाति – are … reduced to the Supreme Self.

Just as when burnt a stone, a tree, grass, paddy, husk, etc. when burnt are reduced to earth (ashes) only; even so the whole objective universe comprising the body, organs, vital force, mind, and so forth are when burnt by the fire of realization reduced to the Supreme Self.

विलक्षणं यथा ध्वान्तं लीयते भानुतेजसि ।
तथैव सकलं दृश्यं ब्रह्मणि प्रविलीयते ॥ ५६४ ॥

यथा ध्वान्तं विलक्षणं भानुतेजसि लीयते तथा-एव सकलं दृश्यं ब्रह्मणि प्रविलीयते ।

यथा – as; ध्वान्तं – darkness; विलक्षणं – which is distinct; भानुतेजसि – in the sun's radiance; लीयते – vanishes; तथा-एव – so; सकलं-दृश्यं – the whole objective universe; ब्रह्मणि – in Brahman; प्रविलीयते – dissolves.

As darkness which is distinct (from sunshine), vanishes in the sun's radiance, so the whole objective universe dissolves in Brahman.

घटे नष्टे यथा व्योम व्योमैव भवति स्फुटम् ।
तथैवोपाधिविलये ब्रह्मैव ब्रह्मवित्स्वयम् ॥ ५६५ ॥

यथा घटे नष्टे व्योम, स्फुटम् व्योम एव भवति, तथा-एव उपाधिविलये ब्रह्मविद् स्वयम् ब्रह्म एव ।

यथा –as; घट-नष्टे – when a jar is broken; व्योम – the space enclosed by it; व्योम-एव-स्फुटम्-भवति – becomes palpably the limitless space; तथा-एव – so; उपाधिविलये – when the apparent limitations are destroyed; ब्रह्मविद् – the knower of Brahman;

स्वयम्-ब्रह्म-एव – verily becomes Brahman Itself.

As when a jar is broken the space enclosed by it becomes palpably the limitless space; so when the apparent limitations are destroyed, the knower of Brahman verily becomes Brahman Itself.

क्षीरं क्षीरे यथा क्षिप्तं तैलं तैले जलं जले ।

संयुक्तमेकतां याति तथाऽऽत्मन्यात्मविन्मुनिः ॥ ५६६ ॥

यथा क्षीरं-क्षीरे, तैलं-तैले, जलं-जले क्षिप्तं संयुक्तम् एकतां-याति तथा आत्मविद्-मुनिः-आत्मनि (याति) ।

यथा – as; क्षीरं-क्षीरे – milk into milk; तैलं-तैल – oil into oil; जलं-जले – water into water;

क्षिप्तं – poured; संयुक्तम्-एकतां-याति – becomes united & one with it; तथा – so;

आत्मविद्-मुनिः-आत्मनि-(याति) – the sage who realized Atman/the Self becomes one with the Self.

As milk poured into milk, oil into oil, and water into water, becomes united & one with it, so the sage who realized Atman/the Self becomes one with the Self.

एवं विदेहकैवल्यं सन्मात्रत्वमखण्डितम् ।

ब्रह्मभावं प्रपद्यैष यतिर्नावर्तते पुनः ॥ ५६७ ॥

एवं अखण्डितम्-सत्-मात्रत्वम्-ब्रह्मभावं विदेहकैवल्यं प्रपद्य एषः-यतिः पुनः-न-आवर्तते ।

एवं – thus; अखण्डितम्-सत्-मात्रत्वम्-ब्रह्मभावं – becoming eternally identified with the Absolute Reality – Brahman; विदेहकैवल्यं – the extreme isolation that comes of disembodiedness; प्रपद्य – realizing; एषः-यतिः – the sage; पुनः-न-आवर्तते – no longer suffers transmigration.

Realizing thus the extreme isolation that comes of disembodiedness, and becoming eternally identified with the Absolute Reality–Brahman, the sage no longer suffers transmigration.

सदात्मैकत्वविज्ञानदग्धाविद्यादिवर्ष्मणः ।

अमुष्य ब्रह्मभूतत्वाद् ब्रह्मणः कुत उद्भवः ॥ ५६८ ॥

सद्-आत्म-एकत्व-विज्ञान-दग्ध-अविद्यादि-वर्ष्मणः ब्रह्मभूतत्वाद् अमुष्य-ब्रह्मणः कुत उद्भवः ?

सद्-आत्म-एकत्व-विज्ञान-दग्ध-अविद्यादि-वर्ष्मणः – his bodies consisting of nescience etc., having been burnt by the realization of the identity of Jiva/individual soul & Brahman; ब्रह्मभूतत्वाद् – as he becomes Brahman Itself; अमुष्य-ब्रह्मणः – he-Brahman Itself; कुत – how can; उद्भवः – ever have rebirth.

His bodies consisting of nescience etc., having been burnt by the realization of the identity of Jiva/individual soul & Brahman, and as he becomes Brahman Itself; how can he-Brahman Itself ever have rebirth?

मायाक्लृप्तौ बन्धमोक्षौ न स्तः स्वात्मनि वस्तुतः ।

यथा रज्जौ निष्क्रियायां सर्पाभासविनिर्गमौ ॥ ५६९ ॥

बन्धमोक्षौ मायाक्लृप्तौ । वस्तुतः स्वात्मनि न स्तः यथा रज्जौ निष्क्रियायां सर्प-आभास-विनिर्गमौ ।

बन्धमोक्षौ – bondage & liberation; मायाक्लृप्तौ – which are conjured up by maya; वस्तुतः – really; स्वात्मनि – in the Atman, one's Reality; न – do not; स्तः – exist; यथा – as; रज्जौ – in the rope; निष्क्रियायां – which suffers no change; सर्प-आभास-विनिर्गमौ – the appearance & exit of the snake.

bondage & liberation, which are conjured up by maya, do not really exist in the Atman, one's Reality; as the appearance & exit of the snake (do not abide) in the rope which suffers no change.

आवृतेः सदसत्त्वाभ्यां वक्तव्ये बन्धमोक्षणे ।

नावृतिर्ब्रह्मणः काचिदन्याभावादनावृतम् ।

यद्यस्त्यद्वैतहानिः स्याद् द्वैतं नो सहते श्रुतिः ॥ ५७० ॥

आवृतेः सदसत्त्वाभ्यां बन्ध-मोक्षणे वक्तव्ये तु ब्रह्मणः अनावृतम् अन्य-अभावात् काचित् आवृति न ।

यदि अस्ति अद्वैतहानिः स्याद् श्रुतिः द्वैतं नो सहते ।

आवृतेः-सदसत्त्वाभ्यां – when there is the presence or absence of a covering veil; बन्ध-मोक्षणे – bondage &liberation; वक्तव्ये – may be talked of; तु – but; ब्रह्मणः-काचित्-आवृति-न – there can be no covering veil for Brahman; अनावृतम्-अन्य-अभावात् – which is always uncovered for the want of a second thing besides Itself; यदि – if; अस्ति – there be; अद्वैतहानिः-स्याद् – the non-duality of Brahman will be contradicted; श्रुतिः-द्वैतं-नो-सहते – Sruits can never brook duality.

Bondage &liberation may be talked of when there is the presence or absence of a covering veil; but there can be no covering veil for Brahman, which is always uncovered for the want of a second thing besides Itself; if there be, the non-duality of Brahman will be contradicted, and Sruits can never brook duality.

बन्धञ्च मोक्षञ्च मृषैव मूढा

बुद्धेर्गुणं वस्तुनि कल्पयन्ति ।

दृगावृतिं मेघकृतां यथा रवौ

यतोऽद्वयाऽसङ्गचिदेतदक्षरम् ॥ ५७१ ॥

मूढाः बन्धं च मोक्षं च बुद्धेः गुणं वस्तुनि मृष एव कल्पयन्ति, यथा मेघकृतां दृक्-आवृतिं रवौ ।

यतः एतत् अक्षरम् अद्वय-असङ्ग-चित् ।

मूढाः – ignorant people; बन्धं – bondage; च – and; मोक्षं – liberation; बुद्धेः-गुणं – are the attributes of the intellect; वस्तुनि – on the Reality; मृषा-एव – falsely; कल्पयन्ति – superimpose; यथा – as; मेघकृतां – by a cloud; दृक्-आवृतिं – the covering/limit of the eye-sight; रवौ – is transferred to the sun; यतः – for; एतत् – this; अक्षरम् – immutable Brahman; अद्वय-असङ्ग-चित्-च – is Knowledge Absolute, the one without second, and unattached.

Bondage and liberation are the attributes of the intellect which ignorant people falsely superimpose on the Reality, as the covering/limit of the eye-sight by a cloud is transferred to the sun; for this immutable Brahman is Knowledge Absolute, the one without second, and unattached.

अस्तीति प्रत्ययो यश्च यश्च नास्तीति वस्तुनि ।

बुद्धेरेव गुणावेतौ न तु नित्यस्य वस्तुनः ॥ ५७२ ॥

वस्तुनि अस्ति-इति-यः-प्रत्ययः च यः-न-अस्ति-इति एतौ बुद्धेः-एव-गुणौ तु नित्यस्य-वस्तुनः-न ।

अतस्तौ मायया क्लृप्तौ बन्धमोक्षौ न चात्मनि ।

वस्तुनि –with reference to reality; अस्ति-इति-यः-प्रत्ययः – the idea that bondage exists; च – and; यः-न-अस्ति-इति – the idea that it does not exists; एतौ – are both; बुद्धेः-एव-गुणौ – merely attributes of the intellect; तु – and; नित्यस्य-वस्तुनः-न – never belong to the Eternal Reality-Brahman.

With reference to reality, the idea that bondage: exists, and does not exist, are both merely attributes of the intellect, and never belong to the Eternal Reality-Brahman.

अतस्तौ मायया क्लृप्तौ बन्धमोक्षौ न चात्मनि

निष्कले निष्क्रिये शान्ते निरवद्ये निरञ्जने ।

अद्वितीये परे तत्त्वे व्योमवत्कल्पना कुतः ॥ ५७३ ॥

अतः तौ बन्धमोक्षौ मायया क्लृप्तौ च न आत्मनि । व्योमवत् निष्कले, निष्क्रिये, शान्ते, निरवद्ये, निरञ्जने, अद्वितीये, परे तत्त्वे कल्पना कुतः ?

अतः – hence; तौ – those; बन्धमोक्षौ – bondage & liberation; मायया-क्लृप्तौ – are created by Illusion/Maya; न-च – and are not; आत्मनि – in the Self/Atman; व्योमवत् – like the infinite sky; निष्कले – without parts; निष्क्रिये – without activity; शान्ते – calm; निरवद्ये – unimpeachable; निरञ्जन – taintless; अद्वितीये – one without second; परे-तत्त्वे – with regard to the Supreme Truth; कल्पना-कुतः – how can there be any idea of limitation.

Hence those bondage & liberation are created by Illusion/Maya and are not in the Self/Atman; how can there be any idea of limitation with regard to the Supreme Truth, which is: like the infinite sky, without parts, without activity, calm, unimpeachable, taintless, and one without second?

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।

न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ ५७४ ॥

न-निरोधः-न-च-उत्पत्तिः, न-बद्धः-न-च-साधकः, न-मुमुक्षुः-न-वै-मुक्तः इति-एषा परमार्थता ।

न-निरोधः-न-च-उत्पत्तिः – neither death nor birth; न-बद्धः-न-च-साधकः – neither a bound nor a struggling soul; न-मुमुक्षुः-न-वै-मुक्तः – neither a seeker after liberation nor a liberated one; इति-एषा – this is; परमार्थता – the ultimate truth.

There is: neither death nor birth, neither a bound nor a struggling soul, neither a seeker after liberation nor a liberated one - this is the ultimate truth.

सकलनिगमचूडास्वान्तसिद्धान्तरूपं

परमिदमतिगुह्यं दर्शितं ते मयाद्य ।

अपगतकलिदोषं कामनिर्मुक्तबुद्धिं

स्वसुतवदसकृत्त्वां भाव्यित्वा मुमुक्षुम् ॥ ५७५ ॥

सकल-निगम-चूडा-स्वान्त-सिद्धान्त-रूपं परम् अतिगुह्यं इदम् ते अपगत-कलिदोषं काम-निर्मुक्त-बुद्धिं मुमुक्षुम् त्वां स्वसुतवत् भाव्यित्वा मया अद्य असकृत् दर्शितं ।

सकल-निगम-चूडा-स्वान्त-सिद्धान्त-रूपं – which is the inmost purport of all Vedanta, the crest of the Vedas; परम् – excellent; अतिगुह्यं – profound secret; इदम् – this; ते – to you; अपगत-कलिदोषं-काम-निर्मुक्त-बुद्धिं-मुमुक्षुम् – an aspirant after liberation, purged of the taints of this Dark Age, and of a mind free from desires; त्वां-भाव्यित्वा – considering you; स्वसुतवत् – as to one's own son; मया – I have; अद्य – today; असकृत् – repeatedly; दर्शितं – revealed.

I have today repeatedly revealed to you, as to one's own son, this excellent & profound secret, which is the inmost purport of all Vedanta, the crest of the Vedas; considering you an aspirant after liberation, purged of the taints of this Dark Age, and of a mind free from desires.

इति श्रुत्वा गुरोर्वाक्यं प्रश्रयेण कृताननतिः।

स तेन समनुज्ञातो ययौ निर्मुक्तबन्धनः॥ ५७६॥

इति गुरोः वाक्यं श्रुत्वा सः प्रश्रयेण कृताननतिः, तेन-समनुज्ञातो निर्मुक्तबन्धनः ययौ।

इति – these; गुरोः – of the Guru; वाक्यं – words; श्रुत्वा – hearing; सः – the disciple; प्रश्रयेण – out of reverence; कृताननतिः – prostrated himself before him; तेन-समनुज्ञातो – with his permission; निर्मुक्तबन्धनः – freed from bondage; ययौ – went his way.

Hearing these words of the Guru, the disciple out of reverence prostrated himself before him, and with his permission went his way, freed from bondage.

गुरुरेव सदानन्दसिन्धौ निर्मग्नमानसः।

पावयन्वसुधां सर्वां विचचार निरन्तरः॥ ५७७॥

सदानन्दसिन्धौ निर्मग्नमानसः निरन्तरः गुरुः एव सर्वां वसुधां पावयन् विचचार।

सदानन्दसिन्धौ-निर्मग्नमानसः-निरन्तरः-एव-गुरुः – the Guru with his mind free from all differentiated ideas & steeped in the Ocean of Existence & Bliss Absolute; सर्वां-वसुधां – the whole world; पावयन् – verily purifying; विचचार – roamed.

And the Guru with his mind free from all differentiated ideas & steeped in the Ocean of Existence & Bliss Absolute, roamed, verily purifying the whole world.

इत्याचार्यस्य शिष्यस्य संवादेनात्मलक्षणम्।

निरूपितं मुमुक्षूणां सुखबोधोपपत्तये॥ ५७८॥

मुमुक्षूणां सुखबोध-उपपत्तये आचार्यस्य-शिष्यस्य संवादेन आत्मलक्षणम् निरूपितं इति।

मुमुक्षूणां – of the seekers after liberation; सुखबोध-उपपत्तये – for easy comprehension; आचार्यस्य-शिष्यस्य – between the teacher & the disciple; संवादेन – by the way of a dialogue; आत्मलक्षणम् – the nature of the Self/Atman; निरूपितं – has been ascertained; इति – thus.

Thus by the way of a dialogue between the teacher & the disciple, the nature of the Self/Atman has been ascertained for easy comprehension of the seekers after liberation.

हितमिदमुपदेशमाद्रियन्तां

विहितनिरस्तसमस्तचित्तदोषाः ।

भवसुखविरताः प्रशान्तचित्ताः

श्रुतिरसिका यतयो मुमुक्षवो ये ॥ ५७९ ॥

विहित-निरस्त-समस्त-चित्तदोषाः, भवसुख-विरताः, प्रशान्तचित्ताः, श्रुतिरसिका, ये मुमुक्षवः यतयः इदम्

हितम् उपदेशम् आद्रियन्तां ।

विहित-निरस्त-समस्त-चित्तदोषाः – who have purged themselves of taints of the mind by the observance of the prescribed methods; भवसुख-विरताः – who are averse to the worldly pleasures; प्रशान्तचित्ताः – श्रुतिरसिका – who are of serene minds & take a delight in the Sruti/Vedas; ये – who are; मुमुक्षवः – seekers after liberation; यतयः – Sannyasins/Monks; इदम् – this; हितम् – salutary; उपदेशम् – teaching; आद्रियन्तां – appreciate.

May those Sannyasins/Monks who are seekers after liberation, who have purged themselves of taints of the mind by the observance of the prescribed methods, who are averse to the worldly pleasures, and who are of serene minds & take a delight in the Srutis/Vedas; appreciate this salutary teaching.

संसाराध्वनि तापभानुकिरणप्रोद्भूतदाहव्यथा-

खिन्नानां जलकांक्षया मरुभुवि भ्रान्त्या परिभ्राम्यताम् ।

अत्यासन्नसुधाम्बुधिं सुखकरं ब्रह्माद्वयं दर्शय-

त्येषा शङ्करभारती विजयते निर्वाणसंदायिनी ॥ ५८० ॥

संसार-अध्वनि ताप-भानु-किरण-प्रोद्भूत-दाहव्यथा-खिन्नानां जलकांक्षया मरुभुवि भ्रान्त्या परिभ्राम्यताम्,

अति-आसन्न-सुधाम्बुधिं सुखकरं-अद्वयं-ब्रह्म दर्शयति एषा निर्वाण-संदायिनी शङ्करभारती विजयते ।

संसार-अध्वनि – in the way of the world; ताप-भानु-किरण-प्रोद्भूत-दाहव्यथा – by burning pain due to the (scorching) sunshine of threefold misery; खिन्नानां – for those who are afflicted; जलकांक्षया – in search of water; मरुभुवि – in a desert; भ्रान्त्या – who through delusion; परिभ्राम्यताम – wander about; अति-आसन्न-सुखकरं-सुधाम्बुधिं – within easy reach, the soothing ocean of nectar; अद्वयं-ब्रह्म – Brahman, the one without second; दर्शयति – pointing out; एषा – here is; निर्वाण-संदायिनी – to lead them on to liberation; शङ्करभारती –message of Shankara; विजयते – triumphant.

For those who are afflicted, in the way of the world, by burning pain due to the (scorching) sunshine of threefold misery, and who through delusion wander about in a desert in search of water; for them here is triumphant message of Shankara pointing out, within easy reach, the soothing ocean of nectar, Brahman, the one without second, to lead them on to liberation.

॥ इति शंकराचार्यविरचितं विवेकचुडामणि ॥